In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकादमी ग्रन्थमाला - 99

संस्कृतं संस्कृतिः समाजश्च

द्विदिवसीयराष्ट्रियसङ्गोष्ठ्यां समर्पितशोधपत्रसङ्कलनम्

2nd & 3rd October, 2010

प्रधानसम्पादकः
डा. वि. श्रीनिवासशर्मा
निदेशकः

सम्पादकः
डा. जोषि. सन्तोषकुमारः
शोधसहायकः

संस्कृत अकादमी
राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था
उस्मानियाविश्वविद्यालयः
हैदराबाद्
2013

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी ग्रन्थमाला 99

संस्कृतं संस्कृतिः समाजश्च

द्विदिवसीयराष्ट्रियसङ्गोष्ठ्यां समर्पितशोधपत्रसङ्कलनम्

2nd & 3rd October, 2010

प्रधानसम्पादकः

डा.वि.श्रीनिवासशर्मा

निदेशकः

सम्पादकः

&

सङ्गोष्ठीसंयोजकः

डा.जोषि. सन्तोषकुमारः

शोधसहायकः

संस्कृत अकाडमी

(आदर्शशोधसंस्था नवदेहलीस्थराष्ट्रियसंस्कृतसंस्थानेन मानिता)

उस्मानिया विश्वविद्यालयः, हैदराबाद्

2013

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी ग्रन्थमाला 99

ISBN – 978-93-80171-34-0

संस्कृतं संस्कृतिः समाजश्च

द्विदिवसीयराष्ट्रियसङ्गोष्ठ्यां समर्पितशोधपत्रसङ्कलनम्

ग्रन्थोऽयं भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनस्य राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य द्रव्यानुदानेन प्रकाशितः

प्रथममुद्रणम्–2013

प्रतयः - 100

मूल्यम् - 150 रूप्यकाणि

सर्वेऽधिकाराः संस्कृतपरिषदायत्ताः

प्राप्तिस्थानम्

संस्कृत अकाडमी

(आदर्शशोधसंस्था)

उस्मानिया विश्वविद्यालयः, हैदराबाद् -500007,

दूरवाणी-040-27070281

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Series-99

PROCEEDINGS
OF
THE TWO -DAY NATIONAL SEMINAR
On
संस्कृतं संस्कृतिः समाजश्च

Relevance of Sanskrit language in contemporary society
In order to retain the values of our Indian culture

2nd & 3rd October, 2010

Chief Editor
Dr. V . Srinivasa Sharma
In charge Director

Editor
&
Seminar co-ordinator
Dr. Joshi. Santosh Kumar
Research Assistant

SANSKRIT ACADEMY
(Adarsha Shodha Samstha)
Recognised by Rashtriya Sanskrit Sansthan, New Delhi
Osmania University, Hyderabad-07
2013

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Series-99

ISBN – 978-93-80171-34-0

PROCEEDINGS
OF
THE TWO-DAY NATIONAL SEMINAR
On
संस्कृतं संस्कृतिः समाजश्च

This Book is brought out by the Generous Financial help of RASHTRIYA SANSKRIT SANSTHAN, NEW DELHI

First Edition-2013

Copies – 100

Price - Rs.150/.

Printed at- Karshak Art Printers, Hyderabad

Copies can be had from-

SANSKRIT ACADEMY
(Adarsha Shodha Samstha)
Osmania University, Hyderabad-07
Phone&Fax 040-27070281
Website – www.Osmania.ac.in/sanskritacademy

In Public domain. Digitization Muthulakshmi Research Academy

FOREWORD

The Sanskrit Academy conducted a Two-Day National Seminar on "Samskrutam, Samskruti and Samajascha" on 2nd and 3rd of October, 2010.

The Seminar was inaugurated by Prof. T. Tirupati Rao, the hounourable Vice-Chancellor of Osmania University. The Key-note address was delivered by Prof. Rajiv Sanghal, Director, IIIT, Hyderabad. The Guest of honor was Prof. K. Neelakantham. Head ,Dept.of Sanskrit, O.U The function was presided Over by Dr. Shrinivasa Varakhedi, Director, Sanskrit Academy.

Around 150 papers were presented in the seminar by the erudite scholars from various states. Selected 23 papers in Sanskrit and English are published in this book. The names of remaining paper presenters are also enlisted in this book.

I express my thanks to Prof. T. Tirupati Rao for inaugurating and gracing the occasion.

I extend my humble thanks to Prof. Rajiv Sanghal for his mellifluous key-note address. I am thankful to, Prof. K. Neelakantham for gracing the occasion as Guest of honour.

I am grateful to the present Hon'ble Vice-Chancellor, Osmania University Prof. S. Satyanarayana,Vice-President and Chairman of Sanskrit Academy and the authorities of Osmania University.

I also remain ever grateful to Prof. Radhavallabh Tripathi, Hon'ble Vice-Chancellor and the Registrar Prof. K.B. Subbarayudu and the authorities of Rashtriya Sanskrit Sansthan, under Ministry of Human Resource Development, Govt. of India for their constant support in all aspects.

I humbly acknowledge the co-operation extended by Dr. Shrinivasa Varakhedi, Director and all other colleagues of Sanskrit Academy.

I congratulate Dr. J. Santosh Kumar, Research Assistant, Sanskrit Academy to bring out the Proceedings of National Seminar.

I thank all the scholars for contributing their valuable presentations.

I wish, this book will receive the Appreciation of scholars, students and lovers of Sanskrit poets.

Dr. V. Srinivasa Sharma

In-charge Director

In Public domain. Digitization Muthulakshmi Research Academy

द्विदिवसीयराष्ट्रियसङ्गोष्ठ्याःप्रतिवेदनम्

राष्ट्रियसंस्कृतसंस्थानेन आदर्शशोधसंस्थारूपेण मानितायां हैदराबाद् नगरस्थ उस्मानियाविश्वविद्यालयीय संस्कृतपरिषदि 2010 तमे वर्षे अक्टोबर् मासे द्वितीय,तृतीय दिनाङ्कयोः महात्मागान्धिजयन्त्युत्सवं पुरस्कृत्य द्विदिवसीयराष्ट्रियसङ्गोष्ठी समायोजिता ।

अस्यां सङ्गोष्ठ्यां विभिन्नेभ्यः आन्ध्रप्रदेशः, तमिलनाडु, महाराष्ट्र, कर्णाटक, केरलादिराज्येभ्यः सार्धैकशतसंख्याकाः पण्डिताः, अनुसन्धातारः समेत्य स्व समर्पितेषु पत्रेषु स्वीयाः विचारधाराः प्रकटीकृतवन्तः।

अस्याः द्विदिवसीयराष्ट्रियसङ्गोष्ठ्याः उद्घाटनमहोत्सवः उस्मानियाविश्वविद्यालयीये आचार्य रामिरेड्डिदूरविद्याकेन्द्रस्य समावेशमन्दिरे 2010 अक्टोबर् मासे द्वितीय दिनाङ्के प्रातः दशवादने समारब्धः। अस्मिन् उद्घाटनमहोत्सवे वैदिकप्रार्थनानन्तरं संस्कृतपरिषदः निदेशकः, सभाध्यक्षः डा.श्रीनिवासवरखेडि महोदयः अतिथीन् सर्वान् स्वागतीकृत्य सङ्गोष्ठ्याः उद्देश्यप्रयोजनानि विवृत्य संस्कृतपरिषदा निर्वर्त्यमानान् नैकान् कार्यक्रमान् परिषदः प्रगतिं च प्रास्तावीत् ।अस्याःसङ्गोष्ठ्याःउद्घाटनम् उस्मानियाविश्वविद्यालयस्य कुलपतिना आचार्य टि.तिरुपतिराव् महोदयेन विहितम् । ततः सङ्गोष्ठ्याः उद्घाटनभाषणं कुर्वन् संस्कृतपरिषदि निर्वर्त्यमानान् कार्यक्रमान् प्राशंसत । तदनु संस्कृतभाषायाः महत्वं सङ्गोष्ठीनां निर्वहणावश्यकताम् उद्दिश्य अभाषन्त । आचार्य राजीवसङ्गल् महाभागः IIIT, Hyderabad संस्थायाः निदेशकः गान्धिमहात्मस्य उन्नताशयान् व्यवहारविधानम्, आशयानाम् आचरणं, संस्कृतमहत्त्वम् चेत्याद्यंशान् स्वदिशानिर्देशभाषणे प्रास्तौत् । ततः सारस्वतातिथिः उस्मानियाविश्वविद्यालयस्य संस्कृतविभागाध्यक्षः आचार्य के .नीलकण्ठम् महोदयः संस्कृतभाषायाः औन्नत्यं, तस्याः प्रभावः समाजे कथं भवति इति सोदाहरणं न्यरूपयत् । अन्ते च अतिथीनां सम्मानेन शान्तिमन्त्रेण च उद्घाटनकार्यक्रमः सम्पन्नः।

सङ्गोष्ठ्याः प्रथमं सत्रं दूरविद्याकेन्दस्य सामेवेशमन्दिरे सम्पन्नम् । ततः त्रिसृषु वेदिकासु यथा संस्कृतपरिषदः ग्रन्थालये, समावेशमन्दिरे, अनुसन्धानप्रकोष्ठे च समकालमेव त्रीणि सत्राणि समायोजितानि । प्रथमेऽहनि द्वे सत्रे, द्वितीयेऽहनि च त्रीणिसत्राणि समायोजितानि। एषु सत्रेषु प्रायशः चत्वारिंशदुत्तरशतसंख्याकाः पण्डिताःअनुसन्धातारश्च स्व पत्राणि समर्पितवन्तः।

In Public domain. Digitization Muthulakshmi Research Academy

राष्ट्रियसङ्गोष्ठ्यां द्वितीयदिवसे सायं उडिपीमठाधीश्वराः श्री श्री श्री विश्वेश्वरस्वामिपादाः समेत्य स्वीयानुग्रहभाषणेन सर्वान् आहूतान् अन्वगह्णन् ।

ततःपरं समापनसमारोहे उस्मानियाविश्वविद्यालयस्थसंस्कृतविभागस्य आचार्यः ए. रामुलुमहोदयः अध्यक्षस्थानं अलङ्कृतवन्तः। डा.टि.पुरुषोत्तमरावः (चैर्मन् है पवर् कमिटि आन्ध्रप्रदेशसर्वकारः) स्वभाषणे संस्कृतभाषामहत्वं तदध्ययनस्यावश्यकतां व्यवृण्वन् । सारस्वतातिथी आचार्य कोराड.सुब्रह्मण्यम् महाभागः प्राचार्यः (भाषाशास्त्रविभागः,हैदराबाद् विश्वविद्यलयः),आचार्य. श्रीपादसुब्रह्मण्यम् महाभागः निदेशकः (आन्ध्रप्रदेशप्राच्यलिखितभाण्डागारः एवं परिशोधनालयः) कार्यक्रमस्यास्य महत्वम् आविष्कृतवन्तौ । समापनसमारोहस्यान्ते अस्याः सङ्गोष्ठ्याः संयोजकः डा. जोषि .सन्तोषकुमारः द्विदिवसीयकार्यक्रमसरणिं न्यवेदयत्। अन्ते अतीथीनां सम्मानेन शान्तिपाठेन च द्विदिवयीयराष्ट्रियसङ्गोष्ठीकार्यक्रमः सफलतां प्राप्तः।

द्विदिवसीयराष्ट्रियसङ्गोष्टी कार्यक्रमस्य साफल्ये बहूनां सहकारः वर्तते । ते सर्वे कार्येस्मिन् कारयितृ प्रेरकानुमोदकस्वरूपेण सहकृतवन्तः तेभ्यः सर्वेभ्यः कृतज्ञताविष्करणं क्रियते ।

कार्यक्रमस्यास्य अनुमोदकेभ्यः उस्मानियाविश्वविद्यलयस्य उपकुलपतिभ्यः आचार्य. टि. तिरुपतिराव् महोदयेभ्यः, तथा ग्रन्थस्यास्य प्रकाशनार्थं द्रव्यानुदानप्रदातृभ्यः राष्ट्रियसंस्कृतसंस्थानस्य उपकुलपतिमहोदयेभ्यः आचार्य. राधावल्लभत्रिपाठीमहोदयेभ्यः, कुलसचिवेभ्यः आचार्य. के.सुब्बरायुडु महोदयेभ्यः, अन्येभ्यः अधिकारिभ्यश्च, सश्रद्धं हार्दिकं कार्तज्ञ्यं वितीर्यते ।

मयि विश्वासं निधाय सङ्गोष्ठीनिर्वहणदायित्वं दत्त्वा अनुक्षणं कार्यक्रमनिर्वहणे अमूल्याः सूचनाः दत्तवद्भ्यः तदानीन्तन संस्कृतपरिषदः निदेशकेभ्यः डा.श्रीनिवासवरखेडी महोदयेभ्यः हृदयपूर्वकं कृतज्ञताञ्जलिः अविष्क्रियते । एवं सङ्गोष्ठीकार्यवर्गाध्यक्षेभ्यः उस्मानियाविश्विविद्यालयस्य संस्कृतविभागप्राचार्येभ्यः आचार्य ए.रामुलु महोदयेभ्यः अन्येभ्यःसदस्येभ्यश्च, तथा संस्कृतपरिषत् सहचरकर्मचारिबृन्दाय च कार्तज्ञ्यं विनिवेद्यते ।

ग्रन्थस्यास्य प्रकाशने सहकृतवद्भ्यः संस्कृतपरिषत् निदेशकेभ्यः डा.वि. श्रीनिवासशर्मा महोदयेभ्यः सविनयं कृतज्ञताञ्जलिः समर्प्यते । एवं एतेषां सर्वेषां योगदानेन प्रकाश्यमानोऽयं ग्रन्थः गीर्वाणभारतीसमुपासकेभ्यः सर्वेभ्यः महदुपकाराय भवतीति आशासे ।

डा. जोषि. सन्तोषकुमारः
Seminar co ordinator

In Public domain. Digitization Muthulakshmi Research Academy

Programme Committee

1.	Prof. A. Ramulu, Chairman, BOS, Dept. of Sanskrit, OU	Chairman
2.	Prof. A. Vijayasree, Dept. of Sanskrit, OU	Member
3.	Dr. K. Nageswar rao, Reader, Govt. City College, Hyd..	Member
4.	Dr. E.Rajyalakshmi, Reader, A.K.L.R. Govt. Oriental College,	Member
5.	Dr. G.Rama Sharma, Reader ,Govt. Degree College, Begumpet,	Member
6.	Dr. S. Rama Devi, Reader, Ramachandra Degree College	Member
7.	Dr. Vidyananda Arya, Asst. Professor, Nizam College	Member
8.	Dr. V. Srinivasa Sharma, Editor, Sanskrit Academy	Member
9.	Dr. K.Varalakshmi, Dy. Director, Sanskrit Academy	Member
10.	Dr. V. Subrahmanyam, Dy. Director, Sanskrit Academy	Member
11.	Sri K.V.Surya Prakash, Research Asst., Sanskrit Academy	Member
12.	Dr. Joshi Santosh Kumar, Research Asst., Sanskrit Academy	Convener

Registration committee

1. Prof. T. keshavanarayana	chairman
2. prof. A.vijayasree	member
3.Dr .K. vani	member
4.Dr k. varalakshmi	member
5 Smt k. manjeera	member

Paper Selection Committee

1. Prof P. Shahsirekha
3.Prof K. Nelakantham
4.Prof A .Ramulu
5.Dr v. Srinivasa sharma
6.Dr M .Ramasharma
7.Dr S. Ramadevi

Accommodation /Catering /Transportation

1.Dr k. Nageswarrao
2.Dr v . subrahmanyam
3.Dr vidyanda arya
4 .Sri k.v suryaprakash
5. Sri M.S.S.V Sharma

In Public domain. Digitization Muthulakshmi Research Academy

The List of Delegates and their Papers

S.No	Name of the Delegate	Title Of The Paper
1	A.Annapurna	संस्कृतभाषायाः महत्त्वम्
2	A.Jyothishmathi	పర్యావరణ పరిరక్షణ నాడు నేడు
3	Ananta Kumar Desai	Nyayavyavasta
4	Asavadi Sudhama Vamsi	कालिदासकृतिषु पर्यावरणविज्ञानम्
5	B. Kamakshi	సమాజం -పురుషార్థపాలనమ్
6	B. Karuna Reddy	Arts As Presented In The Ramayana
7	B. Rammohan	संस्कृतभाषायाः महत्त्वम्
8	B. Venkat Krishna	षोडशसंस्काराः
9	B.K. Malleeswari	-
10	Bhaskar Bhatt Joshi	संस्कारेषु विवाहः
11	Ch. Bhaskar Rao	-
12	Chanda Prakash	संस्कृतभाषायाःमहत्त्वम्
13	D. Pradeep Kumar	-
14	Deepak,	मध्वाचार्यकृत सर्वमूलग्रन्थानां व्याख्यातारः
15	Dhanasurjith D	Measures To Promote Sanskrit Language
16	Dr .A.Sachidananda Murthy	विज्ञानपथप्रदर्शिका संस्कृतभाषा
17	Dr .Narsaiah Sharma	భవభూతి తెలంగాణ ప్రాంతీయుడా ?
18	Dr .P. Somanatham	द्रव्याद्वैतभा□ वतम्
19	Dr.Sattenapalli Babu	భారతీయభాషలు సంస్కృతి పరిరక్షణలో సంస్కృతభాష పాత్ర మరియు ఆవశ్యకత
20	Dr . K. Vishwanatha Sharma	विज्ञानशतकर्तृत्वपरिशीलनम्
21	Dr . K.V .Ranganayaki	భారతీయసంస్కృతి -వివాహవ్యవస్థ
22	Dr .Shekh Abdul Ghani	उर्दू भाषा-साहित्य पर संस्कृत का प्रभाव
23	Dr. A. Shiva Ramakrishna Murthy	संस्कृतसाहित्ये चौषष्टिकलानां प्रस्तावना
24	Dr. C.L. Prabhakar	-
25	Dr. E. Rajyalaxmi	The concept and essence of Ashrams
26	Dr. G. Sireesha	Environmental Awareness in the works of kalidas
27	Dr. Ganesh Ishwar Bhat	पुरुषार्थानां समन्वितस्वरूपनिरूपणपुरस्सरं तेषां विरोधाविरोधविमर्शः

In Public domain. Digitization Muthulakshmi Research Academy

28	Dr. J. Nageswara Rao	Sanskrit Is The Language Of All Times
29	Dr. K. Veera Padmaja	చతుర్విధ ఆశ్రమాలు- పురుషార్థాలు
30	Dr. Kapiladev Srikrishna Sastri	-
31	Dr. L.V. Subrahmanyeswara Sarma	धर्ममञ्जरी –मनुस्मृतिः
32	Dr. Lakshmi Narasimhan	अन्यभाषासु संस्कृतस्य प्रभावः
33	Dr. Nori . Rajeswar Rao	భారతీయసంస్కృతి లో వైవాహికధర్మం
34	Dr. P.P.V.D. Naga Thrisula Pani	वेदवाङ्मये □र्यावरणचिन्तनम्
35	Dr. Palepu Subba Rao	Manuscript Logy –About Our Institution (Apgoml& Ra)
36	Dr. Ramachandra Joisa	प्राचीनार्वाचीनरज्याङ्गव्यवस्था
37	Dr. S. Lalitha	సంస్కృతసమాజం -ప్రభావిత విద్యావ్యవస్థ
38	Dr. S. Ramadevi	Indian philosophy in lection A word About Mahatmagandhi
39	Dr. S. Vishnukanth	संस्काराणां वैशिष्ट्यम्
40	Dr. T. Vani Kumari	పఞ్చకావ్యాలు- సార్వకాలీనత
41	Dr. V. Srinivasa Sharma	शिल्पश्रीःएकं अध्ययनम्
42	Dr. V. Subrahmanyam	भारतीयशिक्षाव्यवस्था –विकासक्रमः
43	Dr. Y.V. Krishna Kumari	సంగీతకళ
44	Dr.G. Swaminatha Charyulu	प्रान्तीयभाषासु संस्कृतभाषाप्रभावः
45	Dr.K .Sunita	-
46	Dungavath Naresh Kumar Nayak	భారతీయ సంస్కృతి పరిరక్షణలో- సంస్కృతభాష ఆవశ్యకత
47	E. Krishnaiah	Description Of Plants and environmental protections in Sanskrit Literature
48	G. Gowri Shankar	रामोपदिष्ठा राजनीतिः
49	G. Praveen	-
50	G. Varalakshmi	संस्कृतभाषारक्षणोपायाः
51	Hari Krishna. A	श्रीमद्भागवते केषाञ्चन प्रतिपदोक्ताव्ययानाम् –अर्थविशेषव्यञ्जकत्व परिशीलनम्
52	Jammalamadaka Venkata Subrahmanyam	संस्काराणां भेदाःकलाश्च
53	K. Jyoti	Protection of our Environment
54	K. Mallika	भारतीयसंस्कृतेः मूलाधारं संस्कृतम्

In Public domain. Digitization Muthulakshmi Research Academy

55	K. Rajeswari	సంస్కృతభాషామహత్త్వము
56	K. Shiva Kumar	जीवने पुरुषार्थाणां पालनं तन्महत्त्वश्च
57	K. Siva Parvathi	संस्कृतभाषायाः महत्त्वम्
58	K. Vinaya Kumar	दैनन्दिनजीवने आचाराणाम् आवश्यकता
59	K.K.V. Sarma	-
60	K.V.Surya Prakash	विजयनगरसंस्कृतसाहित्यम्
61	Karanam Ramesh babu	संस्कृतभाषारक्षणोपायाः
62	K.V .R.L . SUbhadra	ప్రధానపర్వాలు –వాటిలోని పరమార్థం
63	L. Partha saradhi	-
64	Lt. Col Nvsss Prakasa Rao	Panchamahayajnah sodasa samskara srautayajnasca -samajasreyah
65	M. Neeraja	సంస్కృతపరిరక్షకుడు -శివాజీ
66	M. Ramachandra Rao	ऋग्वेदे स्थित पर्यावरणस्य पर्यालोचनम्
67	M. S. Srikanth	विदेशेषु संस्कृतम्
68	M. Santosh Kumar	పురాణాలలో నారసింహతత్త్వం
69	M. Shiva Rama Charan	भारतीयपर्वाणि
70	M. Sridhar	अभिनवभारते संस्कृतम्
71	M. Umamaheswar Rao	आश्रमव्यवस्था
72	M.Amaranatha Sharma	प्राचीनदाक्षिणात्यशैवसाम्प्रदायाः
73	M.Suryanarayana	-
74	Madhavacharya T.V.	-
75	Manchali Padmanabhachar	-
76	Mrs. Ujjwala Desai	Relevance of Indian festivals in Modern times
77	N. Ch. Harikrishna	संस्कृतभाषारक्षणोपयाः
78	N. Ramu	సంస్కృతసాహిత్యం –వృక్ష /వనసంరక్షణము
79	N. Siva Senani	The Ability of Sanskrit to create new words
80	N.Hariprasad	आश्रमव्यवस्था
81	Narayana Nampoothiri	Sixteen samsakaras and its cultural and spiritual values
82	P. Pavan Kumar	संस्कृतशास्त्रसंरक्षणम्
83	P. satyaVani	వివాహవ్యవస్థ
84	P. Seshavatharam	ञ्चलकाराणां प्रयोगः उचितः वा न

In Public domain. Digitization Muthulakshmi Research Academy

85	P. Varalakshmi	దేవాలయాలు -సంస్కృతులు
86	Prasanna Vekatesh	Vidyavyavasta samaja
87	R. Varalakshmi	రూపకాలు- ఊర్వశీసార్వభౌమ ఈహామృగము
88	R.Y.Kondaiah	संस्कृतभाषासंस्कृति
89	Rangi .Satyanarayana	भारतीयपर्वाणि मकरसङ्क्रान्तिः
90	S. Balaji	पञ्चलकाराणां प्रयोगः उचितो वा नवा ?
91	S. Gayatri	-
92	S. Hari Haran	संस्कारेषु उपनयनम्
93	S. Krishna	समावर्तनम –संस्कारस्य वैशिष्ट्यम
94	S. Sudarsanan	संसकृतशास्त्रसंरक्षणम
95	S.S. Mukundam	आचारनियमाः
96	S.S.Siva Prasada Sharma	शैवागमेषु नित्यार्चनवैशिष्ट्यम्
97	S.V.B.K.V. Gupta	-
98	S.V.S.L. Phani Kameswari	षोडशसंस्काराः
99	Sankara Chandra Pavan	तन्त्रशास्त्रवैशिष्ट्यम
100	Sayyad Subhani	संस्कृतभाषायाः महत्त्वम्
101	Sujayendra Navaratna	कलाः
102	Surendra Komatineni	-
103	T. Haritha	उद्यानपालनम
104	T. Kshetra Mohan	-
105	Talluri Haribabu	Influence of Sanskrit on modern –day India
106	U .Krishanadev	భారతావనిలో గోమాత
107	V. Hari	प्रपञ्चीकरणसन्दर्भे समाजस्य भगवद्गीतायाः दिङ्निर्देशः
108	V. Kalpana	संस्कृति -पर्वाणि
109	V. Ravi	భారతీయభాషాసాహిత్యాలు-సంస్కృతభాష ప్రాముఖ్యత
110	V. Santosh	विज्ञानशास्त्रे विद्यमानाः तार्किकसिद्धान्तः
111	V. Sarveswara Rao	अर्थशास्त्रे स्व विषये कृत्याकृत्यपक्षरक्षणम
112	V. Sunitha	శ్రీమద్భగవద్గీత -సమతాగానము
113	V.D.T. Sundareswar	कौटिलीयार्थशास्त्रे विद्याव्यवस्था
114	Vighatra Mohan	-
115	Vimalesh Dwivedi	आश्रमाः

In Public domain. Digitization Muthulakshmi Research Academy

Contents

संस्कृतम् पृष्टसंख्या

1. पुरुषार्थपालनम् – 1-5

डा वि. ए. कुमारस्वामी

2. स्वामिसमर्पणानन्दविरचितकायकल्पपरिप्रेक्ष्ये वर्णाश्रमव्यवस्था – 6-14

डा.विद्यानन्द आर्यः

3. छान्दोग्योपनिषदि समाजश्रेयसे आश्रमधर्माः– 15-18

डा.अनुपमा र्याली

4. कृष्णयजुर्वेदे विज्ञानम्– 18-24

डा .कुप्पा श्रीनिवासशास्त्री

5. भारतीय संस्कारेषु पारलौकिकक्रियाणां महत्त्वम् – 24-28

श्री .जि. शिवप्रसादशर्मा

6. कालानुगुणं संस्कृतव्यवहारपदनिर्माणम् – 29-32

श्री. के. आञ्जनेयुलु

7. प्राचीनस्वाध्यायप्रवचन प्रविधयः – 33-38

डा .एस् .एल् सीतारामशर्मा

In Public domain. Digitization Muthulakshmi Research Academy

8. आस्तिकदर्शनानां समाजोपयोगिता – 39-43

श्रीमती के. समीरजा

9. संस्कृतभाषासंरक्षणे संस्कृतभारत्याःयोगदानम् – 44-51

श्री टि. शिवरामकृष्णः

10. पञ्च लकाराणां प्रयोगः उचितः वा न ? – 52-56

श्री एम्. मल्लारेड्डिः

11. अलङ्कारशास्त्रसंरक्षणे औचित्यसिद्धान्तस्योपायभूतत्वम् – 57-61

डा. नागराज् चन्दनाल

12. संस्कृतं सस्कृतिः ओगेटि पण्डितः– 62-64

डा. के गीता

English

13. **Lace Of Yoga In Śaiva Ritual System-** 65-75

Dr. T. Ganesan

14. **Changing Social Role Of Prāyaścitta In Śaiva Sources-** 75-79

. Dr. Sathyanarayana,R

15. **Hindu Judicial System in Ancient Bharata-** 80-85

Dr A . Ananthakrishna Rao

16. **Preservation of Forests-** 85-88

. Smt M. Nirisha

In Public domain. Digitization Muthulakshmi Research Academy

17. **The Four Orders Of Life- A Unique Conception Of The Vedic Culture -** 88-96

Dr. K. Varalakshmi

18. **Role of Sanskrit Literature to The Values Of Indian Culture -** 97-104

. Sri P. Suresh

19. **The Construction of Temples and Images With Reference To the Sukra Niti -** 105-108

Dr. K. Venkateswarlu

20. खं स्वामिनं नरकादुद्धरन्ति - 109-115

Ms Jyotikala. N.

21. **Temple Culture**

The Andhra Pradesh Charitable and Hindu Religious Institutions and Endowments Act, 1966.- An wareness- 116-122

Aparna Sathe

22. **Astrological Conceptions in Purāṇa with Special Reference To Agni Purāṇa-** 123-129

Dr. Rallapalli. Venkateswara Rao

23 **The Influence of Sanskrit Language in Regional Languages** 130-133

Smt N.S.Padmavati

Addresses of the Delegates 134-138

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

पुरुषार्थपालनम्

(Four objectives of life)

डा. वि.ए . कुमारस्वामी

संस्कृतसारस्वते धर्मार्थकाममोक्षाः चतुर्विधपुरुषार्थाः मानवजीवने काम्यन्ते इति सर्वत्र प्राचुर्येण अवगम्यते। तत्र तावत् तेषां विशदनिरूपणं वेदशास्त्रेतिहासपुराणादिषु विद्यत एव। तथापि यथामति तेषां स्वरूपं विचिन्तयामः। समाजे तेषां समादरेण सदुपयोगं परिशीलयामः। न केवलं हिन्दूसमाजे अपि तु मानवसमाजे भूमण्डले तेषामवलम्बनेन संस्कृतभाषायाः समुन्नतिः समस्तमानवानां कल्याणं च सम्भवतः इति विचारयामः। ततः परं वर्तमानकाले तेषां दुर्विनियोगमुद्दिश्य विवरणं कुर्मः। पुरुषार्थानां क्रियायोगः मानवजीवितसमन्विताः समस्याः परिष्करोति इति च विविच्य ज्ञातुं यतामहे। अन्ततो गत्वा भारतदेशस्य प्रजानां हिताय, देशभक्तिवर्धनाय, जातीयताभावप्राबल्याय, संस्कृतभाषामाध्यमचिन्तनाय चावश्यं पुरुषार्थचतुष्टयस्य बोधनमाचरणद्वारा भवेत् भूयादितिचाशास्महे। यत् पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः गृहारामवसनभूषणादयश्च पदार्थाः कमनीयाः सर्वे अर्थशब्देन व्यपदिश्यन्ते। अर्थसंग्रहणेन मनुष्यः आत्मानं भयरहितं सुरक्षितं च मनुते। अर्थस्य अधिकसम्पादनेन अर्थहीनान् जनान् दासान् कर्तुमीष्टे च।

अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचिद्। अंतोर्थाय यतेतैव सततं यत्नमास्थितः।।

धान्यं पशवः हिरण्यमिति जीवनायात्यन्तमुपयुक्ताः पदार्थाः। पुरा बहुविधधान्यविनिमयेन परस्परं जनाः सुखिनस्सन्तः जीवनयात्रामकुर्वन्। ततः परं क्रयणाय विक्रयाय च पशवः विशिष्य गावः उपयोगे समागताः। तत एव गोधनानि इति व्यवहारः आसीत् पुराणकाले। ततः परं सर्वेषां वस्तूनां स्थाने रूप्याणि, रूप्यकाणां स्थाने नाणकानि, तेषां स्थाने सर्वकारमुद्रापितपत्राणि च प्रचलितानि सन्ति। आर्थिकबलेन मानवः सुखभोगाय यतमानः स्त्रियः कामयितुं प्रवृत्तः। स्त्रीणां संरक्षणाय तासां कामपूरणाय च कामनां कुर्वन् कामनामानं पुरुषार्थं पुरुषः अवागच्छत्। तदा अर्थस्य कृते कामनां कुर्वाणः अर्थं प्रधानं परुषार्थममन्यत। अस्तु, कलहो मास्तु इति कृत्वा अर्थकामौ पुरुषार्थौ इत्येव मनुजः निश्चयं चकार।

"कुर्वते कर्म भोगाय, कर्म कर्तुं च भञ्जते" इति वेदान्तपञ्चदशीप्रोक्तरीत्या कामान् पूरयितमर्थमीहते, मनुष्यः, अर्थं सम्पादयितुं च कामं करोति। अर्थविषयकः कामः विद्यते कामप्रयोजनः अर्थश्च भवति अनयोः अन्योन्यप्रीतिमत्वं परस्परसहकारित्वं च विदितमेव कश्चित् पुरुषः अर्थमेव प्राणपदं प्राणप्रदं च चिन्तयन् स्त्रियः बाधां जनयति क्लेशयति, अन्यश्च स्त्रियः सुखं विन्दन् अर्थ विषये स्वार्थपरस्सन् कुटुम्बकलहकारणं भवति । अतो हेतोः तयोः समप्राधान्यं निभालयितुमौचित्यं पालनीयम्। यदौचित्यं यस्यानुसारोण कर्तव्यताबुध्दिः निरूढा तद् धर्मपदेनाभिधीयते । धर्मशब्दश्च संस्कृते नुपुंसकलिङ्गेऽप्यस्ति । तानि धर्माणि प्रथमान्यासन् इति वेदवाक्यं प्रमाणम् । तत्र शीतस्पर्शवत्यापः इत्युक्तौ जलस्य शीतस्पर्शः धर्मम् । तर्हि पुंलिङ्गशब्दः कुत्र प्रयुक्तः तस्यार्थः कः इत्युक्तौ प्रप्रथमधर्मशास्त्रे मनुस्मृतौ तस्य लक्षणं प्रोक्तं ।

विद्वद्भिः सेवितः सद्भिः नित्यमद्वेषरागिभिः।

हृदयेनाभ्यनुज्ञातः योधर्मस्तं निबोधत।।

In Public domain. Digitization Muthulakshmi Research Academy

अस्योपयोगः कुत्र इत्युक्तौ सत्रे भुक्तिः मठे निद्रा इति लोकोक्तिः ज्ञातव्या। सत्रे नाम धर्मसत्रे इत्यर्थः। पुरा सर्वत्र ग्रामेषु अन्नविक्रयं पापाचरणं मत्वा निश्शुल्कमतिथिभ्यः भोजनमदीयत। तत्र धर्मशब्दः दानमन्नस्य द्योतयति। तेलुगुभाषायां सत्रशब्दः अन्नदानशालावाचकः। भिक्षुकः धर्मं चेय्यंडि बाबू इति प्रार्थयन्ते। तत्रापि दानमर्थः अत्र चेय्यंडिबाबू इति प्रार्थयन्ते। तत्रापि दानमर्थः। अत्र रूप्यकानां वस्त्राणां च दानमर्थः।

कश्चन जाल्मः परस्त्रियः बलात्कर्तुमीहते तदा तस्य दण्डः भवति तत्र दण्डः यदा उचितः स धर्म इत्युच्यते। तत्र दमः नाम गुणः धर्मेण संवळितः भवति। भिक्षुकाय यत्किमपि दीयते। दया चात्र धर्मे अन्तर्गता भवति। यथा परस्त्रीषु प्रवृत्तौ दण्डे सति धर्मस्य अनुसारेण, दमः कामस्य अपेक्षितः, तथा अत्यधिकधनार्जने सति आयकरः अपि अर्थविषये दममपेक्षितं विदधाति।

एवमर्थकामयोः निग्रहाय सदुपयोगाय च धर्मः आवश्यकः सञ्जातः। तस्य धर्मस्य च पालनेन समाजः सुष्टुरूपेण चलति। धारणात् धर्ममित्याहुः इति लक्षणं प्रातिस्विकस्य पुरुषस्य साधुवर्तनं भावयति, येन समाजः सुखी भवति, यतः बहूनां जनानां समवाय एव समाजः।

अत्रेदमवधेयम् हृदयेनाभ्यनुज्ञातः इत्यस्य भावार्थः अयं भवति यत् यस्य हृदयं स्वत एव अकार्यकरणे प्रतिबन्धं सूचयति, अभ्यनुज्ञां न ददाति तदनुरोधेन सः स्वयमेव स्वं निगृह्णाति सर्वकारात् दण्डमनपेक्ष्य सः सन् सज्जनः सत्पुरुषः इत्युच्यते। अत एवोच्यते धर्मस्य तत्त्वं निहितं गुहायां इति गुहशब्दस्य दहराकाशः हृदयमेवार्थः। हृदन्तर्गतस्य देवस्य प्रेरणा, तत्पूर्वं धर्माधर्मज्ञानं च स्वत एव सम्भवति। तद् विदन्त एव विद्वांसः, ये परधनेषु परस्त्रीषु च स्वत एव निरता न भवन्ति। रागानुरोधेन मनोरथपूरणाभावे तन्निमित्ते जने द्वेषः भवति, तादृक्द्वेषः अपि येषां न भवति त एव वस्तुतः पण्डिताः। अस्मिन् विषये यो देवस्सवितास्माकं धियो धर्मादिगोचराः प्रेरये तस्य यद्वर्गः तद्वरेण्यमुपास्महे ।।इति

मातृवत् परदारेषु परद्रव्येषु लेष्ठवत्। आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः।।

इति श्लोकश्च प्रमाणं भवतः। समग्रं वाल्मीकिरामायणं प्रथमश्लोकस्योदाहरणप्रायमिति, मया तेलुगुभाषायां रचिते अन्तरात्मपिलुपु इत्याकारके ग्रन्थे निवेदितम्। ततश्च विदितमिदं भवति यद् अर्थकामयोः उपप्लुतयोः निग्रहः स्वयमेव क्रियमाणः धर्मपदस्यार्थः।

तस्य त पर्यन्ते आत्यन्तिकतया आत्मवत् सर्वभूतेषु दर्शनमेव महत् प्रयोजनम्। तदात्मदर्शनमेव सर्वत्र चराचरसृष्टौ मौक्षप्रदस्यार्थः। यावत् नरः परपीडामात्मपीडावत् मन्यमानः परहिंसायां न प्रवृत्तौ भवति स खलु धर्ममाचरति यतः अहिंसा परमोधर्मः इत्युक्तं शास्त्रेण एवं धर्ममाचरन् पुरुषः चित्तशुद्धिं विन्दति। चित्तशुद्धेश्च हेतुभूतं धर्माचरणम्। चित्तशोधनं विना अविद्यनाशः न भवति उक्तं च अविद्यानाशेन केवलं मोक्षः प्राप्यते , चाणक्यस्यार्थशास्त्रे

आत्मा न शुद्धेत हि धर्मनिष्ठाम् विनात्मशुद्धिं न वियात्यविद्या ।अज्ञाननाशेन विना नराणाम् असम्भवः स्यादपवर्गलाभः ।

अपवर्गः नाम मोक्षः एवं चत्वारः पुरुषार्थाः निष्पन्नाः। अधुना अर्थ कामधर्ममोक्षा इति समासः कुतो न कृतः केचित् प्रथमद्वयं, परे अपरं द्वयं च स्वीकुर्वन्तु नाम इति प्रश्नः उदितः। धर्मानुसारेणार्थकामयोः अनुष्ठाने मोक्षमार्गः सुगमः इति समाधानम्।

In Public domain. Digitization Muthulakshmi Research Academy

अर्थः धर्माय विनियोज्यः इति सूचयितुं धर्मार्थयोरेकत्र कामः(कामना) मोक्षाय कल्पताम् इति सूचयितुं काममोक्षयोरन्यत्र च संयोगः कल्पितः इति केचित् व्याचक्षते। भवतु । सविषय आनन्दः कामः निर्विषयस्तु मोक्ष इति तयोः आसन्नता इति केषाञ्चिद्वचः।

अस्तु धर्मार्थकाममोक्षाणां हिन्दूसनातनधर्मे केन्द्रबिन्दुस्थानमनपास्यम् तथाहि कृतयोगे ज्ञानं(मोक्षः)त्रेतायां धर्मः द्वापरे अर्थःकलौ काममात्रम् इति चतुर्युगव्यवस्था सम्पन्ना। ज्ञानसंरक्षकाः ब्राह्मणा भवेयुः धर्मरक्षकाः क्षत्रियाः अर्थपरायणा वैश्याः कामतत्पराः केवलं शूद्राः इति वर्णव्यवस्था मोक्षाय ब्रह्मात्मज्ञानाय च सन्न्यासः तदर्थं पूर्वरङ्गः वानप्रस्थः धर्मार्थकामसमुपभोगाय गृहस्थाश्रमः तस्य पूर्वरङ्गः तदर्थकविद्यार्थित्वं ब्रह्मचर्यमिति चाश्रमाणां परिगणनम्। वेदे संहिताभागः ब्रह्मचर्यवत्, ब्रह्मणभागः गार्हस्थ्यवत्. आरण्यकभागः वानप्रस्थवद् उपनिषद्भागः सन्न्यासवद् इति च वेदविभागश्च सामानाधिकरण्यं नीतःआश्रमैः साकम् षोडशसंस्काराः पूर्वोक्तात्मविशुद्धये उपयुज्यन्ते। आचारनियमैस्साकं विवाहव्यवस्था धर्मानुसारेण कामसंरक्षायै कल्पते। आर्थिकव्यवस्था, न्यायव्यवस्था राज्याङ्गव्यवस्था च भारते पुरुषार्थानुगणतया यावत् न युज्यन्ते तावत्कालपर्यन्तं भारतदेशस्य भ्रष्टाचारकृतक्षोभः सुखशान्तिरहितं जनजीवितमुपद्रवभरितं तनोति।

महेकवेः कालिदासस्य श्लोक एकोऽलं सर्वान् ज्ञपयितुम्।

स्थित्यै दण्डयतो दण्ड्यान् परिणेतुः प्रसूतये। अप्यर्थकामौ तस्यास्ताम् धर्मायैव मनीषिणः।।

अत्र स्थितिः नाम धृतिः अर्थात् धर्मरक्षणाय दण्डनीतिः प्रयोज्या इत्यर्थः। तत्र च अहिंसा परमोधर्मः इति वचनं नानुबध्नाति। बहुलधनैः कोशागारं पूरयितुं वारं वारमल्पस्याप्यपराधस्य हेतोः करः न नियुक्तः इति चार्थः कविकुलगुरोरभिप्रेतः। यथा च चाणक्येनोक्तम्। अर्थस्य मूलमिन्द्रियजयः, इन्द्रियजयस्य मूलं विनयः विनयस्य मूलं वृद्धोपसेवा, वृद्धोपसेवामूलं विज्ञानम् विज्ञानस्य मूलमात्मज्ञानम्। विज्ञानद्वारा आत्मज्ञानं साध्यमिति भावार्थः। तथा च न केवलं भारतस्य अपि तु सर्वस्य भूतलस्थितस्य मानवस्य समादरणीया पुरुषार्थविचारधारा। एतेन मानवः इहामुत्रसुखं विन्दति। आत्मसाक्षात्कारमधिगच्छति येन हेतुना च स्वजन्मसार्थकतां भजति। तथाहि कशेरुका, तिर्यक्तया चलति तिरश्चां, मनुजानां पुनः ऊर्ध्वमुखतया उर्ध्वलोकयानं गमयति। एतमर्थं मनसि निधाय चारुचर्यापरायणाः धर्माचरणेन अर्थकामसम्पादनं कुर्वन्तः सुखं विन्दन्तु लोकाः इद च जीवनविधानं समेषां भूप्रजानां कृते उपयुज्यते न केवलं हन्दूमतवर्तिनां क्रैस्तवा अपि असत्यकथने CONSCINCE PRINKS इति कथयन्ति। ईश्वरः पशुपतिः कथितः स च good shepeard इति तैः उच्यते । भानुवासरः यथा भारतीयानां तथा क्रैस्तवानामपि पवित्रदिनम्। अल्लाशब्दः मातृवाचकः संस्कृतभाषायां। मातरं प्रकृतिं पूजयन्त महम्मदीयाः चन्द्रकलासामाद्रियन्ते। चन्द्रकलासमाराध्यते सनातनधर्मपरायणैः शिवशिरसि, अम्बायाः शिरसि सरस्वत्याः शीर्षे गणेशचतुर्थीदिने च। महम्मदीयानां सूफीतत्वराद्धान्तः अद्वैतवेदान्तमार्गसङ्काशः केवलं जीवनयात्रानिर्वाहे आचारविचारस्थापनाय मनुव्यासवाल्मीकिवचसां गौरवं प्रदातुं संस्कृतभाषाध्ययने हानिः नास्ति लाभ एव भविता।

वर्तमानकाले चतुर्विधपुरुषार्थानां व्याख्येन अनुष्ठाने च दुर्विनियोगः संस्कृतभाषाक्रमशिक्षणराहित्यस्य दुष्परिणामं घोषयति। तथा हि seculer state धर्मनिरपेक्षराज्यमिति अनुवाद एव अनर्थमूलः। सर्वमतसमान इत्येव तस्य

In Public domain. Digitization Muthulakshmi Research Academy

अभिप्रेतः अर्थः। धर्मशब्दश्च न Religion पदप्रयोगः वस्तुतः न कश्चित् अधर्मं वांछति, भ्रष्टाचारः सन् बहुधनसञ्चयं कृत्वापि कश्चित् स्वपुत्रान् न्यायवर्तनात् सुजनानेव भावयितुमीहते। समधिकतरधनमदविह्वलाः केचनाथवा बहवः पाश्चात्याः भारतीयजीवनपद्धतिं श्लाघन्ते। राज्याङ्गव्यवस्था न्यायव्यवस्था च पालनव्यवस्थया साकं सत्यमेव जयते इति वाक्यं वस्तुतः यदि मानयन्ति तर्हि धर्मेण विरोधः नास्त्येव। सत्यं वद धर्मं चर यद् वचसा प्रोक्तम् तस्यैवाचरणे धर्मपदेन व्यपदेशः। अनृतवादी अपि ब्रूते अहं यदि वदामि तद् सत्यमिति ।अर्थात् सोऽपि सत्यं मानयति , किन्तु हृदि ऋतमिति पदेन सत्यात् पूर्वतनं रूपं तदनुसारेण न वक्ति करोति च त्रिकरणशुद्धिपूर्वकत्वमर्थात् मनसा वाचा कर्मणा अकारत्वमेव सज्जनस्य (धार्मिकस्य) लक्षणम्। धर्मनिरपेक्षपदेन चात्मवञ्चना कल्पिता। तस्मादात्मविश्वासरहिता जनता दुर्बला जाता। असहायतया सर्वत्र अन्यान्यमार्गैः अर्थार्जनाय असत्यलोलुपा जाता। न्यायस्थानेषु भगवद्गीतां प्रमाणयन्तः स्वस्यान्तः करणस्य व्याघातं जनयन्ति तेन पापपङ्कसङ्कुलाः क्लेशभाजः भवन्ति बहवोजनाः।

संस्कृतभाषायाः सुष्टुसंस्कारपूतं ज्ञानं विना विनोबाजी महोदयः गीताप्रवचने स्वयमतिप्रगल्भः अभवत् यदि परशुरामः अनेकशतक्षत्रवधमकृत्वा स्वयमात्माहत्या स्वयमात्महत्या मकरिष्यत तर्हि , साधु अभविष्यत् इति न हन्यते हन्यमाने शरीरे इति तत्त्वसिद्धान्तमुपदिश्य श्रीकृष्णः अर्जुनं दुष्टसंहारार्थमचोदयत्। अन्यथा सोऽपि अर्जुनं स्वहत्यां कुरुष्व यतो हि आत्मा अजरामरः. त्व न मरिष्यसि इत्याकारकोपदेशं अकरिष्यत्। तथा नावदत् खलु। एतेन असंस्कृतमतीनां संस्कृतग्रन्थेषु अनावश्यकप्रसङ्गः देशस्य हानिकरः कालः सञ्जातः इति निश्चप्रचम् । मौलिकं बैबिलग्रन्थं सम्यक् परिज्ञातुं क्रैस्तवमतप्रवक्तारः हिब्रूभाषामधीयते। तादृशं क्लेशं संस्कृतभाषाध्ययनायानावश्यकं कृत्वा यः कोऽपि गीतादिहिन्दूसनातनधर्मग्रन्थान् व्याख्याति स दण्डनीयः। किन्तु तादृशजनः अद्यत्वे माननीयो जायते ।

कुमारीणां पितुः रक्षणाभावे ताः वेश्यागृहेषु विक्रीयन्ते। यदि भर्ता न रक्षति यौवने तर्हि सा युवभिः पथि पथि पराभूयते । वार्धके यदि न रक्षति पुत्रः तर्हि अगतिका भिक्षार्थिनी द्वारं द्वारमटेत्। तस्मात् मनुस्मृतेः श्लोकः समादरणीयः स्त्रीरत्नैः। किञ्च सत्यनारायणपूजादिषु धर्मार्थकाममोक्षचतुर्विधपुरुषार्थसिध्यर्थं मम पुत्रिकायाः विवाहसिध्यर्थं कुमारस्य पदव्यां प्रगतिप्राप्त्यर्थं षोडशोपचारपूजां करिष्ये इति वदन्ति। अत्र काम्यकर्मसु मोक्षपदाभिधानं वर्जनीयम् । देहो देवालयः प्रोक्तः देवो जीवः सनातनः त्यजेदज्ञाननिर्माल्यं सोहं भावेन पूजयेत् । इति वाचा ब्रुवन्ति । पापोऽहं पापकर्माहमित्याकारकः श्लोकः कस्मादत्र प्रोच्यते । यानि कानि च पापानि जन्मान्तर कृतानि च तानि तानि प्रणश्यन्ति प्रदक्षिणपदे पदे इत्युच्चार्य प्रदक्षिणानि कृत्वा पश्चात् पापोऽहं पापकर्माहमिति श्लोकः कस्माद्धेतोः उच्चारणीयः। आश्रमाणां विषये आपस्तम्बः सन्न्यासादनन्तरं वानप्रस्थः भवेदिति स्वाभिप्रायं प्रकटयति। कस्मात् वानप्रस्थो भूत्वा पश्चात् सन्न्यासं स्वीकृत्य ग्रामैकरात्रिवसतिः कुत्र कर्तव्या। अस्तु कुटीचकबहूदकहंसपरमहंसपरिव्राजकावधूतनामानः षट्प्रकारकाः सन्न्यासिनः सन्ति। तेषां मध्ये हंसपर्यन्तसन्न्यासिनां शिखोपवीतहानिः नास्ति। तर्हि अत्र विमृश्यते चेत् शिखोपवीतधारिणः केचन सन्न्यासिनः कुतः परमहंसपरिव्राजका इति नाम्ना प्रथन्ते। अपि च शङ्कराचार्यपरम्परानुगाःशिखोपवीतपरित्यागिनः सन्तः कुटीचकवद् बहूदकवद् अथवा तदपेक्षया अवराः अधमाश्च सन्तः धनादानाय कोशागारं व्रजन्ति स्वयंपाकमथवा पत्नीदत्तं भुञ्जते। किमेतद् साधु? कलौ वेदान्तिनस्सर्वे इत्युक्तप्रकारेण

In Public domain. Digitization Muthulakshmi Research Academy

केचित् गीतायोगवासिष्ठादिग्रन्थप्रवचनपटवः विडम्बनां प्रकटप्रसिध्दिं च वाञ्छन्तः जनतां प्रतारयन्ति। बहवः जनाः आत्मादोषाननङ्गीकुर्वन्तः निष्कामकर्मयोगमवलम्बमानाः तत्रासमर्थाः सन्तः सीदन्ति। न खलु निष्कामकर्मयोगः साध्यः। स तु साधनभूतः सांख्ययोगस्य अपरे केचन स्थितप्रज्ञत्वमापन्ना वयमिति मन्यन्ते। सर्वमेतदनुचितं संस्कृतभाषाभ्यासाभावात् स्वतन्त्रतया मनुव्यासवाल्मीकि ग्रन्थानभ्यासाच्च भवतितराम्। मूलकारणं सर्वेषां संस्कृतभाषानभ्यासः। स च शीघ्रं परिहरणीयः। पुराणवैराग्यम् प्रसूतिवैराग्यम् स्मशानवैराग्यमिति वैराग्यत्रयं तात्कालिकमिति लोकोक्तिः विद्यते। तादृशं तात्कालिकं वैराग्यमपि T.V प्रेक्षकानाम् जनानां जायते वा नैव कस्मात् यथा चलचित्रादिकानि तथा गीताप्रवचनादीनि दृश्यमानानि श्रूयमाणानि आत्यन्तिकं महत् फलं न जनयन्ति। सत्कालक्षेपफलं परिमितं कल्पयन्ति । अयं प्रायोवादः मदीयः मादृशानां च दूरदर्शनप्रवक्तृणां प्रेक्षावतां निन्दनाय न प्रवृत्तः किन्तु धर्मार्थरामममोक्षेषु ब्रह्मचर्यं गार्हस्थ्यवानप्रस्थसन्यासेषु कुत्र किमालम्ब्य कीदृशी योग्यता ममेति समुचितं न किन्तु अनुचितं फलं कल्पयेत्। इति विवक्षितमत्र प्रस्तुतम्।। पुरुषार्थानां क्रियायोगः मानवजीवनसमस्याः परिष्करोति । तथाहि पदवीनिवृत्ताः पौराः वयं वनप्रस्थाः अथवा तत्संकाशैः अस्माभिः भवितव्यमुदासीनैः कुटुम्बव्यवहारेषु, यतो हि मुमुक्षुभिः भाव्यम् । इति चिन्तयेयुः। तर्हि कुटुम्बकलहाः शाम्यन्ति।

मनुस्मृत्यनुसारेण वयं चरामः इति चिन्तनपराः स्त्रियः यदि धनार्जनं कुर्वीन्ति धनं भर्तुः हस्तयोः दद्युः। तदा स्पर्धानसूयामतिप्राबल्यात् विवाहबन्धविच्छेदः न भवितुमर्हति। मातृपितृसेवा सर्वदा अस्माकं परमकर्तव्यधर्मः इति वदन्तः धर्मनिर्वहणाय पाश्चात्यदेशस्थिताः पुत्राः अवश्यं भारतदेशं प्रति प्रतिनिवर्तेरन्। आसेतुशीताचलं समस्तदनसन्दोहसाधारण धर्मसंस्कारः संस्कृतभाषाभ्यासेन विधिवत् बाल्यकाले मातापितृभ्यामापादितः भारतदेशभक्तिं समग्रभारतजनता-हृदयैकमत्यं च सम्पूर्णतया जनयेत्, येन प्रजाः सर्वाः देशगौरवरहिता पाश्चात्यदेशं प्रति न प्रवसेयुः यदा बाल्ये एव मनुव्यासवाल्मीकिवाङ्मये शिक्षितो भवति भारतीयः तदा आंग्लेयादि बहुपाश्चात्यभाषाः हेलया शिक्षितुं समर्थो भवति। यतोहि अनेकसहस्त्रपदानि संस्कृतभाषातः आंग्लभाषायां सम्मिलितानि। तानि आदाय आंग्लभाषाशिक्षणे आंग्लव्यामोहः शाम्यति पाश्चात्यव्यामोहश्च निवारितो भवति।

यत्र नार्यस्तु पूज्यन्ते पूज्यन्ते तत्र देवताः। श्रियः स्त्रियश्च गेहेषु न विशेषोऽस्ति कश्चन ।।

इति मनुस्मृतिमवलम्ब्य स्त्रीषु नितरां गौरवप्रदर्शनेन भ्रष्टाचाराणां मूलकारणभूतः कामोद्वेगः निरस्तो भवति।। केवलाघो भवति केवलादी इति वेदवाक्यं भुञ्जते ते त्वघं पापा ये पचन्ति आत्मकारणात् इति गीतावाक्यं मनुप्रोक्तं गृहस्थधर्मं चाकलयतामर्थसंग्रहेच्छा परपीडनेच्छा च सत्वरं शाम्यतः।

अयाचितानि देयानि सर्वद्रव्याणि भारत । अन्न विद्या तथा कन्या अनर्थिभ्यो न दीयते ।।

इत्याकारकं महाभारतश्लोकं चिन्तयतां परिपालयतां च कस्मिन्नपि प्रान्ते भूमण्डले विद्यार्जनविषये विवाहविषये च समस्याः न भवन्ति । वरविक्रयो वा कन्याशुल्कं वा नैव भवति।

यावत् भ्रियेत जठरं तावत् स्वत्वं हि देहिनः। अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति ।।इति

मनुप्रोक्तसनातनधर्मानुष्ठानेन भ्रष्टाचारः नाशमेष्यति इति जानीमः प्रतिजानीमश्च। विद्याविधाने संस्कृतभाषायाः प्राधान्यं कल्पनीयम् येन जनानां चिन्तने समुचितपरिवर्तनं भवेत् श्रेयोऽभिमुखीमतिश्च देशस्य समुद्धाराय कल्पेत ।।

 In Public domain. Digitization Muthulakshmi Research Academy

स्वामिसमर्पणानन्दविरचितकायाकल्पपरिप्रेक्ष्ये वर्णाश्रमव्यवस्था

डा. विद्यानन्द आर्यः

स्वामिसमर्पणानन्दमहाभागाः (पण्डितबुद्धदेवविद्यालङ्काराः) सुप्रसिद्धाः वेदविद्वांसः अविद्यन्त। तेषां जन्म मुद्गलगोत्रब्राह्मणपरिवारे चतुर्नवत्युत्तराष्टादशशततमे वर्षे अगस्तमासस्य प्रथमदिनाङ्के देहरादूनन्तर्गते कौलागढनामके स्थाने समभवत्। एषां जनकः महर्षिदयानन्द-स्वामिनां विचारैः प्रभावितः एतान् सप्तमे वर्षे स्वामिश्रद्धानन्दस्थापितकाङ्गडी गुरुकुलं प्रेषितवान्। एते अध्ययनकाले संस्कृतसाहित्येन वैदिकसाहित्येन च साकं आंग्लसाहित्यस्यापि गहनमध्ययनम् अकुर्वन्। निजजीवने सहस्रशः व्याख्यानानि कृतवन्तः। प्रखरवक्तृत्वेन दिग्गजवैदुष्येण च सह रहस्योद्घाटकलेखकत्वेन ख्यातिं प्राप्ताः ह्येते पञ्चविंशतेरधिकान् महत्प्रसिद्धान् ग्रन्थान् अलिखन्।

वैदिकवर्णाश्रमव्यवस्थायाः एते उत्कृष्टाः व्याख्यातारः अवर्तन्त। वर्णाश्रमव्यवस्थायाः वैदिकस्वरूपं समाजस्य पुरतः स्थापनाय एते वर्णाश्रमसंघं स्थापितवन्तः। वर्णाश्रमसंघस्य विधानं निर्माय तस्य शासनपरिषदमपि रचितवन्तः। स्वामिनः काङ्क्षन्ते स्म यत् वर्णाश्रमसंघस्य शासनपरिषदः द्वारा वैदिकसमाजस्य वैदिकराज्यस्य च प्रवर्तनं भवतु इति येन संसारः द्वेषघृणासन्तोषाशान्त्यज्ञानान्यायाभावेभ्यः मुक्तः सन् सुखी भवतु। वर्णाश्रमव्यवस्थारूपस्य सामाजिकविधानस्य समर्थने कायाकल्प इति ग्रन्थं रचितवन्तः। पुस्तकमिदं महत्प्रसिद्धिं गतम्। अस्मिन् पुस्तके वैदिकवर्णाश्रमव्यवस्थायाः वैज्ञानिकस्वरूपः सम्यक् उपस्थापितः।

वर्णाःचत्वारः ब्राह्मणक्षत्रियवैश्यशूद्ररूपाः। आश्रमाः चत्वारः ब्रह्मचर्यगृहस्थ - वानप्रस्थसंन्यासरूपाः। वर्णाश्रमधर्मः भारतीयसंस्कृतेः आधारभूतः। अयं न केनापि देशेन समाजेन सम्प्रदायविशेषेण वा सम्बद्धः। अस्य नियमाननुसृत्य वर्तनेन मानवानां समेषां मङ्गलं सम्भवम्। मानवाः अनेन धर्मेण सर्वविधशत्रुभिः सुरक्षिताः सन्तः आनन्दमनुभवितुं शक्नुवन्ति। मानवानां त्रिविधाः शत्रवः सम्भवन्ति– आधिदैविकविपदः– अतिवृष्ट्यनावृष्टिभूकम्पादिरूपाः, आधिभौतिकविपदः सर्पवृश्चिकमषकादिरूपाः,आध्यात्मिकविपदः– अज्ञानस्वार्थविक्रोशालस्या-भावाश्चेति। आधिदैविकशत्रुभिः योद्धुं शक्नुवन्ति मानवाः उत्तमाचरणैः विपदां

In Public domain. Digitization Muthulakshmi Research Academy

यथाशक्तिप्रतीकारेण च। आधिभौतिकशत्रुभिः योद्धुं शक्ताः भवन्ति विध्वंसकशक्तयः उपकारिण्यः यथा भवेयुः तथा यत्नेन, यदि च उपकारिण्यः न सम्भवन्ति चेत् तासां विध्वंसेन।

संसारे मानवाः विशेषतः आध्यात्मिकशत्रुभिरेव अज्ञानस्वार्थविक्रोशालस्याभावैः पीडिताः दुःखिताश्च लक्ष्यन्ते। एतेषां नाशः एव क्लिष्टतरः। इह एतेषाम् आध्यात्मिकशत्रूणां किंचिद्विवरणम् अपिक्षितम्। ज्ञानसदृशं पवित्रं संसारे किमपि नास्तीति भगवान् व्यासः ब्रूते अर्थात् अज्ञानसदृशमपि किमप्यपवित्रं नास्तीति ज्ञातव्यम्। मानवानां अन्यापेक्षया अज्ञानमेव महान् शत्रुः। स्वभावेन दुष्टाः परपीडया आनन्दमनुभवन्तः जनाः संसारस्य अनिष्टं कुर्वन्त्येव। ज्ञानाभावे अज्ञानेन संसारस्य हितं कर्तुमीहमानाः अपि जनाः संसारस्य अनिष्टं विदधति। ये सत्यस्यप्रकाशं कुर्वतः विज्ञानिनः मारितवन्तः ते समाजस्य विज्ञानिनां च हितमेव साधयामः इति विचारयन्तः अवर्तन्त। स्वार्थविक्रोशालस्याभावाः अन्ये आध्यात्मिकशत्रवः अज्ञानमूलकाः एव।

वर्तमानसमये संसारे या अशान्तिः दुःखं पीडादयः लक्ष्यते तेषां कारणं मानवसमाजसंगठनसम्बन्धि अज्ञानमेव। अद्य पृथिव्यां कोटिशः जनाः दुर्भिक्षव्याधिपरिच्छेदाभावपरस्परघातैश्च पीडिताः। एकतः लक्षशः मनुजाः अन्नस्य प्रतिकणं प्रति लालायिताः अपरतश्च अपरिमितम् अन्नं वृथाक्रियते। अनेन ज्ञायते यत् मानवसमाजः पदार्थानाम् अभावेन न पीडितः अपितु विद्यमानपदार्थानांम् असम्यक् विभाजनेन त्रस्तः इति।

पदर्थानां सम्यक्विभाजनविषये चर्चायाः पूर्वं पदार्थानां विषये किंचिद्विश्लेषणीयम्। मानवोपयोगिनः पदार्थाः संसारे द्विविधाः सम्भवन्ति -आलम्बनपदार्थाः अनुबन्धपदार्थाश्चेति। यैर्विना जीवनं न सम्भवं ते आलम्बनपदार्थाः, यथा- ज्ञानम् आहारः परिच्छेदः (वस्त्रनिवासस्थाने) चिकित्सा च। कस्मिन्नपि राष्ट्रे प्रत्येकं श्रमं कुर्वाणः मनुष्यः एतान् पदार्थान् अवश्यं प्राप्नुयात्। यः श्रमं कर्तुं न इच्छेत् सोऽपि श्रमं यथा कुर्यात् तथा प्रयत्नः विधेयः। यैर्विना अस्माकं जीवनं सम्भवति तथाविधाः अनुबन्धपदार्थाः, यथा- उत्तमसंगीतचित्रकलाभोजनादीनि। एतान् पदार्थान् सर्वे यथासम्भवं प्राप्नुयुः चेत् साधु नोचेत् केनापि कारणेन नापि सर्वे मानवाः एतैः सहिताः स्युः तथापि समाजः सम्यक् प्रचलत्येव।

Public domain. Digitization Muthulakshmi Research Academy

कस्यापि वस्तुनः उपयोगस्य स्वतन्त्रता यावती भवति तावानेव अधिकारः जनस्य गण्यते। समाजे अधिकारविभागः एवं भवतु येन सर्वे मानवाः अपेक्षितरूपेण आलम्बनपदार्थान् प्राप्नुवन्तऑढक्रृ अनुबन्धपदार्थानपि यथासम्भवं अनुभवन्तः अविद्यां नाशयन्तः ज्ञानवृद्धिं कुर्युः। अद्य कोटिशः जनाः बुभुक्षिताः वस्त्रनिवासहीनाश्च दृश्यन्ते। अत्र न पदार्थानाम् अल्पता कारणभूता यतः विपण्यः वस्तुभिः पूरिताः पृथिवी च सामर्थ्ययुता। पुनरपि पदार्थानाम् अलभ्यता मानवानाम्। अधिकाराणाम् असम्यक् विभाजनमेव अत्र कारणम्।

अधिकारविभजनं केन आधारेण भवतु येन पदार्थानां वितरणं मानवेभ्यः सुष्ठु भवतु इति विषये वर्तमानकाले सामान्यतः पक्षद्वयं प्रचलितम्– जन्माधिकारवादः श्रमाधिकारवादश्च। जन्माधिकारवादिनां वादः यत् परमेश्वरः मानवं यस्मिन् कुले उदपादयत्, तस्मिन् कुले जन्मनः ग्रहणेन मानवः पितुः अन्येषां च पूर्वजानां सम्पदः अधिकारी जायते इति। अयं जन्माधिकारवादः एव सर्वासाम् आपदां मूलं वर्तमानकाले। यतः उन्नत्याः मन्त्रद्वयं सम्भवति– भयम् उत्साहश्च। एतन्मन्त्रद्वयमपि जन्माधिकारवादे न भवति। यदा राकफेलस्य पुत्रः सर्वथा निर्भयः स्यात् यत् कस्यामपि स्थितौ मत् मम धनं न कश्चित् आच्छेत्तुं शक्नोतीति मंगतरामचर्मकारे च अयं उत्साहः न स्यात् यत् अहं कदापि उन्नतपदं प्राप्स्यामीति चेत् कथम् उन्नतिः सम्भवा?

श्रमाधिकारवादिनः ब्रुवते– यः जनः यस्य पदार्थस्य उत्पादने श्रमं विहितवान् तस्मिन् वस्तुनि तस्यैव जनस्य अधिकारः। अयं वादोऽपि न समीचीनः। एकेन दृष्टान्तेन श्रमाधिकारिवादः न सम्यगिति अवगम्यते। एकः मनुष्यः आजीवनं श्रमं कृत्वा अर्जितानां ५०००/ रुप्यकाणाम् अधिकारम् एकस्यै विद्वत्सभायै प्रयच्छति पुस्तकालयस्थापनाय। इह सर्वे तस्य कृत्यं प्रशंसन्ति न तु निन्दन्ति। दातुः यशः सर्वत्र प्रसरति। अन्यः कश्चित् स्वार्जितानि ५०००/ रुप्यकाणि अग्नौ क्षेप्तुम् इच्छेति चेत् सर्वे तं निन्दन्ति न तु प्रशंसन्ति। अत्र बोद्धव्यम्– यथा कस्यापि जनस्य शरीरं राष्ट्रस्य सम्पत्तिरूपं तत् कश्चित् न नाशयितुम्

In Public domain. Digitization Muthulakshmi Research Academy

अधिकृतः तथा सम्पत्तिः पदार्थाः वा अपि राष्ट्रसम्पत्तिरूपाः। तेषां नाशाय न कस्यचिदधिकारः। अधिकारस्य प्रश्नस्तु तदा उदेति यदा कश्चित् स्वार्जितस्य दुरुपयोगं कर्तुमीहेत।

उपरिविश्लेषणेन ज्ञायते यत् संसारे सर्वे आवश्यकान् आलम्बनपदार्थान् अनुभवन्तु अनुबन्धपदार्थानपि यथायोग्यम् अनुभवन्तु इति चिन्तनस्य क्रियान्वयनाय न तु जन्माधिकारवादः उचितःन तु श्रमाधि कारवादश्च अपितु सदुपयोगवादः योग्यः। यः कश्चित् सम्पत्तेः पदार्थानां वा अन्यापेक्षया अधिकं सदुपयोगं विदध्यात् सः तेषाम् अधिकारस्य योग्यः। अत्र एकः विषयः विचारणीयः। संसारे सर्वेषाम् अधिकाराणां सदुपयोगस्य क्षमता समा न सम्भवतीति समेषाम् अधिकाराः समे न भवितुं शक्याः। समाजं सर्वतः समं कर्तुमीहमानानामपि जनानां सभायां कश्चित् सभाध्यक्षः सेनायां च सेनाध्यक्षः अवश्यमेव भवति। अनेन स्पष्टं जायते- अधिकारेषु मानवानां साम्यं न कदापि सम्भवति। योग्यताम् उपेक्ष्य जन्मसिद्धाधिकारस्य श्रमसिद्धाधिकारस्य क्रियान्वयनं हानिकरमेव।

योग्यतायाः निर्धारणे जन्मनः श्रमस्य च किमपि स्थानं नास्तीति नावगन्तव्यम्। जन्म श्रमश्च सदुपयोगस्य सम्भावनायां सहायकौ। यः आयुर्वेदम् अध्येति तस्य वंशे यदि आयुर्वेदः पठ्यमानः अवर्तत चेत् अध्येतुः योग्यतायाः विकासः अधिकं सम्भवति। यः पदार्थं निजश्रमेण उदपादयत् तेन पदार्थस्य दुरुपयोगस्य सम्भावना स्वल्पा एव। तथापि अधिकारस्य निर्णायकस्तु सदुपयोग एव। कनिष्ठस्य वरिष्ठस्य भेदस्तु नासह्यः किन्तु निराधारभेदोऽसह्यः।

सदुपयोगस्य सर्वाधिका सम्भावना ज्ञानात्मसंयमयोः संयोगे अनुभूयते। मन्यताम् एका माता निजरुग्णबालं सेवते। बालस्योदरे पीडा विद्यते। सा भित्तौ देव्याः चित्रं निर्माय तत्पुरतः दीपं प्रज्वाल्य बालकष्टं वारयितुमीहते। बालरोगस्तु वर्धते। बालस्य प्रबुद्धा पितृव्या तस्मै औषधं दित्सति परं माता नाङ्गीकरोति। अत्र मातुः अधिकारदुरुपयोगः न सदिच्छाभावेन अपितु अज्ञानेन। सदुपयोगस्य द्वितीयः आधारः आत्मसंयमः। वैद्येनैकः जनः अम्लं न खादेदिति

 In Public domain. Digitization Muthulakshmi Research Academy

निषिद्धः। रुग्णोऽपि वेत्ति न भोक्तव्यम् अम्लमिति परं जिह्वालौल्यात् अत्ति। रोगः वर्द्धते। इह रोगवृद्धौ न ज्ञानाभावः हेतुः आत्मसंयम एव। ज्ञानात्मसंयमयोः सम्यक् समन्वयः जनकः सदुपयोगस्य। एतं मौलिकं सिद्धान्तम् आधारीकृत्य वैदिकधर्मे वर्णव्यवस्थायाः रचना समभवत्।

सदुपयोगेन अधिकारस्योत्पत्तिः भवतु। योग्यतायाः आकाङ्क्षायाश्च भेदः भवतु। एतयोश्च अधिकारस्योत्पत्तेः योग्यताकाङ्क्षयोश्च भेदस्य मेलनेन कौशल-शक्तिप्रतिमान-यथायोग्यदक्षिणारूपसिद्धान्तानां सृष्टिर्जायते। एषां सिद्धान्तानां विवरणमपेक्षितम्। कौशलविषये उच्यते- प्रत्येकं मनुष्यः सर्वविधकार्येषु प्रवीणः न भवति। सामान्यविषयाणां सामान्यज्ञानसहितं जनः कस्मिन्नपि विशेषदिशि प्रावीण्यं प्राप्तुं यतते येन समाजाय सः उपयोगी स्यात्। प्रावीण्यस्य प्राप्त्याः त्रिविधानि समाजोपयोगीनि कर्माणि सूचितानि भारतीयसमाजशास्त्रकारैः।

प्रथमं कर्म प्राकृतिकपदार्थान् शारीरिकश्रमेण बुद्धिकौशलेन च मानवजीवनोपयोगाय योग्यान् निर्माय समाजदरिद्रतायाः दूरीकरणम्। एवंविधकर्मणि कौशलं प्राप्नुवन्तः जनाः वैश्याः इत्युच्यन्ते। द्वितीयं कर्म कामक्रोधलोभादिमानवस्वभावसुलभदुर्बलताभिः जायमानस्य अन्यायस्य बलपूर्वकम् अपाकरणम्। इत्थंकर्म कुर्वाणाः नराः क्षत्रियाः इति कथ्यन्ते। तृतीयं कर्म मानवसमाजाय हितकरं सर्वविधज्ञानं प्राप्तुं अविद्यायाः उन्मूलनार्थं निजसम्पूर्णजीवनस्य यापनम्। ईदृशजीवनं यापयन्तः तपस्विनः ब्राह्मणाः गण्यन्ते। त्रिविधकर्मणां कृते विभिन्नयोग्यताः अपेक्षिताः। आहारनिद्रादिविषयेषु समाः सन्तोऽपि जनाः मात्राभेदेन आवश्यकतानुसारम् आलम्बनपदार्थान् गृह्णन्तः गृहीतविविधमार्गानुसारं यथायोग्यम् अधिकारं प्राप्नुयुः। विशेषज्ञानां साहाय्येन सूक्ष्मान्वेषणपुरस्सरम् अहं किं कर्म कर्तुम् अधिकः योग्यः इति निश्चयं विधाय निजक्षेत्रे विशिष्टं कौशलं जनः प्राप्नुयात्। वर्णव्यवस्थायाः अयं प्रथमः कौशलसिद्धान्तः।

कौशलं प्राप्नुवतां जनानां परस्परव्यवहारनियमाः अपेक्षिताः, एषां नियमानां निर्धारणविषयः द्वितीयः शक्तिप्रतिमानसिद्धान्तः। एकः स्वशक्त्याः दुरुपयोगं न कुर्यादिति

In Public domain. Digitization Muthulakshmi Research Academy

अपरस्मै तस्य नियन्त्रणस्य शक्तेः प्रदानमेवात्र मुख्यो विषयः। समाजोपयोगीनि यानि त्रीणि कर्माणि प्रोक्तानि तेषु कर्मसु ज्ञानान्वेषणम् अज्ञानस्य दूरीकरणम् अधिकं महत्वपूर्णम्। अन्यायं विरुध्य युध्यमानाः प्राकृतिकपदार्थेभ्यः च सम्पत्तिम् उत्पादयन्तः ज्ञानं विना निजकर्मकरणे अक्षमाः। द्विविधानपि एतान् ज्ञानमुत्पादयितुं समर्थम् एते न ज्ञानमुत्पादयितुं समर्थाः। ज्ञानात्मसंयमयोः समन्वयम् आत्मसात्कुर्वन्तः जनाः सर्वेऽपि प्रथमस्तरस्य बोध्याः। यदि समाजे सर्वे ईदृशाः स्युश्चेत् महतः भाग्यस्य विषयोऽयम्। परं यावत् एवं न सम्भवति तावत्तु विभाजनम् आवश्यकमेव। मानवानां हिताय एतदावश्यकं यत् व्यवस्था एवं भवतु येन जनाः प्रथमस्तरं प्रति आगन्तुं यतन्ताम्। तदर्थं ज्ञानवृद्धेः सुविधाः आदरं च अधिकतया समाजे सन्तु। ब्राह्मणवृत्तेः जनानां कृते आत्मसंयमाभ्यासप्रसङ्गे लोकेषणायाः जयोऽपि आवश्यकः। परं श्रेष्ठान् प्रतिभाशालिनः बालकान् ब्राह्मणवृत्तिं प्रति आकर्षणाय समाजः एतद्वृत्तिजनेभ्यः अधिकं सम्मानम् आदरं च प्रयच्छेत्। धनसंचयस्य ऐश्वर्यभोगस्य अधिकारः ब्राह्मणवृत्तिभ्यः न दीयेत। अन्यायं विरुध्य प्रवर्तमाने युद्धे प्राणानपि त्यक्तुकामेभ्यः क्षत्रियवृत्तिभ्यः शासनाधिकारः दीयते। सम्पत्तिम् उत्पादयद्भ्यः वैश्यवृत्तिभ्यः ऐश्वर्यभोगाधिकारः प्रदत्तः। वर्णव्यवस्थायाः शक्तिप्रतिमानसिद्धान्ते सर्वविधा शक्तिः एकस्य वर्गविशेषस्य पार्श्वे न भवतु इति यत्नः अक्रियत। ब्राह्मणवृत्तिजनः गौरवसहितः, धनसंचयैश्वर्यभोगराज्यशासनाधिकाररहितः। क्षत्रियवृत्तिजनः राज्यशासनाधिकारसहितः, गौरवधनसंचयैश्वर्यभोगरहितः। वैश्यवृत्तिजनः धनसंचयैश्वर्य - भोगसहितः, गौरवराज्यशासनाधिकाररहितः। ब्राह्मणः गौरवबलेन क्षत्रियान् वैश्यान् मर्यादायां रक्षतु। क्षत्रियः शासनेन बलेन च ब्राह्मणान् वैश्यान् च मर्यादायां रक्षतु। कश्चित् एको वर्गः सर्वविधशक्त्या युक्तः न भवेदिति अयं शक्तिप्रतिमानसिद्धान्तः वर्णव्यवस्थायाः।

क्रियमाणस्य कर्मणः फलं एषितव्यमेव। समाजहितं साधयद्भ्यः जनेभ्यः समाजेन यथायोग्या दक्षिणा देया। समान्यदक्षिणारूपेण सर्वे आवश्यकतानुसारमालम्बनपदार्थान् लभेरन्

In Public domain. Digitization Muthulakshmi Research Academy

विशिष्टदक्षिणारूपेण ज्ञानवृद्धेः साधनानि विशिष्टादरं च ब्राह्मणः शासनाधिकारं क्षत्रियः भोगैश्वर्यं वैश्यश्च यथा प्राप्नुयुस्तथा समाजेन यत्नः व्यवस्था च कार्यै।

आश्रमव्यवस्थायाः मूलाधारः ऋतुपरिवर्तनं वर्तते। यदि मनुष्यस्य अवस्था जन्मतः मृत्युपर्यन्तं समा भवति चेत् कस्या अपि आश्रमव्यवस्थायाः अपेक्षा नास्ति किन्तु मानवस्य सर्वम् आयुः समं न भवति। जीवनस्य आद्येषु पञ्चवर्षेषु यथा वेगेन शरीरस्य मानसिकतायाः वृद्धिर्भवति तथा अग्रे सप्तवर्षेषु न भवति। आद्येषु अष्टादशवर्षेषु यथा उन्नतिः शरीरस्य मानसिकतायाश्च भवति न तथा अग्रे सप्तवर्षेषु जायते। २५तमे वर्षे उन्नतिः स्थिता इव अनुभूयते। ४०तमे वर्षे बुद्ध्याः अभिवृद्धिरपि निरुद्धा अवगम्यते। एवं पृथक् पृथक् दशाः मानवस्य लक्ष्यन्ते। मानवस्य आयुषः चतस्रः अवस्थाः इत्थं बोद्धव्याः- वृद्धिः परिपाकः वात्सल्यं विरक्तिश्चेति। एताः अवस्थाः एव ब्रह्मचर्यगृहस्थवानप्रस्थसंन्यासाश्रम- रूपाः।

वर्णव्यवस्था कनिष्ठवरिष्ठभेदं तु मनुते परं गुणानामाधारेण। अतः आवश्यकं यत् गुणपरीक्षातः पूर्वसमये गुणपरीक्षातः पश्चात्तने समये भेदः भवतु। गुणपरीक्षातः पूर्वं सर्वे समानं अवसरं प्राप्नुयुः। गुणपरीक्षातः पश्चात् यथायोग्यं च कर्तव्यरूपम् अधिकाररूपं च फलमाप्नुयुः। परीक्षायाः पूर्वकालः वृद्धिकालः परीक्षायाः पश्चात्तनकालः परिपाकसमयः। वृद्धिपरिपाकयोर्भेद एव ब्रह्मचर्याश्रमं गृहस्थाश्रामात् पृथक् विदधाति। महर्षिदयानन्दः ब्रह्मचर्याश्रमम् अभिलक्ष्य सत्यार्थप्रकाशे लिखति- सर्वेभ्यः तुल्यवस्त्रपानभोजनासनानि दातव्यानि। ब्रह्मचारी राजकुमारः राजकुमारी वा भवतु दरिद्रस्य पुत्रः वा भवतु। वर्णयोग्यता परीक्षायाः पूर्वं तुल्यव्यवहारः पश्चाच्च यथायोग्यं वर्णानुकूलो व्यवहारः। प्रत्येकं बालकस्य पूर्णः अधिकारः भवतु निजमार्गं चेतुम्। ब्राह्मणक्षत्रियवैश्याणां त्रयाणामपि अधिकाराः स्पष्टतया बालकान् अवगमयेयुः। सम्यक् ज्ञात्वा ब्रह्मचारी स्ववर्णं चिनुयात्। वरणकारणात् एव ब्राह्मणादिवर्णानां वर्ण इति नाम। भगवान् यास्को ब्रूते- वर्णो वृणोतेः इति।

साररूपेण वक्तव्यं चेत् वर्णाश्रमव्यवस्थायां शिक्षा द्विविधा। एका वर्णचयने सहायिका अपरा च वर्णगुणानामुत्पादयित्री। प्रथमा शिक्षा पितृभ्यां कुलपुरोहितेन देया। शूद्रमपि अनुपनीतमध्यापयेत् इत्यस्यार्थः अयमेव यत् यावत् ब्रह्मचारी निजं वर्णं न निश्चिनोति तावत्

In Public domain. Digitization Muthulakshmi Research Academy

तस्य अध्यापनं वर्णनिश्चयाय भवतु इति, ततः वर्णनिश्चयानन्तरं तस्याध्यापनं वर्णगुणोत्पादनाय। वर्णनिश्चयः परमावश्यकः। वर्णनिश्चये मातापितरौ सहायकौ भवतः किन्तु वास्तविकनिर्णयस्तु आचार्यस्यैव मान्यो भवति। मनुस्मृतेः द्वितीयेऽध्यायेऽत एव उच्यते– आचार्यस्त्वस्य यां जातिं विधिवद्वेदपारागः। उत्पादयति सावित्र्या सा नित्या साजरामरा इति।

शूद्रोऽपि वर्णान्तर्गतः। येन अविद्यानाशाय सत्यप्रकास्य मार्गः चितः सः ब्राह्मणः प्रोक्तः। येन अन्यायनाशाय न्यायरक्षायाः मार्गः अंगीकृतः सः क्षत्रियः कथितः। दरिद्रतानाशस्य सुभिक्षविस्तारस्य च मार्गस्य चेता वैश्यः गणितः। शूद्रः किं वृणुते? इति प्रश्ने मनुस्मृतौ उच्यते– एकमेव तु शूद्रस्य प्रभुः कार्यं समादिशत्। एतेषामेव वर्णानां शुश्रूषामनसूयया इति। परहितव्रतधारियितॄणां सेवायाः मार्गं यः चिनोति सः शूद्रः। शूद्रः आलस्यप्रमादाशक्तिकारणैः ब्राह्मणक्षत्रियवैश्यवर्णानां न कस्मिंश्चित् वर्णे स्थितः इति न असूयादग्धः सन् विषयेऽस्मिन् निजमूर्खताम् अशक्तिं वा एव कारणं मन्वानः आशावान् उत्साही सन् यदि ब्राह्मणवृत्तिः चेत् ज्ञानचर्चां यदि क्षत्रियवृत्तिः चेत् वीररसचर्चां यदि वैश्यवृत्तिः चेत् दानचर्चां शुश्रूषति द्विजान् सेवमानः।

विवाहानन्तरजीवनस्य वास्तविकं सुखं वर्णव्यवस्थया सम्भवति। गुणकर्मानुसारवरणव्यवस्था वर्णव्यवस्थायाः वैशिष्ट्यम्। ज्ञानव्रते दीक्षिता कन्या रूपहीनं धनहीनं निर्बलं सन्तमपि विद्याव्यसनिनं ब्राह्मणं वृणोति। वीरताव्रते दीक्षिता कन्या धनहीनं रूपहीनं स्वल्पज्ञानिनं सन्तमपि अन्यायं विरुद्ध्य न्यायार्थं निजप्राणानपि जिहासमानं क्षत्रियं वृणोति। समाजात् दरिद्रतां दूरीकर्तुमीहमाना कन्या अल्पज्ञानिनं अल्पबलं रूपहीनं सन्तमपि दानकर्मणि निरतं धनिनं वैश्यं निजं पतिं विधातुं वाञ्छति। समानगुणकर्मस्वभावानां युगलानां सुखं न भवतीति कथं सम्भवम्? पतिः तस्मिन् गुणविशेषे वैशिष्ट्यमाप्नुयात् यं गुणं पत्नी पूजयति चेत् पतिः पत्न्याः देवः अभवदेव। पुरुषाः प्रथमं महत्तपः कृत्वा देवभावमाप्नुयुः, तदा देवीनां ते आराद्ध्याः भवन्ति। गृहस्थकलहाः दूरीभवन्ति। गार्हस्थ्यं सानन्दम् अत्येति।

भविष्यतः निर्मातारः सर्वसंसारस्य शिशवः बालाः वा सुपद्धत्या शिक्षिताः करणीयाश्चेत् वानप्रस्थाश्रमः आवश्यकः। गार्हस्थ्यं पूर्णं कृतवन्तः सकलाः गृहस्थाः वानप्रस्थिनः भवन्ति चेत् युवकानां वृद्धानां च कलहाः न भवन्ति। वानप्रस्थाश्रमे क्षत्रियवैश्यवर्णस्थाः अपि ब्राह्मणा

In Public domain. Digitization Muthulakshmi Research Academy

इव जायन्ते। अज्ञाननाशस्य कृते दीक्षिताः भवन्ति। निजवयःकारणेनापि वात्सल्यप्रवृत्तयः एते अध्यापकाः अनुभविनः भवन्ति। ये विना वेतनं निजसन्ततिप्रदत्तपदार्थैः तृप्ताः सन्तः जीवननिर्वाहं विदधति। ब्राह्मणैः सह स्थिताः असंख्याकाः अध्यापकाः भवन्ति चेत् गुरूणां अधिकः सत्संगः शिष्यैः लभ्यते। गुरुशिष्याणां समीपता आचारवतः नागरिकान् निर्माति। वर्णाश्रमव्यवस्थया सुगमतया अशिक्षासमस्यायाः समाधानं क्रियते।

लघुतरस्वार्थस्य बृहत्तमस्वार्थस्य च समन्वयबोधनाय संन्यासाश्रमः। लघुतरस्वार्थः यदि बृहत्तमस्वार्थस्य आधाररूपः सम्भवति चेत् लघुतरस्वार्थस्य बृहत्तमस्वार्थस्य च समन्वयः जायते। लघुस्वार्थः स्वाभाविकः। बृहत्तमस्वार्थः साधनया शिक्ष्यते। उदाहरणेन एतदवगम्यते। माता शिशुं पालयति तस्मिन् स्निह्यति तदर्थं महतः त्यागान् करोति। यदि सा ग्रामस्य नाशाय सिद्धा भवति चेत् स्वाभाविकं मातृस्नेहम् अपाकृत्य तस्याः दण्डनाय हृदयस्य कठोरता अपेक्षिता। एवंविधा हृदयस्य कठोरता कथं सम्भवा? प्रायशः लघुस्वार्थः एव बलवान् भवति। बृहत्तमस्वार्थसिद्धये लघुस्वार्थस्य हानं साधनया सम्भवम्।

इह स्वामिसमर्पणानन्दविरचितकायाकल्पपरिप्रेक्ष्ये वर्णाश्रमव्यवस्था इत्यस्मिन् लेखे कायाकल्पग्रन्थभावान् अनुसरता अतिसंक्षेपेण स्वामिनः वर्णाश्रमव्यवस्थां प्रति स्थिता दृष्टिः उपस्थापिता। अनेके महान्तः विषयाः वर्णाश्रमव्यवस्थासम्बद्धाः कायाकल्पनामके ग्रन्थे स्वामिना समर्पणानन्दमहाभागेन विस्तृततया विश्लेषिताः। इदानीन्तने संसारे आदरं प्राप्नुवतीभ्यः प्रचलिताभ्यः अन्याभ्यः व्यवस्थाभ्यः वैदिकी वर्णव्यवस्था कथं श्रेष्ठा इत्यपि विषयः स्वामिवर्यैः तत्र प्रस्तुतः। ग्रन्थमिमम् अधीत्य भाति यत् अयं ग्रन्थः महत् शोधकार्यम् अपेक्षते।

आधारग्रन्थाः–

१. कायाकल्प -रचयिता- स्वामी समर्पणानन्द सरस्वती प्रकाशकः- स्वामी समर्पणानन्द वैदिक शोध संस्थान गुरुकुल प्रभात आश्रम, मेरठ

२. समर्पण-शती-सौरभम् सम्पादकः- डा. निरूपण विद्यालङ्कारः प्रकाशकः- स्वामी समर्पणानन्द् वैदिक शोध संस्थान गुरुकुल प्रभात आश्रम, ,,

३. सत्यार्थप्रकाश रचयिता- स्वामी दयानन्द सरस्वती प्रकाशकः- परोपकारिणी सभा, अजमेर

४. मनुरचिता मनुस्मृतिः -सम्पादकः- पण्डितरामेश्वरभ ः-प्रकाशकः- चौखम्व

In Public domain. Digitization Muthulakshmi Research Academy

छान्दोग्योपनिषदि समाजश्रेयसे आश्रमधर्माः

डा. अनुपमा र्याली

मानवजीवनं तु सुखदुःखसमन्वितम्। मानवस्तु दुःखापेक्षया आनन्दप्राप्तिमिष्यमाणः सर्वदा सुखप्राप्त्यै प्रयतमाणश्च भवति। तस्य जीवनस्य अज्ञानान्धकारमुन्मूल्य ज्ञानज्योतिं प्रज्वाल्य परमानन्दं प्रापयति पुरुषार्थचतुष्टयम्। अत एव पुरुषार्थचतुष्टयसम्पादनमेव मानवजीवनस्य प्रमुखं लक्ष्यम्। पुरुषार्थचतुष्टये अन्यतमो मोक्षस्तु मनुष्यस्य आध्यात्मिकं लक्ष्यमस्ति। तदतिरिच्य धर्मार्थकामाभिधानो त्रिवर्गः मानवं लोकेस्मिन् गुणैर्सदाचारैश्च सांसारिकोपभोगान् साधयति। अत एव अयं पुरुषार्थचतुष्टयं मानवजीवने प्रमुखस्थानमावहति। तत्रापि धर्मस्यैवाग्रेसरत्वम्। अयमेव मानवजीवने मानदण्डो भवति। कथं वा मानवेन अयं त्रिवर्गः सेवितव्य इति जिज्ञासायां तत्र प्रमाणं वहति श्रुतिस्मृत्यादिकम्। श्रुतिशब्देन समग्रोपि मन्त्र-ब्राह्मण-आरण्यक-उपनिषदां निधिर्गृह्यते। इममेव साधयितुं कश्चन प्रयत्नः करणीयः मानवेन। तस्य प्रयत्नस्य मार्गं द्योतयन्त्याश्रमधर्माः।

'आश्रम' शब्दस्य व्युत्पत्तिः उद्देश्यश्च – **'आश्रम'** शब्दः **'आ'** उपसर्गपूर्वकात् **'श्रम्'** धातोः निष्पन्नः। आश्रमधर्माः व्यक्तेः निर्माणाय काचित् व्यवस्था या प्रत्येकं मानवस्य विशेषजीवनशैली व्यनक्ति। इमे च मानवस्य व्यक्तित्वनिर्माणाय बहूपकुर्वन्ति। एते धर्माः व्यष्टये, कुटुम्बाय, समाजाय अन्ते च पारमार्थिकं लक्ष्यं साधयन्ति। यतो हि प्रत्येकस्मिन्नाश्रमे प्रत्येकेन मानवेन भूरिपरिश्रमः क्रियते। व्यक्तेः औन्नत्यं समाजश्रेयस एव। एते धर्मश्च व्यक्तिसमाजौ परस्परमाश्रितौ कारयन्ति। अनेन मार्गेण मानवस्य न केवलं भौतिकोन्नतिरपितु आध्यात्मिकविकासोपि यस्मात् मानवः स्वीयसेवाः समाजाय अर्पयति।

आश्रमाणां वर्गीकरणम् – मानवस्य आयुरेकशतमिति शास्त्रैः प्रतिपादितम्। यथा **जीवेम शरदः शतम्** (य.वे) इति तथा च **शतायुर्वै पुरुषः (ऐ.ब्रा.)** इति। अपि च जिजीविषा जीवानां प्रबलप्रवृत्तिः। प्राप्तुमिदं क्रियते महान् यत्नश्च मानवेन। यथा – **'अस्माकमायुर्वर्धयन्'** (ऋ.वे) तथा च **'आयुर्मे पाहि'** (य.वे) इति । इदमेव मनसि निधाय, शास्त्रैः मानवस्य शतायुः चतुर्षु भागेषु विभज्य, चतुराश्रमाः कल्पिताः। यथा – ब्रह्मचर्यगार्हस्थवानप्रस्थसन्यासाश्रमः। प्रत्येकमाश्रमस्य धर्माः बहुधा प्रतिपादिताः श्रुतिस्मृतिपुराणादिषु।

आश्रमधर्माणां मूलाधारः ऋणत्रयी –मानवः ऋषिदेवपितृणैरिति त्रिभिः ऋणैस्सह जन्म प्राप्नोति। यथा प्रतिपादितं तैत्तरीयसंहितायाम् – **"जायमानो वै ब्राह्मणस्त्रिभिर्ऋणान् जायते। ब्रह्मचार्येण ऋषिभ्यो, यज्ञेन देवेभ्यः प्रजया पितृभ्यः। एषा वा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासी।।"** इति।

आश्रमव्यवस्था मानवान् ऋणेभ्यो विमोचयति। अर्थात् ब्रह्मचर्याश्रमेण ऋषिऋणात्, यागैः देवऋणात् तथा प्रजया पितृणात् मानवः विमोच्यते। चतुराश्रमान् परिपालयता मानवेन त्रिवर्गमवाप्य पुरुषार्थेष्वन्यतमः अन्तिमश्च मोक्षिसिद्धिः प्राप्यते।

छान्दोग्योपनिषदि आश्रमधर्माः –**'प्रणवो नाम तत्सत्यं परं ब्रह्म तत्प्रतीकत्वात्'** इत्यनुसृत्य, **'एतद्येवाक्षरं परम्'** अर्थात् प्रणवोपासनया अमृतत्वं प्राप्यते [II-23] इति सन्दिशति। तत्र च आद्यत्रयोप्याश्रमिणो स्वधर्मान् परिपाल्य पुण्यलोकान् आप्नुवन्ति। अवशिष्टः चतुर्थाश्रमी परिव्राट् तु ब्रह्मसंस्थो भूत्वा पुण्यलोकात् पृथक् देववत् अमृतत्वं प्राप्नुत इति [II-23]। अतः मानवजन्मनः परमं लक्ष्यममृतत्वमिति विधाय अस्यामुपनिषदि आश्रमधर्मफलोपन्यासः प्रणवसेवास्तुत्यर्थं कृतः।

Public domain. Digitization Muthulakshmi Research Academy

1 ब्रह्मचर्याश्रमः –अथर्ववेदमनुसृत्य ब्रह्म आचरति सह ब्रह्मचारी इति। आश्रमेस्मिन् बालकः गुरोर्गृहं प्रेत्य विद्यामधीते। अत्र विद्यार्थिनः साधनायुक्तं जीवनं भवति येन तस्य चारित्रिकविकासोपि भवति। अत्रैव अन्यत्रिष्वाश्रमेषु कर्तव्यो व्यवहारो बीजवदुप्यते। अत एव अन्यत्रयाणाम् आश्रमाणाम् अयम् आश्रमः मूलाधारः इति कथने नास्ति संशयलेशोपि। छान्दोग्योपनिषदि विविधेषु सन्दर्भेषु ब्रह्मचारिणः कर्तव्याकर्तव्यानि, तस्य अध्ययनविधिः, तेन क्रियमाणं तपः, गुरुशुश्रूषादिकमित्थं परिशील्यते –

ब्रह्मचारिणः अध्ययनविधिः –उपनिषद्यस्यां दाल्भ्य ऋषेः स्वाध्ययनसन्दर्भे (I-12) **स्वाध्यायमुद्वव्राज** इति शब्दः दृश्यते। अर्थात् स्वाध्यायं कर्तुं ग्रामात् बहिः एकान्तप्रदेशे, जलाशयस्य समीपं गम्यते इति वक्तुं शक्यते। ओंकारस्योपासनविध्यर्थं धर्मस्य त्रयो स्कन्धाः प्रतिपादिताः [II-23]। ते च यज्ञोध्ययनं दानमिति प्रथमः। तपः द्वितीयः। तथा ब्रह्मचार्याचार्यकुलवासी तृतीयः इति। सन्दर्भेस्मिन् ब्रह्मचारिणः कर्तव्यं दृग्गोचरं भवति। ब्रह्मचारिणा आचार्यस्य गृहे स्थित्वा, नैष्टिको भूत्वा देहं क्षपयन् स्वाध्यायो करणीय इति शाङ्करभाष्यम्। एते नैष्टिकब्रह्मचारिणः स्वाध्यायग्रहणार्थम् अरण्यवासिभिः उत्तरेणार्यम्णः (सूर्यसम्बन्धी–उत्तरमार्गः) पन्थाः गच्छन्तीत्यपि शाङ्करभाष्यं व्यनक्ति (V-10)। अस्मिन्नाश्रमे शिष्यः गुरून् शुश्रूषयन्, तेषां समीपगो भूत्वा, एकाग्रतया गुरोर्द्रष्टा भवति। ततस्तदुक्तस्य श्रोता भवति। तत इदमेभिरुक्तमेवमुपपद्यत इत्युपपत्तितो मन्वा भवति। मान्वानश्च बोद्धा भवत्येवेदमिति। तत एवं निश्चित्य तदुक्तार्थस्य कर्तानुष्ठाता भवति। अर्थात् सः विज्ञातानुष्ठानफलस्यानुभविता भवतीति (VII-8)। एव ब्रह्मचारी श्रद्धालुः भवति (VII-20)। अत्र निष्ठा नाम गुरुशुश्रूषादितत्परत्वमिति (शा.भा.) अनेनैव सः ब्रह्मविज्ञानाय अर्हो भवतीति। अस्याः उपनिषदः चतुर्थाध्यायस्य चतुर्थे खण्डे विद्यमानस् सत्यकामस्य ब्रह्मचर्यपालनविधिना कथमयमाश्रमे आचरणीयः, को वा अस्य मार्गः इति ज्ञायते। जाबालायः पुत्रः सत्यकामः ब्रह्मचर्यमाचरितुं मातुरनुमतिं प्राप्य हरिद्रुमतः पुत्रं गौतममतेन – **'ब्रह्मचर्यं भगवति वत्स्याम्युपेयां भगवन्तमिति'** (IV-4) उवाच। इत्थमुक्त्वा गुरोरनुरनुमतिं प्राप्य गुरुशुश्रूषया ब्रह्मज्ञानार्थं प्रायतत। तत्र शुश्रूषानिमित्तं सः सत्यकामः अरण्यं गत्वा होमाय समिधामाधाय चतुःशता गा संव्रज्य, तत्रैवारण्ये नित्यं कर्म कृत्वा गुरुकुलं प्रत्यागच्छति स्म (IV-4)। इत्थं न केवलं गुरुशुश्रूषया अपितु गुरुदक्षिणां गुरवे दत्वापि विद्यामधीतेति **'जानश्रुति'** नामककस्यचित् क्षत्रियस्य कथासन्दर्भे (IV-2) रैक्वनामकगुरवे सहस्रमयं गवां, प्रभूतं धनमित्यादिकं विद्याग्रहाणार्थं दत्तमिति ज्ञायते। इमां प्रक्रियां समर्थयन् शाङ्करभाष्यं विद्यायाः षट् तीर्थानि उक्त्वा अस्याः प्रक्रियायाः प्रमाणं प्राकटयत्। तद्यथा – **"ब्रह्मचारी धनदायी मेधावी श्रोत्रियः प्रियः। विद्यया वा विद्यां प्राह तानि तीर्थानि षण्मम॥"** इति षड्विधैः विद्याभ्यासः क्रियते इत्यपि अनेन ज्ञायते। इदमेवानुसृत्य राज्ञा जानश्रुतिनापि विद्यायाः षट्सु तीर्थेषु **धनदायी** इत्येकं तीर्थमवलम्ब्य, गुरुदक्षिणाविधिना विद्यामध्यगच्छदिति।

आश्रमस्य वैशिष्ट्यम् –

गृहस्थाश्रमं विहाय अन्यषु त्रिष्वाश्रमेषु स्त्रीविषयकतृष्णात्यागेन ब्रह्मचर्यस्य पालनं क्रियते इति मानवजीवने अस्य महद्वैशिष्ट्यम् अस्ति। ब्रह्मचर्येण शास्त्राचार्योपदेशमनुविन्दन्तः स्वात्मसंवेद्यतां सम्पाद्य ब्रह्मलोकं प्राप्नोतीति(VIII-4)। इत्थं ब्रह्मलोकमवाप्य सर्वेषु लोकेष्वपि अस्य स्वेच्छागतिर्भवतीति(VIII-4)। ब्रह्मविदां परमेतत्साधनम्। यद्यज्ञ इत्याचक्षते तद्ब्रह्मर्यमेव। अर्थात् यज्ञस्यापि यत्फलं तद्ब्रह्मचर्यवांल्लभत अतो यज्ञोपि ब्रह्मचर्यमेवेति। अनेन ब्रह्मचर्यसाधनेनैव युक्तः सन्नात्मानं शास्त्राचार्याभ्यां मनुते। अतः मौनमपि ब्रह्मचर्यमेव। अथ ब्रह्मचर्याश्रमे तदपि ब्रह्मचर्यमेव (VIII-5)। इत्थं ब्रह्मचर्याश्रमे सदाचारस्य स्वाध्यायस्य च महद्वैशिष्ट्यं वर्तते। वृत्तस्वाध्यायाभ्यां ब्रह्मचारी व्यष्टिनिर्माणे व्यक्तित्वं समाजश्रेयसे लोककल्याणाय च यतते।

In Public domain. Digitization Muthulakshmi Research Academy

2 **गृहस्थाश्रमः** – वेदाध्ययनं, वेदविहितकर्मणां सम्पादनं, वैदिकविधिना प्राप्तपत्न्याः सन्तानोत्पादनमित्यादयः अस्याश्रमस्य प्रमुखाः धर्माः। अयमेवाश्रमः अन्याश्रमाणां प्रतिष्ठां जनयति। यतो हि गृहस्थेनैव ब्रह्मचारीवानप्रस्थसन्यासीनां पालनं क्रियते। अस्याश्रमस्योद्देश्यद्वयं वर्तते। एका तु विवाहसंस्था, अन्यत् धार्मिकानुष्ठानम्। आदौ तावत् विद्याध्ययनं समाप्य गुरोराज्ञां प्राप्य विवाहं कृत्वा गृहस्थाश्रमे प्रवेशो भवति। छान्दोग्योपनिषदि अस्याश्रमस्य माहात्म्यं कथं प्रतिपादितमित्यधुना परिशील्यते – पूर्वस्मिन्नाश्रमप्रतिपादने धर्मस्य त्रयो आधारस्कन्धाः प्रोक्ताः। तेषु च आद्यः यज्ञोध्ययनं दानमिति। अयं गृहस्थसमवेतत्वात्तनिर्वतकेन गृहस्थेन अग्निहोत्रादिर्यज्ञाः, ऋगादेरभ्यासः तथा दानश्च यथाशक्तिद्रव्यसंविभागो भिक्षमाणेभ्यो दातव्यिमित (II-23)।

कुटुम्बपोषणं, धनार्जनमपि, गृहस्थिनः कर्तव्येष्वन्तर्भवतीति **उषस्ति** नामक विप्रस्य कथया ज्ञायते। **स ह खादित्वातिशेषाञ्जाया आजहार** (I-10) इत्यनेन मन्त्रेण स उषस्तिः जीवनार्थमल्पं वा धनमार्जीयितुमैच्छत्। धनलाभेत्र कारणामाह – कश्चन राजा नातिदूरे यक्ष्यते स च अमुं ऋत्विक्कर्मप्रयोजनाय सुपात्रमिति मत्वा वृणीत इति (I-10)। सन्दर्भेस्मिन् जीवननिर्वहणार्थमेव धनार्जनमिति उषस्तेः उद्देश्यमिति वक्तुं शक्यते। अध्यापनकार्यं गृहस्थीनां महत् कर्तव्यम्। स्वकुटुम्बपोषणाय, अध्यापनकर्मणा, गुरुदक्षिणां संगृह्य धनमार्जेतव्यमिति राज्ञः जनश्रुतेः कथया ज्ञायते। राजा जानश्रुतिः रैक्वऋषिमुपगम्य, धनार्जेने तस्य इच्छाञ्च बुद्ध्वा, तस्मै प्रभूतं धनमादाय तं प्रतिजगाम। (IV-2) यद्यपि समान्यविद्यायाः अध्यापनमित्यर्थः कर्तुं शक्यते, तथापि ब्रह्मविद्यायाः उपदेशस्तु धनादिकं गृहीत्वा न देय इति। यतो हि समुद्रपरिवेष्टतां समस्तामपि पृथिवीं दद्यात् तथापि ब्रह्मविद्यायाः निष्क्रयः न सम्भवति। अतः विद्यायाः षट्तीर्थेषु ज्येष्ठाय पुत्राय, योग्याय शिष्याय इत्यमूभ्यां द्वाभ्यां तीर्थाभ्यामेव उपदेष्टव्य इति(III-11)। इत्थमध्यापयन् स्वाध्यायमपि कुर्वन् गृहस्थः मार्गदर्शो भूत्वा समाजाय आदर्शरूपो भवत्विति। यथा – **'प्राचीनशालसत्ययज्ञ–इन्द्रद्युम्नजनमुडिलाः पञ्चापि एते महागृहस्थाः, महाश्रोत्रियाः सन्तः एकत्र समेत्य को न आत्मा, किं ब्रह्मेति मीमांसां चक्रुः'** (V-11)।

सन्तानोत्पत्तेः प्राधान्यं तस्योद्दश्यम् –अस्मिन्नेकस्मिन्नेवाश्रमे मानवः गृहस्थो भूत्वा सन्तानमुत्पाद्य सृष्टेः उद्देश्यं परिभूयति। आश्रमेस्मिन् सन्तानस्य मुख्योद्देश्यमपि पुण्यलोकप्राप्तिरेव इति **'तस्मात्पुत्रमनुशिष्टं लोक्यमाहुः'** (III-15) इत्यस्मात् श्रुतिवाक्यादपि इदं सिध्यते।

3 **वानप्रस्थाश्रमः** –आश्रमेस्मिन् गृहं भौतिकसम्पादाञ्च परित्यज्य वानप्रस्थः वनमभिगच्छति। आश्रमेष्वन्यतमः अन्तिमश्च सन्यासाश्रमः। यमाप्तुं गृहस्थाय अति दुष्करो भवति। अतः सन्यासाश्रममाचरितुं तथा च गृहस्थसन्यासाश्रमयोर्मध्ये, सन्यासश्रमस्य भावभूमिरिव साधनावस्थेव विद्यते वानप्रस्थाश्रमः इति। अतः वानप्रस्थाश्रमे वानप्रस्थिना कामोपभोगान् परित्यज्य, वन्यफलकन्दमूलादीनि भोक्तव्यानि। तथा च पञ्चमहायज्ञाः, क्रियमाणेन तेन अध्यापनतिथिसत्कारादिकञ्च करणीयम्। अस्यामुपनिषदि अस्याश्रमस्य धर्माः कथं प्रोक्ता इत्यधुनावलोक्यते – वानप्रस्थाश्रमे ब्रह्मचारी सन् अरण्ये निवसतीति अयं वानप्रस्थः **अरण्यायनो** इति कथ्यते। अयं ब्रह्मचर्यवान् पुरुषः **अर** तथा **ण्य** नामक अर्णवान् प्रति गच्छतीति अरण्यायन इति शाङ्करभाष्यं कथयति। अस्य उपासनाविधिभिः पुरुषार्थसाधनैः ब्रह्मवेत्ता भवति। ततः तस्य सर्वेषु श्लोकेषु स्वेच्छागतिर्भवति (VIII-5)। वानप्रस्थः अरण्ये निवसन् श्रद्धतपसी उपासतेति तेन सः श्रद्धालुः तपस्वी च भवतीति। तत्र कश्चन अमानवो पुरुषः एनं देवयानमार्गं गमयतीति इयमुपनिषद् वानप्रस्थस्य ब्रह्मलोकगमनं सूचयति (V-10)।

4 **सन्यासाश्रमः** –अस्मिन्नाश्रमे सांसारिकतैव सर्वतो भावेन त्याज्या भवति सन्यासिना। तेनात्र एकाकिजीवनं व्यर्तितव्यम्। आश्रमपालकस्य अस्य सन्यासिनः जीवनव्यवहारं, भिक्षाटनं, साधनाधिकमधिकृत्य भवति। छान्दोग्येस्य वैशिष्ट्यं कथं प्रोक्तमिति अवलोक्यते अधुना – आश्रमेस्मिन् त्यक्तसर्वबाह्यैषणैरनन्यशरणैः अत्याश्रमं सन्यासिभिः वेदान्तविज्ञानपरैः

In Public domain. Digitization Muthulakshmi Research Academy

वेदनीयं प्राजापत्यमितीयमुपनिषद् द्योतयित (शा.भा. VIII-12)। पूर्वप्रतिपादितेषु त्रिषु धर्मस्कन्धेषु द्वितीयो तपः। परिव्राजकस्य ज्ञानं यमा नियमाश्च तप एवत्यस्मात् तपः आचरणीयम्। ततः सोयं प्रणवसेवको भूत्वा अमृतत्त्वमेतीति (शा.भा.II-23)। सन्यासिनां परमं लक्ष्यं भवति मोक्षः। अस्यामुपनिषदि मुमुक्षूणां वैराग्यहेतोः ब्रह्मादिस्तम्बपर्यन्ताः प्रतिपादिता (V-3)। तत्र मुहूर्तमप्यसह्यं तथापि, दश न वा मासपर्यन्तं मातुर्गर्भे शयित्वा तस्याः अशितपीतरसानुप्रवेशेन विविर्धमानस्य निरुद्धशक्तिबलवीर्यतेजः प्रजाचेष्टया अनुभोक्तव्या। ततो योनिद्वारेण पीड्यमानस्य कष्टतरा निःसृतिर्जन्मेति वैराग्यं ग्राहयति (V-9)। इत्थं वैराग्यं प्राप्य मोक्षमाप्तुं प्रयतते सन्यासी।

परिव्राजां कर्तव्यानि –परिव्राजकानां भिक्षाचरणादिव (II-23) इति शाङ्करभाष्येन भिक्षया परिव्राट् भोक्तव्य इति ज्ञायते। **मुण्डोपरिग्रहः** (जाबा–उ–5) **असङ्गः** इति **अत्याश्रमिभ्यः परमं पवित्रम्** (श्वे.उ.6/21) इत्यादीनि श्रुतिवाक्यान्यनुसृत्य, **निःस्तुतिनिर्नमस्कारः** इत्यादिस्मृतिभ्यश्च परिव्राजा त्यक्तयज्ञोपवीतत्रिदण्डकमण्डलु भवितव्य इतीयमुपनिषद् कथयति।

उपसंहारः – एतेषामाश्रमधर्माणामाचारणेन समाजश्रेयः कुतो वेति जिज्ञासायां समादधाति अस्याः उपनिषदः अन्तिमोध्यायः। तद्यथा – आचार्यकुलोद्वेदमधीत्य तत्र कर्मशून्यो भूत्वा गुरुशुश्रूषया धर्मजिज्ञासां समाप्य, गुरुकुलान्निवृत्य न्यायतो दारानाहृत्य गार्हस्थ्ये विहिते कर्मणि तिष्ठन्, पुत्रान् शिष्याश्च धार्मिकान् कुर्वन्, स्वहृदये सर्वेन्द्रियाणि प्रतिष्ठाप्य, कर्मणि सन्यस्य, यावज्जीवनमित्थं वर्तयन्, देहान्ते ब्रह्मलोकमभिसम्पद्यत इति। कदापि शरीरग्रहणाय न पुनरावर्तत इति (VIII-15)।

इत्थं त्रिवर्गसाधनेन चतुराश्रमधर्माननुसरन्, परम लक्ष्यं मोक्षमवाप्नोतीति शम्।

कृष्णयजुर्वेदीयं विज्ञानम्

Dr.Kuppa Srinivasa Sastry

इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम् । यदि शब्दाह्वयं ज्योतिः आसंसारं न दीप्यते ।।

इदं कविभ्यः पूर्वभ्यः नमोवाकं प्रशास्महे । वन्दे महि च तां देवीं अमृतां आत्मनः कलाम् ।।

मानावानां परमपुरुषार्थः मोक्ष एव। मोक्षसाधकज्ञानं आत्मज्ञानम्। आत्मनः कला द्विविधा वर्तते ज्ञानविज्ञान स्वरूपाचेति। सत्यं ज्ञानमनन्तं ब्रह्मा इत्यादि वाक्यैः ज्ञानस्वरूपं वेदेषु प्रपञ्चितम्. विज्ञानं ब्रह्मेति व्यजानत्। विज्ञानाध्येव खल्विमानि भूतानि जायन्ते। विज्ञानेन जातानि जीवन्ति। विज्ञानं प्रयंत्यभिसंविशन्तीति। तद्विजिज्ञासस्व इत्यादिना विज्ञानस्वरूपमपि सम्यगुक्तं कृष्णयजुर्वेदे। वस्तुतः विज्ञान ज्ञानसाधनं भवति। नेति नेति वाक्यैः संसारे निराकृते सति परिशिष्टं वस्तु परंब्रह्मेति तत् त्वं असीत्यादिना परिशिष्टन्यायेन परंब्रह्म अभिधीयते। तादृश परमपुरुषार्ध साधनभूत विज्ञानवान् पुरुषः एव ज्ञानवान् भूत्वा सफलः भवति। तद्विजिज्ञासस्वेत्यादिना विज्ञानमपि वेद्यवस्तुत्वेन कृष्णयजुर्वेदः प्रतिपादयति। **भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिः तथा।** विश्ववाङ्मये वेदात् प्राक्तनं साहित्यं नास्तीति सर्वजनसंविदितमेव। अतः न केवलं भारतीयसंस्कृतेः किञ्च विश्वसंस्कृतेः मूलाधारः वेदराशिः इत्युक्तौ नास्ति संशयलेशोऽपि। अनादि निधना नित्या वागुत्सृष्टा स्वयंभुवा।

आदौ वेदमयीदिव्या यतः सर्वाः प्रवृत्तयः।। इत्यभियुक्तोक्तिः। वस्तुतः भारतीयानामध्ययनं वेदतः एवारभ्यते। वैदिकसाहित्ये कर्म, उपासना, ज्ञान, विज्ञान विचारः प्रधानः अस्ति, मोक्षे धीःज्ञानं अन्यत्र विज्ञानं शिल्पशास्त्रयोः इत्यमरनिघंटुकारः वक्ति। अभ्युदयनिश्श्रेयससिद्धिकारणभूत धर्माधर्मविचारः, प्राणिमात्रस्य कल्याणकामनया सन्मार्गप्रदर्शनपूर्वकं विविधाः वैज्ञानिकविषयाः अपि यावदावश्यकं तावन्मात्रं निरूपिताः अस्मिन्वेदे। अतः आर्षं विज्ञानं सुखदायकमेव सत् विश्वकल्याणकारकमस्ति। आधुनिकविज्ञानवत्

In Public domain. Digitization Muthulakshmi Research Academy

दुःखसम्मिश्रसुख साधनं न कदापि भवति। वैदिकविज्ञानस्य साहाय्येनैव मानवः विश्वकल्याणस्य उपयेगं उपभेगं च कर्तुं समर्थः भवति।

विज्ञानाकरेषु वेदेषु कृष्णयजुर्वेदः भित्तिस्थानीयः अन्ये चित्रस्थानीयाः। यज्ञप्रधानेऽपि कृष्णयजुर्वेदे अनेके वैज्ञानिकाः विषयाः प्रतिपादितास्सन्ति। यज्ञो नाम विश्वकल्याणार्थं क्रियमाणः कर्मविशेषः। यतः **यज्ञोहि श्रेष्ठतमं कर्म** खलु। साक्षाद्वा परंपरया तादृश विश्वकल्याणं साधयितुं ये विज्ञानसबंधिविषयाः कृष्णयजुर्वेदे प्रतिपादिताः तानधिकृत्य किञ्चित् प्रस्तोतुं इच्छामि।

१. विश्वविज्ञानम्

सर्वप्रथमं तावत् अस्य विश्वस्य विश्वकर्ता उल्लेखः यत्र कृतः तं पश्यामः पादोऽस्य विश्वाभूतानि। विश्वाभूतानि कालत्रयवर्तीनि प्राणिजातानि सकलब्रह्माण्डानां अन्तः बहिश्च व्याप्यस्थितस्य परमपुरुषस्य चतुर्थः अंशः एव। वस्तुतः सत्यं ज्ञानमनन्तं ब्रह्म इत्याम्नातस्य परब्रह्मणः इयत्तायाः अभावात् तदृशं अंशचतुष्टयं निरूपयितुं न शक्यते। (अतः) ब्रह्मस्वरूपापेक्षया अस्माभिः दृश्यमानस्य अस्य अनन्तकोटिब्रह्माण्डस्य अत्यल्पत्वं अस्तीति विवक्षितुं पादत्वापेन्यासः। सवर्स्य जगतः परमात्माशंत्वं गीतायामप्युक्तं विष्टभ्याहमिदं कृत्स्नं एकांशेन स्थितो जगत्। त्रिनाभिचक्रमजरमनर्वं, येनेमा विश्वाभुवनानि तस्थुः। सत्वरजस्तमोगुणरूपाः भूतभविष्यत् वर्तमान रूपा वा त्रयःनाभयः यस्य सर्वकारणस्य विनाशरहितस्य कालचक्रस्य वशे विश्वाभुवनानि दृश्यमानानि सर्वाणि भूतजातानि सुखेन वर्तन्ते। अस्मिन् मन्त्रे विश्वाभुवनानीत्यादिना सर्वेषां विश्वानां उल्लेखः कृतः। ततः क्षत्रम् बलम् ओजश्च जातम् तस्मात् परमात्मनः एव सर्वो विश्वः आयुरोजस्तेजोबलादिकं प्राप्नोतीत्यप्युक्तम्। यतः विश्वः पञ्चभूतात्मकः तेषामुत्पत्तिश्च वेदे कथिता।

तस्माद्वा एतस्मादात्म न आकाशस्सम्भूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। पृथिव्या ओषधयः। ओषधीभ्योऽन्नम्। अन्नात्पुरुषः। अर्थः स्पष्टः अस्ति। पृथिव्यापस्तेजोवायुराकाशा मे शुद्ध्यन्तां इति प्रार्थनापि क्रियते। इयं प्रकृतिः परमेश्वरेण सृष्टिकर्त्रा अन्तः वहिश्चअधिष्ठिता अस्तीत्यपि वेदेन ज्ञायते। **तत् सृष्ट्वा, तदेवानुप्राविशत् । तदनु प्रविश्य । सच्चश्चयच्चभवत्। अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः । यो रुद्रो अग्नौ यो अप्सु य औषधीषु यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु । विश्वमेवेदं पुरुषः तद्विश्वमुपजीवति। विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत्। सर्वोह्योषरुद्रस्तस्मैरुद्राय नमो अस्तु।** कृष्णयजुर्वेदीयः अग्निवाय्वादि शब्दाः न केवलं तत्तत् भौतिकपदार्थवाचकाः अपि तु तत्तत्पदार्थाधिष्ठातृ अग्निवाय्वादि तत्तद्देवतावाचकश्च ज्ञेयाः यतः कृष्णयजुर्वेदे पाञ्चभौतिकास्सर्वेपदार्थाः तेषां तत्त्वस्वरूपेण अर्थात् यथार्थस्वरूपेण वर्णिताः। 3.प्राचीनैः उपेक्षितस्य आत्मब्रहम साक्षात्कारप्रतिबन्धकस्य पाञ्चभौतिकविज्ञानस्य सांप्रतिके काले प्राधान्येन परिदृश्यमानत्वात् तत्प्राप्तये वेदोक्तवैज्ञानिकवषयेषु प्रायोगिकपरिशोधनस्यावश्यकता परिदृश्यते।

२. सूर्यचन्द्रादिखगोलविज्ञानम्

सर्वस्य आधारः कालः अस्ति। कालस्य गणना सूर्यगमनद्वारा क्रियते। अतः विश्वस्य आत्मा सूर्यः इति स एव सर्वान् लोकान् धरतीति प्रतिपादितः - **सूर्य आत्मा जगतस्तस्थुषश्च, मित्रोदाधार पृथिवी मुतद्याम् । मित्रः कृष्टीः - (तै सं ३-४-१०), येनेमाविश्वाभुवनानि तस्थुः (तै सं ३-११-२८,)** सूर्य एव स्वरश्मिभिः द्यावापृथिवी अन्तरिक्षं च धारयतीति मन्त्राणामाशयः। सूर्यकान्तिवेगःवर्णितः **तरणिर्विश्वदर्शतोज्योतिष्कृदसि सूर्य । विश्वमाभासिरोचनम् तै सं १-४-३१,३२,** सूर्यः स्वरोचिषा सर्वं विश्वं प्रकाशयति। अत्र भगवान् सायणाचार्यः - तथा च स्मर्यते योजनानां सहस्रे द्वे द्वे शते द्वे च योजने । एकेन निमिषार्धेन क्रममाण नमोऽस्तुते।।

In Public domain. Digitization Muthulakshmi Research Academy

सूर्यकान्तिः अर्धनिमेषकाले द्व्युत्तरद्विशतोत्तरद्विसहस्रयोजन(२२०२)पर्यन्तंआधुनिकगणनायांतु षोडशोत्तरपञ्चाशीतिसहस्रोत्तर एकलक्षयोजन पर्यन्तदूरं एकक्षणकाले प्रसरति।नवीनैरप्ययं विषयः आमोदितः।

३. चन्द्रगमनविज्ञानम्-आयं गौः पृश्निरक्रमीत्।असदन् मातरं पुनः। पितरं च प्रयन् त्सुवः। (तै सं १-५-३-१०) चन्द्रस्य गमनं प्रति अन्यापदेशेन अस्मिन्मन्त्रे वर्णितमस्ति। आधुनिक खगोलविज्ञानशास्त्रानुसारेण भूमेः उपग्रहस्थानीयः चन्द्रः भूमिं प्रदक्षिणीकुर्वन् भूम्या सह सूर्यं प्रदक्षिणीकरोति। यथा बालः मातरं नमस्कृत्य मात्रा सह पितरं नमतीतिवत्।

४.सूर्यगतिविज्ञानम्-सूर्यगमनविषये श्रुतिः- **अपश्यमहमेतत्सूर्यमण्डलं परिवर्तमानम् (तै .आ. - १-७-२२)।** गर्गस्य पुत्रः प्राणत्राता नामकः कश्चिन्महर्षिः वक्ति - महामेरौ एव परिवर्तमानं कश्यपाभिदं सूर्यमण्डलं प्रत्यक्षेणैव अहमपश्यम् इति। एतेन ज्ञायते न केवलं सूर्यः सूर्यकुटुम्बीयास्सर्वे ग्रहाः अस्मिन् विश्वे परिभ्रमन्तीत्युक्तम्। **कश्यपोऽष्टमः** इत्यादिना अष्टसूर्याः लोकान् प्रकाशयन्तीत्यप्युक्तम्। तेषु प्रथमः सूर्यः आरोगनामकः अस्माभिः परिदृश्यमानः अस्ति। अयं आरोगनामकः सूर्यः अस्मभ्यम् आरोग्यजीवनं ददातीत्यत एव आरोग्यं भास्करादिच्छेदिति प्रथा उत्पन्ना।

५. नक्षत्रगमनविज्ञानम्-कृत्तिकादिभरण्यन्त नक्षत्राणि तत्तदधिदेवता पूर्वकमुक्त्वा तेषामपि गमनमस्तीति निरूपितम्। कृत्तिका प्रभृति विशाखा पर्यन्तानि देवनक्षत्राणीति, अनूराधा प्रभृति भरणिपर्यन्तानि यमनक्षत्राणीति, देवनक्षत्राणि विश्वमण्डले देवलोकस्य समीपे दक्षिणां दिशं, अनूराधा प्रभृति भरणिपर्यन्तानि यमनक्षत्राणि यमलोकस्य समीपे उत्तरां दिशं परिभ्रमन्तीति तत्र प्रतिपादितमस्ति। एतादृश अपूर्व, अद्भुत अतीन्द्रियज्ञानदर्शिणां महर्षीणां कृते साष्टाङ्गप्रणामं विना किं कर्तुं शक्नुमो वयम् इदं कविभ्यः पूर्वभ्यो नमोवाकं प्रशास्महे। यैश्च शब्दज्ञानाह्वयं ज्योतिः आसंसारं प्रदीप्यते सुदीप्यते च। **कृत्तिकाः प्रथमम्। विशाखे उत्तमम्। तानि देवनक्षत्राणि। अनूराधाः प्रथमम्। अपभरणीरुत्तमम्। तानि यमनक्षत्राणि। यानि देवनक्षत्राणि तानि दक्षिणेन परियन्ति। यानि यमनक्षत्राणि तान्युत्तरेण।**

६. वायुविज्ञानम्-वायुस्साक्षात्परमात्म स्वरूपः इति स्तुतः - **नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि।** वराह प्रभृतयः पर्जन्यप्रवर्तकाः सप्तवायवस्सन्तीतिआरुणीश्रुतिः अभिवदति। पर्जन्यास्सप्त पृथिवीमभिवर्षन्ति। वृष्टिभिरिति। सप्तभिर्वायुगणैः प्रवर्तिताः सप्तविधमेघाः अस्माभिः दृश्यमानाभिः वृष्टिभिः पृथिवीमभिलक्ष्यवर्षन्ति। निराधारे अन्तरिक्षेमेघानां सम्पादनं, तेषु पर्जन्येषु बहुविध जलसंग्रहणं, यस्य देशस्य यावदपेक्षितं जलं तावत् वर्षणं इत्यादेः कारणं परमात्मस्वरूप वायुमहिमैवेति वेदर्षीणामाशयः।

७. सूर्यरश्मिविज्ञानम् -तैत्तिरीयारण्यके प्रथमे अरुणप्रश्ने अभिवर्णितः। सूर्यरश्मयः जलग्रहण, जलप्रदानसमर्थाः इति वर्णितः। **इतस्सिक्तगुं सूर्यगतं चन्द्रमासे रसं कृधि। वारादं जनयाग्रेऽग्निम्।** अस्मिन् मन्त्रे सूर्यः स्व रश्मिभिः भूमिंगतं जलं शोषयित्वा गृह्णातीत्युक्तम्। अत एव आपः सूर्ये समाहिताः इति ताः आपः सर्वाः सूर्ये एकत्रिताः। सूर्यरश्मयः मेघनिर्माणसमर्थाः।सूर्यरश्मीनां सकाशादेव अभ्राणि जलं स्वीकृत्य अभिवर्षन्ति सस्यादिकमुत्पादयन्ति चेत्यर्थः।

८. ऋतुधर्मसंपादकाः सूर्यरश्मयः -अत्र आरुणिकी श्रुति वदति - **स्थात्रे रेजन्ते विकृतानि रूपशः।** अस्यार्थः -सूर्यरश्मयः वसन्तादि ऋतुस्वरूपाः भूत्वा जगतः स्थित्यर्थं शीतोष्णादि विलक्षणं स्वरूपं प्राप्य प्रवर्तन्ते। दिग्भ्राजऋतून् करोतीत्यन्यो मन्त्रः तत्रत्य एव वदति - सूर्याः एव प्राच्याद्युपलक्षित दिग्विशेषु व्यवस्थितास्सन्तः वसन्तादिसूचितान् ऋतुधर्मान् कुर्वन्तीत्यत्र - रश्मि रश्मिमतोरभेद एव इति न्यायं स्वीकृत्य उक्तः।

In Public domain. Digitization Muthulakshmi Research Academy

९. जलविज्ञानम्-आपो वै भेषजम्, भेषजमेवास्मै करोति सर्वमायुरेति (तै आ १-२६-११०)। भेषज स्वरूपाः आपः आयुर्दानसमर्थाः इति वर्णितम्। **दिव्या आप ओषधयः** आपः पवित्राः, ओषधश्च, **आपो ज्योतीरसोऽमृतम् - तै उ नारायणं ३७-२२** आपः अमृतरसस्वरूपाः इत्यभिवर्णितम्। आपः अस्माभिः कलुषिता न कार्याः इति निषेधं विधत्ते वेदमाता।नाप्सुमूत्रपुरीषं कुर्यात् ननिष्ठीवेत् न विवसनः स्नायात् (तै अ 1-26112) **अप्सु मे सोमो अब्रवीत्। अन्तरिश्वानि भेषजा। अग्निं च विश्वशम्भुवम्। आपश्चविश्वभेषजीः(तै ब्रा ५-२-८)** इति श्रुतिः अप्सु अपमृत्यु रोगनिवारक ओषधयः, जगतः सुखदायकः अग्निः अपि अस्तीति, सर्वारिष्टनिवारकौषधिरूपाः आपः इति वर्णयति। आधुनिकैः वैज्ञानिकैः soft water and hard water इति द्विविधमेव जलं निरूपितम् - कृष्णयजुर्वेदे जलस्य विभागाः, तेषां प्रयोजनं(उपयोगश्च) दर्शितम्

१. वर्ष्याः Rainwater २. कूप्याः well water ३. स्थावराः stagnant ४.वहन्तीः Flowing water ५. संभार्याः Pot water (Tap water) ६. पल्वल्याः Water of lakes. एतेषु प्रत्येकं जलं विभिन्न फलदायकमस्ति। **वर्ष्या गृह्णाति, कूप्याः, स्थावराः, वहन्तीः, संभार्याः, पल्वल्याः गृह्णाति। (तै आ १-२४-९९-१०१)**

१. वर्ष्याः आपः ब्रह्मवर्चसं यच्छन्ति २.कूप्याः आपः तेजः ददति ३. स्थावराः आपः स्थिरत्वं दिशति।४. वहन्त्यः आपः बलं वितरन्ति ५. संभार्याः आपः समरूपतां अतिसृजन्ति ६. पल्वल्याः आपः ऊर्जं यच्छन्ति अप्सु विद्यमानं अमृतं औषधस्वरूपं धृत्वा रोगान् नाशयति। अप्सु अन्तः अमृतमप्सु भोषजम् अपामृत प्रशस्तिष्वस्वाभवथवाजिनः। अप्सु विद्यमानः रसः अमृततुल्यः भूत्वा तस्य नियमपूर्वक ग्रहणेन ओजः, तेजः, वर्चः, पुष्टिः, प्रजननसामर्थ्यं दीर्घायुश्च ददति - **अपां यो द्रवणे रसः। तमहमस्मा आमुष्यायणाय पुष्ट्यै प्रजननाय गृह्णामि, ओजसे, वीर्याय, आयुषे, दीर्घायुत्वाय गृह्णामि।** जलं हि जीवनम् इति लोक प्रशस्तिः अस्मादेवोत्पन्ना। इत्थं जलविज्ञान विषये कृष्णयजुर्वेदे बहुत्र बहुधा बोधितमस्ति।

१०. कालुष्यनिवारक वायुविज्ञानम्- आधुनिक मानवस्य जीवनविधानं स्थल जल शब्द वायु कालुष्यकारकाश्च भवति। मानवः पञ्चभूतान् प्रदूषितान् कर्तुं समर्थस्सञ्जातः। अतः वाय्वादय एव स्वयं कालुष्य निवारकाश्च भवन्त्विति संप्रार्थ्यते अनेन मन्त्रेण **आवातवाहि भेषजं विवातवाहि यद्रपः। त्वं हि विश्वभेषजो देवानां दूत ईयसे। द्वा विमौ वातौ वातः, आसिन्धोरापरावतः दक्षं मे अन्य आवातु। परान्यो वा तु यद्रपः यददो वातते गृहे अमृतस्य निधिर्हि तः। ततो नो देहि जीवसे ततो नो धेहि भेषजम्, ततो नो मह आवहवात आवा तु भेषजम्। (तै आ ४ - ४१ - ८४-८९)।** हे वायो! त्वं अस्मान् प्रति भेषझं यदा भवति तथावातं कुरु। यद्रपः पापं कालुष्यमस्तिं तत् विश्लेष्य निर्मल्य गच्छ। यस्मात् त्वं विश्वस्य चिकित्सकः देवानां दूतश्चासन् गच्छसि खलु। लोके दृश्यमाने शान्तः तीव्रः इति द्वौ वायू। एकः समुद्र(जल) समीपदेशवर्ती। अपरः साधारण लोकप्रदेशे वरीवर्ति। तयोर्मध्ये शान्तः वायुः अस्माकं सुखं संपादयतु। अन्यस्तीव्रः वातः यदस्ति तन्मम पापप्रदूषणरूपं यदस्ति तद्विनाशयतु इति परमेश्वरस्वरूपः वायुः प्रार्थ्यते। हे वातः तेजश्च संपादय इति अनया प्रार्थनया ज्ञायते वायुः ओषधी स्वरूपः जीवनदायकः रोगादि दोषनिवारकश्च ।

११. वृक्षविज्ञानम्-कालुष्यदोषं निवार्य सर्वप्राणिनां जीवनदाने वृक्षाणामतिमहत्वं वर्तते इति सर्वे जानन्ति। वृक्षच्छेदनं न कदापि भवेत्। वृक्षाणां सदैव स्वस्तिर्भवत्विति वेदमात्राशयः **आरात्ते अग्निरस्त्वरात् परशुरस्तु ते।** हे वृक्षाः तेभ्यः अग्निः दूरेति तिष्ठतु। अस्माकं परशुः दूरे अस्तु। सदा तव जलसेचनं भवतु। ते च मे च स्वस्तिरस्तु। हे वनस्पते - अनेन मन्त्रेण ज्ञायते यत् वृक्षमानवयोः मिथः आधाराधेयभावः अस्ति। अतः

In Public domain. Digitization Muthulakshmi Research Academy

वृक्षच्छेदः न कार्यः, दावाग्निः निवारणीयः। वृक्षाणां दोहदः यथा भवति तथा मानवैस्सर्वैः कर्तव्यमिति। वृक्षाणां योगक्षेमयोरेव अस्माकं योगक्षेमौ निहितावास्ताम्। **ओषधयश्शान्तिः वनस्पतयश्शान्तिः, तै आ ४ - ४२, नमो वृक्षेभ्यो हरिकेशेभ्यः - (तै सं ४ - ५-२५,) अरण्यानीमशगुं सिषं।(तै ब्रा २ -५- २४)।** एते सर्वे कृष्णयजुर्वेदीयाः मन्त्राः वृक्षविज्ञानदायकास्सन्ति। अत एव धर्मो रक्षति रक्षितः इतिवत् वृक्षो रक्षति रक्षितः इति प्रथा उत्पन्ना। केनचन कविना वृक्षाः सत्पुरुषा इति, वदान्येषु गुरुः वृक्ष इति च मत्वा तेभ्यः वन्दनमाचरितम्। छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे फलान्यपि परार्थाय वृक्षा सत्पुरुषा इव।। धत्ते भरं कुसुमपत्र फलावलीनां घर्मव्यथां वहति शीतभवां रुजं च यो सर्वमर्पयति चान्य सुखस्य हेतोः तस्मै वदान्यगुरवे तरवे नमोऽस्तु।।मूलं भुजङ्गैः शिखरं प्लवङ्गैः शाखा विहङ्गैःकुसुमानि भृङ्गैःनास्त्येव तच्चन्दन पादपस्य यन्नाश्रितं सत्वभरैः समन्तात्।। पत्र पुष्प फलच्छायामूलवल्कलदारुभिः गन्धनिर्यासभस्मास्थि तोक्मैः सर्वान् कामान् वितन्वते।। इति प्रशंसापि कृतास्ति।

१२. वर्षसंपादनविज्ञानम् -अग्नौ प्रास्ताहुतिस्सम्यगादित्यमुपतिष्ठते आदित्याज्ञायते वृष्टिः वृष्टेरन्नं ततः प्रजाः।। इति भगवता मनुना उक्तम्। प्राचीनाः भारतीयाः यज्ञाद्यनुष्ठनेन वृष्टिं संपादयन्ति स्म। देवतोद्देशेन द्रव्यत्यागः एव यागः। यागेषु गोघृतेनसाकं विशिष्ट ओषधीनां प्रयोगः भवति स्म। तेषु पुनर्नवानाम काचनौषधिः वष्ट्युत्पादन समर्थः अस्ति। **हिरण्यकेशो रजसो विसारेऽहिर्धुनिर्वात इव ध्रजीमान्। शुचि भ्राजा उषसो न वेदा यशस्वती रपस्युवो न सत्याः - (तै सं ३ -१-११-३८, ३९)।** अत्र भाष्यकर्ता श्रीमान् सायणाचार्यः - सोऽयं पुनर्नवजन्योधूमः हिरण्यकेशः अग्निकेशस्थानीया ज्वाला धूमेन सह उत्पद्यते। रजसो मेघरूपस्य विसारे प्रसरणे यथा वायुः कम्पमानः शीघ्रगतियुक्तः तद्वदयं मेघात्मा सोऽयमीदृशः धूमः अस्मदर्थं वृष्टिं उत्पादयतु। उषसो न वेदाः सूर्योदयो यथा न ज्ञायते तथा मेघसमृद्धिरस्तु इत्यर्थः। अनेन ज्ञायते यत् प्राचीनाः सकाले सस्यानुकूलान् वर्षान् संपादयन्तीति।

१३.पृथिवीप्राशस्त्यम्- स्योना पृथिवि भवानृक्षरा निवेशनी। यच्छानश्शर्म सप्रथाः। भूमिर्धेनुर्धरणी - लोकधारिणी। मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितः (तै उ ४ - १ ८) इत्यादि मन्त्रैः पृथिवी १.जरायुज २. अण्डज ३. स्वेदज ४. उद्भिज रूप चतुर्विध प्राणिजातस्य आधारभूता इति उक्त्वा सा पृथिवी सर्वदा मम तुष्टिं पुष्टिं च प्रददात्विति प्रार्थिता।

१४. वैद्यविज्ञानम्-तैत्तिरीयसंहितायाम् चतुर्थकाणडे रुद्राध्याये रुद्रः प्रथमभिषक्त्वेन वर्णितः। **प्रथमो दैव्यो भिषक् (तै सं ४ -५ छ १२)। अहीगुश्च सर्वान् जम्भयन्त्सर्वाश्च यातुधान्यः। असौयस्ताम्रो अरुण उत्त बभ्रुसुमङ्गळः।** आदि भिक्षुः शिवः आदिभिषक्त्वेन सकलप्राणिनां रुजा रूपं हलाहलं स्वीकृत्य जगन्मोहिनी रूपेण अमृतप्रदानेन आयुरारोग्यैश्वर्यादिरूप सौमङ्गळ्य प्रदानात् सुमङ्गळः इत्यप्यभिवर्णितः। देवेषु अश्विनौ देवभिषजावित्यभिवर्णितौ। अश्विनौ हि दैवानां भिषजौ। तौ जरा ज्वरादि निवारकाणि, नवयौवन आयुर्वर्धकानि च औषधानि तत्तत् ओषधीप्ररोहण स्थानानि च जानीतः स्म। या जाता ओषधयो देवेभ्यस्त्रियुगं पुरा। मन्दामिदभ्रूणामहगं शतं धामानि सप्त च। शतं वो अम्ब धामानि सहस्रमुतवो रुहः। अधाशत क्रत्वोयूय मिमं मे अगदंकृत। पुष्पावतीः प्रसूवतीः फलिनीरफला उत। अश्वा इवं स जित्वारीर्वीरुधः पारयिष्णवः। ओषधीः मातृस्वरूपाः उक्ताः। ओषधीरिति मातरस्तद्वोदेवी रुपब्रुवे। देवभिषग्भ्यामश्विनीभ्यां महर्षये च्यवनाय जरानिवारणपूर्वकं यत् नवयौवनं औषधप्रदान द्वारा अनुगृहीतं तदेवात्र निदर्शनम्। **न केवलं पुरुषवैद्याः स्त्रीवैद्याः अपि वेदे वर्णिताः। अश्विनायज्ञगुं सविता सरस्वती। इन्द्रस्यरूपं वरुणो भिषज्यन् (तै ब्रा २ - ४ - ६)**

In Public domain. Digitization Muthulakshmi Research Academy

इति मन्त्रे अश्विनी देवते, सविता, सरस्वती, वरुणः इति चत्वारः वैद्याः इन्द्रस्य चिकित्सां अकुर्वन् इति वर्णितमस्ति।

१५. शरीराङ्ग रोगनिवारणविज्ञानम्-शरीरावयव विज्ञानेनसह विविधरोगोद्भवस्थान तन्निवारकं विज्ञानमपि पूर्वजानामासीदिति विज्ञायते। **त्वक् चर्म मागुंस रुधिर मेदो मज्ञा स्नायवोऽस्थीनि मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासग्ग् स्वाहा, अन्नमय, प्राणमय, मनोमय, विज्ञानमयमानन्दमयमात्मा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयसग्ग् स्वाहा(तै उ.४ - ६६ - ८४।** इत्यादिना तैत्तिरीय महानारायणोपनिषदुक्तैः मन्त्रैः ज्ञायते यत् शरीरस्य आन्तरिकभागानां ज्ञानं, पञ्चकोशविज्ञानं, तत्र रोगादि निवारणाय मानसिकस्थैर्यस्य आवश्यकता इत्यादयः उपवर्णिताः। अहो कीदृशी ऋषीणां सूक्ष्मपरिशीलना शक्तिः। राजयक्ष्म कुष्ठापस्मारादिभयंकररोगाः, राजयक्ष्मणः(cancer) शरीरे शीघ्र प्रसारणं, तन्निवारकं मनोबलं एवेति प्रतिपादितम्। तैत्तिरीय ब्राह्मणस्य द्वितीयकाणडे षष्ठप्रपाठके यकृत्, क्लोम, आन्त्र, प्लीह, नाभि, उदराद्यवयवानां, शुक्र पुरीष, श्मश्रु, चक्षुः पक्ष्माद्युत्पत्तिः। तत्रत्य रोगाणां निवारणप्रकारः उपवर्णितः अस्ति। **अक्षीभ्यान्ते नासिकाभ्यां कर्णाभ्यां चुबुकादधि। यक्ष्मगुं शीर्षण्यं मस्तिष्काज्जिह्वा या विवृहामिते। ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्योऽनूक्यात्। यक्ष्मं दोषण्यमगुंसाभ्यां बाहुभ्यां विवृहामिते। आन्त्रेभ्यस्ते गुदाभ्योवनिष्ठोर् हृदयादधि। यक्ष्मं मतस्नाभ्यां यक्नः प्लाशिभ्यो विवृहामिते। व्यऊरुभ्यान्तेऽष्ठीवद्भ्यां जंघाभ्यां प्रपदाभ्यां। यक्ष्मग्ग् श्रोणीभ्यां भाससाध्वगुं ससो विवृहामिते। मेहनाद्वलंकरणाल्लोलमभ्यस्ते नखेभ्यः। यक्ष्मगुं सर्वस्वादात्मनस्तमिमं विवृहामिते। अङ्गादङ्गाल्लोम्नो लोम्नोजातं पर्वणि पर्वणि। यक्ष्मगुं सर्वस्मादात्मनस्तमिमं विवृहामिते। कृष्णयजुर्वेदीय एकाग्निकाण्डः १ - १८**

एतेषां मन्त्राणां परिशीलनेन इदं स्पष्टं ज्ञायते यत् वैदिकानामार्याणां, अस्थि, मज्ञा, स्नायुः, धमनिः या हृदयगता प्रधाननाडिः, ग्रीवावयवगतानि चतुर्दश अस्थीनि, क्लोम-हृदय समीपस्थ मांसपिण्डविशेषः, कीकसा - वक्षोगतास्थिविशेषः, अनूक्याः प्लाशि - बहुच्छिद्रमलपात्रं इत्यादीनां आन्तर शरीरभागादीनां सूक्ष्मं विज्ञानमासीत्। उद्यन्नद्यमित्रमहः आरोहन्नुत्तरां दिवं। हृद्रोगादि रोगनिवारणाय सूर्यनमस्कारादि उपाया उक्ताः। **हृद्रोगं मम सूर्य हरिमाणं च नाशय। शुकेषु मे हरिमाणं। रोपणाकासु दध्मसि। तै आ १।** बाधिर्य निवारणार्थोऽयं मन्त्रः - **कामिहैकाकः इमे पतङ्गाः। मान्थालाः कुलिपरिमापतन्ति। अनावृतैनान् प्रथमन्तु देवाः। सौपर्णं चक्षुस्तनुवा विदेय।** इत्थं मणि मन्त्रौषधि यन्त्रतन्त्राद्युपयुज्य रोगनिवारणज्ञानमपि कृष्णयजुर्वेदे प्रतिपादितमस्ति। एते प्रयोगास्सर्वेऽपि अवश्यं फलदायकाः निरूपिताः।

१६. कृषिविज्ञानम् -वैदिकयुगे जनाः कृषिविज्ञानेऽपि परमनिपुणाः आसन्। तत्कालीनाः ये कर्षकाः आसन् तेषां भूमेः क्षार, उर्वरादिकायाः भेदस्य ज्ञानमसीत्। ते सस्यक्षेत्रणां कृते विविधाः जलसेचन पद्धतयोऽपि जानन्ति स्म। यथा मेघवर्षजलद्वारेण तटाक, सरोवर, जलाशय, नदीभ्यः, कुल्यानां, जलप्रवाहाणां खनन द्वारा जलानयन पद्धतिं जानन्ति स्म। वैदिकवाङ्मये क्षेत्रकर्षण, बीजावापन, सस्यवर्धन, खलादिषु धान्य लवन हननादीनि कृषिकार्याणि सर्वाणि सुविशदं वर्णितानि सन्ति। ऋग्वेदीयं अक्षसूक्तं पूर्णतया कृषिविज्ञानप्रदायकमस्ति। **युनक्तसीना वियुगातनोत कृते योनौ वपतेह बीजम्। गिरा च सृष्टिस्सभरा असन्नो नेदीय इत्सृण्यापक्कमायत्। लाङ्गलं पवीरवगुं सुषेवगुं सुमीतित्सरु। उदित्कृषति गामविं प्रफर्व्यं च पीवरीम्।** जलसमृद्धक्षेत्राणि नदीमातृकाणि, मेघजलाधारितक्षेत्राणि देवमातृकाणीति प्रसिद्धिः लोके दृश्यते। तेषु प्रवृद्धानां

विविध सस्यानां नामान्युक्तानि। **व्रीहयश्च मे यवाश्च मे माषाश्च तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसुराश्च मे प्रियंगवश्च मेऽणवश्च श्यामाकाश्च मे नीवाराश्च मे।** कृष्टपच्या नाम लाङ्गलकर्षित क्षेत्रेषु प्रवृद्धाः, अकृष्टपच्याः, विनाकर्षणं वर्षसाहाय्येन क्षेत्रेषु स्वयं प्रवृद्धाः इति द्विविधाः अपि सस्याः मानवकल्याणाय समृद्धा भवन्तु इति भावनया ते कृषिकार्यं कुर्वन्ति स्म।

कृष्टपच्यं मे अकृष्टपच्यं च मे ग्राम्याश्च मे पशव आरण्याश्च यज्ञेन कल्पन्ताम्। कृषिकार्याय पशुनामावश्यकता वर्तते। अतः विविधानां पशूनां प्रसक्तिरत्रास्ति। उक्षा च मे वशा च मे ऋषभश्च मे

In Public domain. Digitization Muthulakshmi Research Academy

वेहच्च मे अनड्वान् च मे धेनुश्च मे। (तै सं ४ - ७ पृष्ठ १०)। व्यवसाय साधन निर्मातृणां च उल्लेखः अस्ति। **नमस्तक्षभ्यो रथकारेभ्यश्च वो नमोनमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमः - तै सं ४ ष ५ १७.**
सूद(Fertilizers)विज्ञानम् प्रजापतिः प्रजा असृजत। तासामन्नुपाक्षीयत। यस्य सूदस्सम्भारो भवति। नास्य गृहेन्नं क्षीयते।(तै ब्रा १-२ -१) यथा वै लाङ्गलेनोर्वरां प्रभिन्दन्त्येव मृक्सामे यज्ञं प्रभिन्दन्तो यन्मैत्रावरुणीं दशामालभते यज्ञायैव प्रभिन्नाय मत्यमन्ववास्यतिशान्त्यै।(तै सं ६-६-७) इत्यादि मन्त्रेष्युक्तमस्ति। एकदा प्रजापतिना सृष्टानां प्रजानां अन्नह्रासे सति ग्रीष्मकालेऽपि अशुष्यमाणेभ्यः जलाशयेभ्यः कर्दमं आनीय सस्यक्षेत्रेषु विक्षेपेण सस्य समृद्धया प्रजाः अन्न समृद्धा आसन्निति कृषिकार्याय लाङ्गलेन - हलेन क्षेत्रकर्षणानन्तरं गोमयादिरूप मत्य - अर्थात् सूद प्रक्षेपणे (Manures or fertilizers) कृते सति, तेषु क्षेत्रेषु समृद्ध सस्योत्पादनशक्तिः वर्धिता भवतीति। अनेन समस्त विज्ञानखनिः वेदराशिः इति सुस्पष्टं विज्ञायते।

१८. कुल्याखनन विज्ञानम्- यथालोके स्थापत्य (Engg) विज्ञानः ग्राम, नगर, सस्यक्षेत्राणां कृते जलानयनाय कुल्यादि निर्माणार्थ तत्त्प्रदेशपरीक्षणं कृत्वा तदनन्तरं तत्कार्यं संपादयन्ति तथा देवेन्द्रः जलप्रतिरोधक पर्वतवृक्षादीन् स्ववज्रेण छित्वा नद्यादि जलप्रवाह निर्माणमकरोदिति कृष्णयजुर्वेदे अस्ति। अवधारयन्तु इमं मन्त्रं **बुध्नादग्रेणविमिमाय मानैर्वज्रेण खान्यतृणन्नदीनां। वृथा सृजत्पथिभिर्दीर्घयातै स्सोमस्य तामद इन्द्रश्चकार।(तै सं २ - ३- १४)**

१९. विद्युत्, अशनि विज्ञानम् -विद्युत्सूर्ये समाहिता। सूर्यरश्मिरेव विद्युदाकारेण परिणता अस्तीत्य...... श्रुतिर्वक्ति। अपां वा एतन्मध्याज्ज्योतिरजायत।(तै आ ४ - १०) मरुतोद्भिरग्निमतमयन्। त... तस्य हृदयमाच्छिन्दन्। सा अशनिरभवत्।(तै ब्रा - १ - १) इति मन्त्रैः तैत्तिरीया श्रुतिः उदकादेव विद्यु... वक्ति। सूर्यरश्मिरूपाविद्युत् अग्निशक्तिरेव अशनिरिति च अशनेः उत्पत्तिप्रकारः अत्र वर्णितः अस्ति।

२०. पृथिवी विज्ञानम् - न खगाः रात्रौ भूमाववतरन्ति। रात्रि समये तैरियं भूमिः अग्निरूपेण दृश्यमानत्वात् आधुनिकभौतिकशास्त्रज्ञैः रात्रौ भूमिः विद्युदयस्कान्त तरङ्गान् प्रसारयति इत्यङ्गीकृतम्। **सर्वा वा इयं वयोभ्यो नक्तं दृशे दीप्यते। तस्मादिमां वयागुंसि नक्तं नाध्यासते। (तै सं ५-६-१८) यद्विज्ञानं अन्यत्रा... तदत्रास्त्येव। यन्नेहस्ति न तत् क्वचिदप्यस्ति। इत्थं कृष्णयजुर्वेदः ज्ञानसमुद्रमिति सुस्पष्टमिति शम्**

भारतीयसंस्कारेषु पारलौकिकसंस्काराणां महत्त्वम्

जि. शिवप्रसादशर्मा

अस्माकं भारतदेशः कर्मभूमिरिति प्रथितः। "जन्मना जायते शूद्रः, संस्काराद्द्विज उच्यते"। इति मनुस्मृत्युक्तदिशा प्रत्येकमपि मानवः जन्मना शूद्र एव। कर्मणा इत्युक्ते वेदविहितसंस्काररूपकर्मणा संस्कृतस्सन् द्विज इति कथ्यते।ते च संस्काराः गर्भाधानाद्यन्त्येष्टिपर्यन्ताः षोडश वर्तन्ते। इमे संस्काराः पूर्वापररूपेण द्विप्रकाराः भवन्ति। तत्र गर्भाधानादिविवाहान्ताः पञ्चदशसंस्काराः पूर्वसंस्कारा इति कथ्यन्ते। अन्त्येष्टिरूपषोडशसंस्कारः अपरसंस्कार इति कथ्यते। मृतस्य पितुः पुण्यलोकावाप्त्यर्थं पुत्रस्य अवश्यं कर्तव्येषु कर्मसु मुख्यतमं कर्म श्राद्धम्। प्रकृते तस्य महत्त्वं तत्प्रकाराः विस्पष्टं प्रपञ्च्यन्ते।

श्राद्धपदनिरुक्तिः- "प्रज्ञाश्रद्धार्चाभ्योऽणः" अनेन पाणिनीयसूत्रेण श्रद्धापदस्य अण् प्रत्यये कृते श्राद्धमिति पदं निष्पद्यते। श्रद्धा इत्यस्मिन् पदे श्रत् धा पदद्वयं वर्तते। श्रत् इत्यस्य पदस्य पूजनीयव्यक्तीनाम् आस्तिक्यभावेन मनश्शुद्ध्या पूजनमित्यर्थः। धा इति पदं डुञ् धाञ् धारणपोषणयोरिति धात्वर्थानुसारेण श्रद्धेयव्यक्तीनां तृप्त्यर्थं, तृप्तैस्तैर्ब्राह्मणैः

In Public domain. Digitization Muthulakshmi Research Academy

स्ववंशशुभाभ्युदयपरम्परा निमित्तं क्रियमाणः कर्मविशेषः श्राद्धपदवाच्यः। श्राद्धपदं बहवः स्मृतिकाराः बहुप्रकारेण जगदुः। **संस्कृतव्यञ्जनाद्यञ्च पयोदधिघृतान्वितम्। श्रद्धया दीयते यस्मात् श्राद्धं तेन प्रकीर्तितम्॥**

पयोदधिघृतसमन्वितं संस्कृतव्यञ्जनान्नादिकं श्रद्धापूर्वकं ब्राह्मणेभ्यः प्रदानं श्राद्धमिति पुलस्त्यः निरवोचत्॥

रुद्रधरः– श्राद्धविवेके – श्राद्धं नाम वेदबोधितपात्रालम्भनपूर्वकप्रमीतपित्रादिदेवतोद्देशकः द्रव्यत्यागविशेष इति।

श्राद्धप्रकाशे – देशकालपात्रेषु पितृद्देश्येण हविस्तिलदर्भमन्त्रश्रद्धादिभिः दानं श्राद्धम्।

श्राद्धसारे – होमश्च पिण्डदानञ्च तथा ब्राह्मणतर्पणम् । श्राद्धशब्दाभिधेयं स्यात् एकस्मिन्नौपचारिके ॥

अधिष्ठातृदेवतोद्देश्यहोमः, पितृभ्यः पिण्डप्रदानं, भोजनादिना ब्राह्मणतृप्तिश्च त्रय एते मिलित्वा श्राद्धपदस्य औपचारिकार्थे प्रयुज्यन्ते। **हेमाद्रिः –** ब्राह्मणरूपाधिष्ठाने वसुरुद्रादित्यपितृमत्सोमाङ्गिरसयमकव्यवाहनाग्नि सोमपाज्याग्निष्वात्तादीनां महामहिम्नां पितृरूपाणां देवतानामाराधनमुच्यते। आराधनञ्च मनसः प्रीणनम्, तस्य चोपायः श्राद्धलक्षणं कर्म " इति।

श्राद्धविवेककर्ता शूलपाणिः – सम्बोधनपदोपनीतान् पित्रादीन् चतुर्थ्यन्तपदेन उद्दिश्य हविस्त्यागः **श्राद्धमिति**। पित्रे, पितामहाय, वसुरूपाय ,रुद्ररूपाय, आदित्यरूपायेति प्रमीतपितृनुद्दिश्य हविस्त्यागः श्राद्धमिति तस्यार्थः।

श्राद्धस्य आवश्यकता – मानवशरीरं षट्कोशात्मकं भवति। मातृतः त्रयः कोशाः, पितृतः त्रयः कोशाः पुरुषं सङ्क्रामन्ति। अस्थीनि, नाड्यः, मज्जा इति त्रयः पितृशरीरात् पुत्रः प्रप्नोति। अतः पुत्रेण प्रमीतमातापितरौ उद्दिश्य अवश्यं यथाशास्त्रं श्राद्धं समाचरणीयमेव। अन्यथा पितरः तस्य रक्तं पिबन्ति। उक्तञ्च आदित्यपुराणे।

न सन्ति पितरश्चेति कृत्वा मनसि यो नरः। श्राद्धं न कुरुते तत्र तस्य रक्तं पिबन्ति ते॥

दैवकार्यादपि पितृकार्यस्य अधिकं महत्त्वं प्रतिपादितम्।

दैवकार्यादपि सदा पितृकार्यं विशिष्यते। देवताभ्यः पितृणां हि पूर्वमाप्ययनं स्मृतम्॥
तेषामारक्षभूर्तन्तु पूर्वं दैवं नियोजयेत् ॥

श्राद्धे प्रधानदैवतानि पितर एव। किन्तु श्राद्धरक्षार्थं दैवाद्यान्तं प्रकल्पितम्।तदुक्तम् देवलस्मृतौ॥

दैवाद्यं नैव कुर्वीत दैवान्तं नैव कुत्रचित्। दैवाद्यन्तं प्रकुर्वीत श्राद्धं रक्षार्थहेतुना॥

दैवाद्यमित्युक्ते विश्वेदेवा इति, दैवान्तं नाम महाविष्णुः कथ्यते। तत्र प्रथमं विश्वेदेवाः के? तेषां उत्पत्तिः कथमासीत्? इत्यादयो विषयाः ज्ञातव्याः। **ब्रह्माण्डपुराणे** विश्वेदेवतानाम् उत्पत्तिः तेषां वृत्तान्तश्च उपलभ्यते।दक्षप्रजापतेः दुहिता विश्वादेवी, तस्याः सुताः विश्वाख्याः। ते सर्वे हिमवच्छिखरे ब्रह्माणमुद्दिश्य उग्रं तपः चेरुः। तपःप्रभावेण पितृभिस्साकं ब्रह्मदेवःतेषां साक्षात्कृत्य भवतां तपसा सन्तुष्टोऽहम्, यथेष्टं वरं वृणीध्वमिति तानुवाच। तदा ते विश्वाख्याः श्राद्धे पितृभिस्साकमस्माकमपि भागं भवेदिति ईषुः। ब्रह्मदेवःश्राद्धेतेषां पितृभिस्साकं भागं प्रासादयत्। पितृभिरपि इदं वरं प्रतिश्रुत्य श्राद्धे पूर्वं भवतामर्चनादिकं भवति।विसर्जनन्तु अस्माकं पूर्वं भवति। श्राद्धे रक्षणार्थं एषा प्रक्रिया उपकल्पिता। इमे विश्वेदेवाः बृहस्पतिस्मृतौ दश प्रोक्ताः।तेषां नामानि एवं वर्तन्ते।

क्रतुर्दक्षो वसुस्सत्यो कालः कामस्तथैव च। धुरिश्च रोचनश्चैव तथा चैव पुरूरवाः।
आर्द्रवाश्च दशैते तु विश्वेदेवाः प्रकीर्तितः॥ एते एषु श्राद्धेषु विभज्य विनियोज्याः॥
इष्टिश्राद्धे क्रतुर्दक्षः सत्यो नान्दीमुखे वसुः नैमित्तिके कालकामौ काम्ये च धुरिलोचनौ

In Public domain. Digitization Muthulakshmi Research Academy

पुरूरवा आर्द्रवाश्च पार्वणे समुदाहृतौ॥

अत्रेदमाशङ्क्यते पुरूरवा-आर्द्रवसावित्यत्र विशेषणवाचकपदस्य कथं द्विवचनान्तता सङ्गच्छते? इति चेदुच्यते। विंशत्याद्यास्सदाइकत्वे इति शासनात् शतं ब्राह्मणा इत्यादौ विशेषणवाचकशतपदस्य एकवचनान्तत्वेऽपि बहुत्वविशिष्टविश्वेदेवान्तर्गतत्वेन पूरूरवार्द्रवसौ विश्वेदेववर्गे अन्तर्गतत्वेन द्वित्वविशिष्टपूरुरवप्रभृतीनां द्वितीयान्तत्वेऽपि विश्वेदेवस्य बहुवचनान्तश्च। विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसङ्ख्याविरुद्धसङ्ख्याया अविवक्षितत्वं,. तत्र विशेष्य - विशेषणपदयोः समानवचनत्वनियमः। प्रकृते पुरूरवा- आर्द्रवसौ विश्वेदेवा इत्यादौ द्वित्वविशिष्टयोः पुरूरव आर्द्रवस् प्रभुत्यो: विशेषणतया विवक्षितत्वमेव अस्ति। अतः तद्वाचकपदस्य द्विवचनान्तता। द्विवचनान्तत्वेन विवक्षितत्वञ्च विश्वान् देवान् इति प्रमाणसिद्धमेव। प्रयोगेऽपि पुरूरवा-आर्द्रवस्सञ्ज्ञकान् विश्वान् देवान् भवात्सु आवाहयिष्ये इति दर्शनाच्च। ये तु विश्वेषां देवानामुत्पत्तिं नामादीनि न जानन्ति। तेषामधिकार एव न स्यात् इति चेत् न तेषामप्यधिकारः दर्शितः वायुपुराणे-

उत्पत्तिर्नाम वै तेषां न विदुर्ये द्विजातयः। अयमुच्चारणीयस्तैः श्लोकश्श्रद्धासमन्वितैः।
आगच्छन्तु महाभागा विश्वेदेवा महाबलाः। ये यत्र विहिताश्श्राद्धे सावधान भ्वन्तु मे।
इत्यनेन श्लोकपठनेन सोऽपि श्राद्धार्ह एव भवति।

पितृगणाः - पूर्वं ब्रह्मदेवः सर्गार्थं देवान् असृजत्। अनेन मा यजध्वमिति ब्रह्मणा निर्दिष्टाः ।तं विहाय फलार्थिनस्स्न्तः यज्ञान् कृतवन्तः। तेन कृद्धो ब्रह्मा यूयं प्रभ्रष्टज्ञानिनः भवत। इति तान् अशपत्। एवं ब्रह्मणा शप्ताः देवाः अनन्तरं पुनः ब्रह्मणा अनुग्रहीताः देवाः शापविमोचनमार्गमपृच्छन्। तदा ब्रह्मा भवतां पुत्रानेव पृच्छन्तु इत्युक्ते देवपुत्राः स्वपितृभ्यः बहुप्रकारकाणि वाङ्मनःकायजानि शंसुः। तदा देवाः यूयमेव अस्माकं पितरः यैः वयं प्रतिबोधिताः इत्युक्त्वा भवतां यथाभिलाषं वरं व्रियतामित्युक्ते तदा सत्यवचसां भवतां वचांसि अन्यथार्कर्तुं न शक्यन्ते। अतः भवतां पुत्राः पितरो भविष्यन्ति। तदा प्रभृति अन्योन्यं देवाः पितरश्च पितर अभूवन् पितृगणाः। तत्र पितृगणाः सामान्येन द्विप्रकारकाः अमूर्ताः मूर्तिमन्तश्चेति। अमूर्तकेषु सुभास्वराः बर्हिषदः अग्निष्वात्ताः इति त्रयः गणा अन्तर्भवन्ति। मूर्तिगणे क्रव्याद- उपहूत आज्यप- सुकलिन इति चत्वारो गणाः अन्तर्भवन्ति।

ब्राह्महणभोजणादिना पितॄणां तृप्तिः - स्कान्दपुराणे विषयोऽयं नागरखण्डे करन्धम-महाकालसंवादे रम्यतया प्रत्यपादि। राजा करन्धमः योगविदुत्तमं करन्धमेवं पृच्छति स्म। हे योगिसत्तम! पितॄनुद्दिश्य मनुष्यैः क्रियमाणपिण्डदानादिना पितरः कथं तृप्यन्ति? इत्युक्ते हे राजन् ! पितरः तेजोमूर्तयः त्रिकालज्ञानिन अतिसूक्ष्मशरीरेण सर्वत्र प्रवेशशक्तिसम्पन्नाश्च। मनोबुद्ध्यहंकार - प्रकृतिपञ्चतन्मात्रेभ्यः नवभ्यःपितॄणां शरीरं समुत्पन्नं भवति। निमन्त्रितब्राह्मणेषु वसु-रुद्र- आदित्य- अधिष्ठिताः पितृपितामहप्रपिताहप्रपितामहाः वायुरूपेण प्रविश्य अन्नसारं गृह्णान्ति। नामगोत्रपूर्वकं पिण्डप्रदाने विहिते विश्वेदेवाः अग्निष्वात्तादिपितरश्च मनुष्यपितृभ्यः पिण्डसारं ददति। यदि पितरः दैवत्वं प्राप्ताश्चेत् तदन्नममृतरूपेण मनुष्याश्चेत् अन्नरूपेण पशवश्चेत् तृणरूपेण सर्पाश्चेत् वायुरूपेण यक्षाश्चेत् पानरूपेण परिणमते॥

यथा गोषु प्रणष्टासु वत्सो विन्दति मातरम्। तथान्नं नीयते विप्रो जन्तुर्यत्रावतिष्ठते॥

In Public domain. Digitization Muthulakshmi Research Academy

यथाह्यन्तर्वत्नी सुहृदा दीयमानं दोहदादिद्रव्यमुपभुञ्जाना स्वयं तृप्यति, तेनैव च दोहदद्रव्येण स्वकीयोदरवर्तिनं गर्भं तर्पयति। दोहदप्रदानेन उपकारकर्तारं प्रत्युपकारैः परितोषयति। तथा अग्निष्वात्तादयो वस्वादयश्च देवताविशेषत्वादचिन्त्यमहिमानः, श्राद्धं भुक्त्वा स्वयं तृप्यन्ति, स्वाधिष्ठातृंश्च मनुष्यपितॄन् तर्पयन्ति, श्राद्धकर्तारश्च आयुष्यादिभिः फलैर्योजयन्तीति आशयः। अत्र येषां पितॄणां देशकालव्यवहितातीन्द्रियार्थज्ञाने श्राद्धदेशं प्रत्यागमने च शक्तिर्नास्ति तेषां देशान्तरस्थानामेव मन्त्रादिप्रापितेन हविषा तृप्तिर्भवतीत्युक्तम्।अतीन्द्रियज्ञानयुक्तानाम् आगमनाशक्तियुक्तानां श्राद्धदेशञ्च प्रत्यागतानां वायवीयेन शरीरेण ब्राह्मणशरीरोपविष्टानां तृप्तिर्भवतीति विज्ञेयः।

अत्र पुष्करयात्रायां वियोगवाप्यां रामेण श्राद्धे क्रियमाणे जानकी ब्राह्मणशरीरेषु दशरथादीनपश्यदिति पद्मपुराणे दृष्टान्तः विद्यते। **श्राद्धभेदाः** इदं श्राद्धं द्वादशविधं भवति। तद्यथाः–

नित्यं, नैमित्तकं,काम्यं वृद्धिश्राद्धं सपिण्डिनम्। पार्वणश्चेति विज्ञेयं गोष्ठ्यां शुद्ध्यर्थमष्टमम्।

कर्माङ्गं नवमं प्रोक्तं दैविकं दशमं स्मृतम्। यात्रा चैकादशं प्रोक्तं पुष्ट्यर्थं द्वादशं स्मृतम्॥

१) नित्यश्राद्धम् – प्रतिनित्यं यत् श्राद्धं क्रियते तन्नित्यश्राद्धमिति कीर्त्यते। २) नैमित्तिकश्राद्धम्– एकोद्दिष्टादिकं। ३)काम्यश्राद्धम् – स्वमनोरथसिध्यै क्रियमाणं श्राद्धम्। ४) वृद्धिश्राद्धम् – पुत्रोत्पत्त्यादिशुभकार्येषु क्रियमाणं श्राद्धम्। ५) पार्वणश्राद्धम्–अमावास्यादिपर्वसु कार्यं श्राद्धम्। ६) सपिण्डनश्राद्धम् – प्रेतपात्रस्थितं जलं पितृ–पितामह–प्रपितामहपात्रेषु सेचयन्, प्रेतपिण्डं अवशिष्टेषु त्रिषु पिण्डेषु मेलनं सपिण्डनश्राद्धमिति। ७) गोष्ठ्याम्–गोशालां व्यष्टिरूपेण समष्टिरूपेण एकस्मिन् पुण्यक्षेत्रे क्रियमाणं श्राद्धं गोष्ठीश्राद्धमिति। ८) शुद्धिश्राद्धम् – आत्मनःगृहस्य च शुद्धये क्रियमाणं श्राद्धं शुद्धिश्राद्धमिति। ९) कर्माङ्गश्राद्धम् – सोमयागादिभ्यः पूर्वं क्रियमाणं श्राद्धं कर्माङ्गश्राद्धमिति। १०) दैविकश्राद्धम् – सप्तम्यादिविशिष्टतिथिषु कर्तव्यं श्राद्धं दैविकश्राद्धम् ११)यात्राश्राद्धम् –तीर्थयात्रादिषु कर्तव्यं श्राद्धं यात्राश्राद्धमिति। १२)पुष्टिश्राद्धम् –शारीरिक–आर्थिकसमुन्नत्यै कर्तव्यं श्राद्धं पुष्टिश्राद्धमिति।

श्राद्धकालाः मायुगमनुक्रान्तिधृतिपातमहालयाः। अष्टकान्वष्टको पूर्वेद्युः श्राद्धैः नवतिश्च षट्॥

१)अमा – अमावास्या. प्रतिमासम् अमावास्याः(१२)। २)युगादयः– माघकृष्टामावास्या, भाद्रकृष्णत्रयोदशी, वैशाखशुक्लतृतीया, कार्तिकशुक्लनवमी चेति चतस्रः(४)। ३)मन्वादयः –चैत्रशुक्लतृतीया, चैत्रपूर्णिमा, ज्येष्टपूर्णिमा, आषाढशुक्लदशमी,आषाढपूर्णिमा, श्रावणकृष्णाष्टमी, भाद्रशुक्लतृतीया,आश्विनशुक्लनवमी,कार्तिकशुक्लद्वादशी, कार्तिकपूर्णिमा, पौषशुक्लैकादशी,माघशुक्लसप्तमी, फाल्गुनपूर्णिमा, फाल्गुनामावास्या। ४)सङ्क्रान्तिः– मेषादिद्वादश। ५)महालयः–भाद्रपदापरपक्षाः, अश्वीयुजशुक्लप्रतिपच्च। ६)अष्टकाः –मार्गाकृष्णाष्टमी, पौष कृष्णाष्टमी, घकृष्णाष्टमी, भाद्रकृष्णाष्टमी।७)अन्वष्टकाः–(अष्टम्या उत्तरदिनानि) मार्गकृष्णनवमी, पौषकृष्णनवमी,माघकृष्णनवमी, भाद्रकृष्णनवमी चेति। ८)अष्टकपूर्वकश्राद्धानि–मार्गकृष्णसप्तमी, पौषकृष्णनवमी, भाद्रकृष्णनवमी चेति। आहत्य षण्णवतिश्राद्धदिवसाः भवन्ति।

श्राद्धकर्तारः–पितुःपुत्रेण कर्तव्या इत्युक्तदिशा औरसपुत्रस्यैव श्राद्धकरणे अधिकारः। पुत्रादीनामभावे क्रमेण पौत्रः, तत्पुत्रः, पुत्रिकापुत्रः, पत्नी, भ्राता, तत्पुत्रः, स्नुषा, भगिनी, भागिनेयश्च, सपिण्डः, सोदक एतेषां सर्वेषामभावे राजा च

In Public domain. Digitization Muthulakshmi Research Academy

अधिकारिणः भवन्ति।

श्राद्धे ब्राह्मणसंख्या – द्वौ दैवे पितृकार्ये त्रीन् एकैकमुभयत्र वा। भोजयेत् सुसमृद्धोऽपि न प्रसज्येत विस्तरे॥ इत्युक्तदिशा विश्वेदेवस्थाने द्वौ ब्राह्मणौ अथर्ववेदिनौ पितृस्थाने, ऋग्वेद-यजुर्वेदसामवेदिनः त्रीन् ब्राह्मणान्, पितृ-पितामहप्रपितामहानां स्थाने नियोजयेत्। श्राद्धरक्षार्थं श्रीमहाविष्णुस्थाने एकं ब्राह्मणं नियोजयेत्।अशक्तौ एकं दैवार्थे एकं पित्रार्थे एकं, विष्नुस्थाने एवम् आहत्य त्रीन् ब्राह्मणान् नियोजयेत्।

श्राद्धे पवित्राणि वस्तूनि उच्छिष्टं शिवनिर्माल्यं वमनं मृतकर्पटम्। श्राद्धे सप्त पवित्राणि दौहित्रः कुतपः तिलाः॥

उच्छिष्टं = गोक्षीरम्; शिवनिर्माल्यं=गङ्गाजलम्; वमनं=मधु, मृतकर्पटम्=तसलीतन्तुनिर्मितं दशायुक्तं वस्त्रम्। दौहित्रः=नाम खड्गमृगस्य फालभागस्थशृङ्गनिर्मितं पात्रम्। चन्द्रयुक्तामावास्यां या गौः तृणं खादति, तस्याः गावः क्षीरं दौहित्रमित्युच्यते। कुतपः=सूर्योदयात् अष्टमो मुहूर्तः कुतपः इति तस्मिन् दत्तं श्राद्धं अनन्तफलप्रदं भवति। तिलाः = देवानां शरीरसम्भवाः पितॄणामत्यन्तदायकाश्च भवन्ति। **श्राद्धकर्तॄनियमाः** –दन्तधावन –ताम्बूल,तैलाभ्यङ्ग, अभोजन, प्रत्यौषधपरान्नानि परिवर्जयेत्। **श्राद्धभोक्तृनियमाः**–पुनर्भोजन, प्रयाण, भारवाहनायासकारकानि, मैथुन, दान, प्रतिग्रहहोमान् श्राद्धभुक् परिवर्जयेत्। **ताम्रपात्रप्रशंसा** –श्राद्धे ताम्रपत्रेषु पक्वमन्नं महादुःखसागरमग्नानपि पितॄन् समुद्धरति। **श्राद्धे अयःपात्रत्यागः** – लोहपात्राणि कदाचिदपि श्राद्धे न प्रयोज्यानि।

अयःपात्रदर्शनादेव पितरः पलायन्ते। शाकादीनां छेदने एव तेषामुपयोगो भवेत्॥

श्राद्धे भोजनकाले श्रावणीयानि सूक्तानि ब्राह्मणभोजनकाले श्रावणीयानि सूक्तानि वर्तन्ते। आहारपक्वसमये ये पाचकाः ते आहारपदार्थानामाघ्राणं कुर्वन्ति। तद्दोषपरिहाराय अधिश्रवणसूक्तानि पठनीयानि। अभ्यवहारसमये श्रावणीयाः मन्त्राः अभिश्रवणमन्त्रा इत्युच्यन्ते। "रक्षोघ्नान् पित्र्यान् वैष्णव्यानन्यांश्च पवित्रान् धर्म्यान् मन्त्रान् धर्मशास्त्रमितिहासपुराणांश्चाभिश्रावयति।

आपस्तम्बगृह्यसुत्रम्, अष्टमपटलम्

अभिश्रवणमन्त्रेषु अग्निष्वातादिदिव्यपितॄणा चरितमुपनिबद्धम्। एवं नाचिकेतोपाख्यानञ्च वर्तते। अभिश्रवणाशक्ताः गायत्रीं जपेत्। श्राद्धे वैज्ञानिकं तत्त्वम् **यवव्रीहिषु शीतं, तिलक्षीरेषु उष्णं तुलस्यां शीतोष्णं मन्त्रोच्चारणे अत्युष्णं वैद्युतं स्रोतः।** अत्रायमाशयः यवव्रीहिषु शीतविद्युत् तिलक्षीरेषु उष्णविद्युत् तुलस्यां शीतोष्णविद्युच्च अतिसूक्ष्मरूपेण प्रवहति।कर्मकाण्डकर्ता ब्राह्मणो वा लयबद्धं तारस्वरं वैदिकमन्त्रोच्चारणसमये नाभिचक्रात् उद्भूतः प्राणवायु उष्णविद्युतमुत्पाद्य पवित्रस्थले सर्वत्र प्रसरति। इयं विद्युत्, मधुनि च स्थितया विद्युता मिलित्वा विद्युत्सम्मिश्रणं भवति। नाम् मधुस्थितविद्युत्, यवतण्डुलादिविद्युच्च मिश्रिते भवतः। तदानीं वेदमन्त्रोच्चारणात् नाभिमण्डलादागतविद्युत् सर्वाः विद्युत एकीकरोति। भूम्यां स्थिताः दर्भाः भूम्याकर्षणशक्तिं विकर्षन्ति । तेन तैजसवायव्यशरीरधारिण अग्निष्वात्तादिपितरः प्रविश्य पिण्डसारं स्वीकृत्य मनुष्यपितृभ्यः प्रददति।

उपसंहारः एवं श्राद्धं विधानेन कृतवद्भ्यः फलमपि तत्र प्रदर्शितम्। यज्ञावल्क्यस्मृतौ"

"आयुः प्राजां धनं विद्यां स्वर्गं मोक्षं सुखानि च। प्रयच्छन्ति तथा राज्यं प्रीताः नृणां पितामहाः॥

न केवलं तस्य वंशजाः पितर एव श्राद्धेन तृप्यन्ति। अपि तु आब्रह्मस्तम्बपर्यन्तं सर्वं जगत्, तृप्तिमाप्नोतीत्यत्र न सन्देहः। तदुक्तं **ब्रह्मपुराणे – एवं विधानतः श्राद्धं कृत्वा स्वविभवोचितम्। आब्रह्मस्तम्बपर्यन्तं जगत्प्रीणाति मानवः॥** इति एवं प्रकारेण श्राद्धाचारणेन ऐहिकामुष्मिकफलं प्राप्नोति मानव इत्यत्र न विसंवादः।

In Public domain. Digitization Muthulakshmi Research Academy

कालानुगुणं संस्कृतव्यवहारपदनिर्माणम्

Anjaneyulu. K

संस्कृतभाषा अन्याभ्यः सर्वाभ्यः भाषाभ्यो प्रकारे विस्तरे च महती विचार पवित्रतायाः च अन्यूना विद्यते। सत्यपि मन्दतमे, विकासक्रमे क्रमोपनते च इतिहासादारभ्य समयतः एव संस्कृतभाषायाः विश्वस्य अन्यासां भाषाणां समताकुर्वते समायाति सुसंस्करणत्वात्। प्रविर्तनशीलता एव भाषायाः जीवनम्। नवनवाः शब्दाः लोकव्यवहारे प्रयुज्यमानाः दृश्यन्ते। नूतननूतनानां शब्दानां प्रयोगेण भाषा समृद्धिमेति। भाषासु जीवनम् तावदेव वरीवर्ति यावदेव भाषायामभिनवशब्दानां ग्राहिका शक्तिः वर्तते। भाषा भागीरथ्याः शाश्वतप्रवाहः इव प्रसरणशीला वर्तते यस्याः परम्परा विद्यते किन्तु तस्याः रूपे अन्तरं दृश्यते। इदमन्तरमेव तस्य प्रवाहस्य परिवर्तनशीलता आस्ते। सा स्वीयामान्तरिकीमेकतां न विजहाति। भाषागतशब्देषु शनैः शनैः परिवर्तनानि दृश्यन्ते तानि अतितरां मन्दं मन्दं प्राकट्यमुपयान्ति। यथा शिशोः यौवनं, वार्धक्यं च अनायासेनैव समुयातः तथैव भाषायाः इयं परिवर्तनशीलता तस्याः स्वाभाविको गुणः। न सा तस्याः उन्नतिः न च अवनतिः। इयं तु तस्याः स्वाभाविकी विकासपद्धतिः। महान्तो विपश्चितो भाषायाः परिवर्तनशीलतां स्वस्व पाण्डित्यप्रभाप्रवाहेण अवरोद्धुं प्रयतन्ते। परन्तु कार्यमेतत् तेषां न शक्त्यधीनम्। परिवर्तनमिदं भाषायाः नैव ह्रासः पतनं वा न च वृद्धिरुत्पादनं वा। अयन्तु तस्याः अनिवार्यो धर्मः, विकासपरम्परा च। संस्कृत भाषा पाणिनेराचार्यस्य समये नितरां सुसमृद्धा। पाणिनिः अर्थविषेशमाश्रित्य स्वर प्रकृति प्रत्ययविषेशादीन् विदधन् सर्वविधलौकिकालौकिकशब्दानां व्युत्पत्तिपूर्वकं व्युत्पादनं चकार इति केषां न विदितम्। शब्दानां व्याकरणरीत्या साधुत्वासाधुत्वव्युत्पादनद्वारा संस्कृतभाषा संस्कृतां परिष्कृतं परिषुद्दामकार्षीत् सः इति लोक प्रसिद्धिः। महर्षिणा पाणिनिना महेश्वरादधिगत समाम्नायेन यानि सूत्राणि विरचितानि तेषाम्महत्वमुपयोगिता च सातिशये। सूत्रेषु संक्षिप्तता प्रमुखमङ्गम्। अक्षराणामल्पत्वं अनिवार्यत्वेनाङ्गीकृतम्। यावतो अर्थस्य कृते यावान् शब्दसमुदायः प्रयोक्तव्यः तावानेव प्रयुज्यते नातोधिकः न च न्यूनः। **"एकमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैय्याकरणाः"** इति तावत् सुप्रथितमेव।

संस्कृतभाषा जीवत्यद्यापीत्यस्य प्रधानं कारणं तस्याः व्याकरणादिदोषराहित्यमेव। व्याकरणसम्पदा सेयमित्थं नियन्त्रिता च यत्तस्यामद्यापि किमपि परिवर्तनं न जातम्। कारणेनानेनैव सा स्वमूलस्वरूपे सम्प्रत्यपि सुरक्षिता। बहुशो विद्वांसो अद्यापि भाषाभिमानिनः अनायासेनैव धाराप्रवाहरूपेण व्यवहर्तुं पारयन्तीति नास्त्यत्र चित्रम्।

साम्प्रतमयं विचारः समुदेति यदियं जनभषा लोकभाषा वा कथं संपद्येत कथं च अस्याः व्यवहारः सर्वैरेव विधातुं शक्येत ? पण्डितवर्याणाम् इयं भाषा विपश्चितां समाज एव सीमिता, जनसाधरणात् दूरे प्रतिदिनमसरदिति चिन्तायाः विषयः। साम्प्रतिकाः संस्कृतलेखकाः अभिनव शब्दानां प्रयोगः विदधते। अर्वाचीनासु पत्र–पत्रिकासु काव्यलेखने च क्वचित् नवनव शब्दाः विरच्यन्ते क्वचिच्च प्राचीनामप्रचलितानां शब्दानां प्रयोगाः क्रियन्ते।
यथा - तस्मिन् समये एका व्याधयुवतिः तेनैव मार्गेण **"गच्छन्ती आसीत्"**, **"तदेव चिन्तयन् अस्मि"** इति वा।

अत्र एका व्याधयुवतिः **"गच्छन्ती आसीत्"** अथवा **"अहं चिन्तयन् अस्मि"** इत्युभयोः वाक्ययोः 'शतृ' प्रत्ययो विहितः। परन्तु पाँणिनिना प्रतिपादितेन **"लटः शतृशानचावप्रथमा समानाधिकरणे"** इति शतृप्रत्यय विधायकेन सूत्रेण

In Public domain. Digitization Muthulakshmi Research Academy

अप्रथमा समानाधिकरणे इति निर्देशानुसारं प्रथमा समानाधिकरणे शतृ प्रत्ययो न विधेयः। परन्तु **"पचन्तं चैत्रं पश्य"** अथवा **"पचमानं चैत्रं पश्य"** इत्युभयत्र चैत्रमिति द्वितीयान्तत्वेन अप्रथमान्तं पदं यदधिकरणम् वाच्यं वा अभिधत्ते पच धातोर्विहितः लडपि तमेव विशदीकरोति अतः लटः अप्रथमान्तेन सह समानमभिन्नमधिकरणमास्ते फलतः अस्यामवस्थायां शतृशानचौ विधीयेते। परन्तु प्रकृत वाक्ययोः प्रथमान्तेन सह समानाधिकरणम् वर्तते अतः अपाणिनीय एष आदेशः इत्येव प्रतिभाति। संभवतः पाणिनीय सूत्ररचनावसरे एतादृशाः प्रयोगाः न अवर्तन्त। लटः शतृशानाचाविति सूत्रवृत्तौ लघु कौमुदीषु वा इति पदं उपलभ्यते। वस्तुतः अयम् अपपाठः अत एव भ्रमोत्पादकः। यदि पचन्तमित्यादौ शतृ वैकल्पिकं विधानं क्रियेत तर्हि अपरपक्षे पचन्तमित्यस्य स्थाने कीदृशः प्रयोगो भवेत् ? इतिप्रश्नः समुदेति। परन्तु प्राचीन काव्य ग्रन्थेषु प्रथमा समानाधिकरणे अपि शतृ शानचौ विधीयेते।
यथा – महाकवि भारविना कृत प्रयोगो द्रष्टव्यः –

"समुन्नयन् भूतिमनार्य सङ्गमाद्वरं विरोधोऽपि समं महात्मभिः", महाकवि कालिदासेनाऽपि रघुवंशे **"अल्पस्य हेतोः बहुहातुमिच्छन् विचार मूढः प्रतिभासि मे त्वम् " इति प्रयोगो विहितः।** सुभाषितेषु– "अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति" इत्यात्मकाः प्रयोगाः दृश्यन्ते। साम्प्रतिके युगे भाषायाः सरलीकरणस्य दृष्ट्या भूतार्थे 'क्तक्तवतू' प्रत्ययौ वर्तमानकालिक क्रियासु च 'शतृशानचौ' विधीयन्ते। भूतकालिक क्रियायामपि **"सः गतवान् अस्ति आसीद् वा"** इति प्रयोगो दृश्यते अद्यत्वे। इदं प्रतीयते यत् पाणिनि काले अप्रथमा समानाधिकरणे एव एतौ प्रत्ययौ विधीयेते स्म परम् क्रमशः एतादृशानां शब्दानां प्रयोगः काव्यरचनासु प्रचलितः अभवत् अत एव सिद्धान्तकौमुद्याम् प्रतिपादितम् –"लङ् इत्यनुवर्तमाने पुनः लङ् ग्रहणात् प्रथमा समानाधिकरणे अपि क्वचित्" सं द्विज इत्युदाहरणत्वेन प्रस्तुतम्। अस्यायमाशयः यत् "वर्तमाने लट् इति पूर्व सूत्रादनुवृत्तस्य लट् इत्यस्य षष्ट्या विपरिणामेन उक्तार्थ लाभः सम्भवति। पुनः लट् इत्यस्य सूत्रे पाठःअधिकविधानार्थम्। अर्थात् सूत्राक्षरनारूढस्यापि अर्थस्य लाभार्थं पुनः लङ् ग्रहणम्। सन् ब्राह्मणः इत्यत्र अस–भुवि इति 'सन्' इत्यपि रूपं साधुः।

अत्रायं प्रश्नः समुदेति यत् भाषयाम् एतादृशं परिवर्तनं विकासपरम्परया जातं सामाजिकैश्च विपश्चित् पञ्चाननैः अङ्गीकृतम्। पाणिनिमतानुसारं तु एतादृशाः प्रयोगाः प्रयोगानर्हाः। पाणिनेः अभिमतानुसारं एतत् अभविष्यत्तर्हि अप्रथमा समानाधिकरणे इति बह्वक्षरं पदं न प्रायोक्ष्येत्। अतः स्पष्टमेवेदं पाणिनिविरुद्धम्। किमीदृशानि परिवर्तनानि स्वीकर्तुं शक्यानि? अत्र एतत् एव अवधार्यं यत् ईदृशाः प्रयोगाः समाजे व्यवहारे च प्रचलिताः ते सहर्षं स्वीकरणीयाः। साम्प्रतं हिन्दी भाषायां ' जा रहा है ' इत्यर्थे "गच्छन् अस्ति"इति, एवं 'गया हुआ' इत्यर्थे " गतवान् अस्ति" इत्यादिकाः ये प्रयोगाः प्रचलिताः ते पाणिनिसम्मताः न वर्तन्ते। ''गच्छन् अस्ति'' इत्यर्थे गच्छति इत्येव पर्याप्तम्। गतवान् इत्यत्रापि भूतार्थे निष्टा प्रत्ययो जायते।

एतादृशोदाहरणानि – 'सहना' शब्दः सहन शक्त्या अर्थे इदानीन्तने काले कविभिर्लेखकैः च प्रयुज्यते। 'मर्षनार्थकात् सह' धातोः स्त्रीत्व विवक्षायां सहना शब्दः संपद्यते। सोतितरां सहनशाली विद्यते। सहना शब्दः (Resistance) सहनशक्त्या अर्थे प्रयुक्तः संदृश्यते। प्राचीने साहित्ये सहना शब्दः विरलः प्रयोगः। एवम् आङ्ग्लभाषायां

In Public domain. Digitization Muthulakshmi Research Academy

प्रयुज्यमानः Adulteration इत्यस्य 'दुर्मिश्रणम्' इति शब्दस्य नूतन नूतनां भावसरणिं प्रकटयतीति अत्र नास्ति चित्रम्। एवमेव closely इत्यस्य अर्थे 'निरवकाशम्' इत्यपि प्रयुज्यते। आङ्ग्लभाषायाः factory इत्यस्यार्थे 'यन्त्रागारः' इत्यस्य शब्दस्य प्रयोगो जायते। नानाविधानि यन्त्रागाराणि भवितुं शक्नुवन्ति। पुराकाले शब्दस्य प्रयोगः आङ्ग्लभाषायामवर्तत। यतो हि टार्च् इत्याख्य वस्तु भारतीय समाजे नासीत्। परन्तु आविष्करणेन संस्कृते 'दीपशिखा इति शब्दः प्रचलितः। यथा -**"संचारिणी दीपशीखेव रात्रौ"** तादृश रूपेण विद्यमानाः शब्दाः संस्कृते परिवर्तमानाः जायन्ते।

<u>अस्त्र-शस्त्रोपकरणानि (Weapens & tools)</u>

Barometer इत्यस्य – वायुमापकयन्त्रम्, crusher इत्यस्य – निष्पीडकम्, cannonnon इत्यस्य – दूरबेधिनी शतघ्नी वा, Driller इत्यस्य – रन्ध्रकम्, Radar इत्यस्य – पोतचालनयन्त्रम्, syring इत्यस्य – श्रुङ्कम् इत्येवं संस्कृते परिवर्तमानाः जायन्ते।

<u>व्यवसायाः -(Professios)</u>

Post Postman इत्यस्य – पत्रवितरकः, Pick Pocketer इत्यस्य – पश्यतोहरः, Druggist &Chemist इत्यस्य – भैषजिकः & रसायनिकः, Shoe Maker पादुका सन्धाता इत्येवं संस्कृते परिवर्तमानाः जायन्ते।

<u>विद्युदुपकरणानि (Electrcial appliancescess)</u>

Adoptor इत्यस्य – विद्युत् योजिका, Door bell इत्यस्य – अकारिका, Grinder इत्यस्य – मिश्रकम्, Ironbox इत्यस्य – समीकरः, computer इत्यस्य –कामपत्रकम् , Tester इत्यस्य 'परीक्षणी' इत्येवं संस्कृते परिवर्तमानाः जायन्ते।

चिह्नानि (Symbols)

'+' इत्यस्य संयोगः', '–' इत्यस्य वियोगः, '=' इत्यस्य समः इत्येवं संस्कृते परिवर्तमानाः जायन्ते।

सामजे श्रूयमानाः शब्दाः –

यथा नव-नवानि वस्तूनि व्यवहारे प्रयुज्यन्ते तथैव तेषां कृते नवाः शब्दाः निर्मीयन्ते। Teenager इत्यस्य 'वयस्कः', Recruitment इत्यस्य 'नियुक्तिः', Amendment इत्यस्य 'अधिकरणम्, Air-Condition इत्यस्य 'नियन्त्रितापः' Administration इत्यस्य 'प्रशासनम्' इति एवम् परिवर्तयितुं शक्यन्ते। Hydrogen bomb इत्यस्य 'जलप्रहरणास्त्रम्, Stainless steel इत्यस्य 'निष्कलङ्कायसम्, Blood-Pressure इत्यस् 'रक्तचापः', Handloom इत्यस्य 'हस्तवैमः', Sweater, Lawyer, Act, Complaint, Referee इत्येवं संस्कृते

 In Public domain. Digitization Muthulakshmi Research Academy

परिवर्तमानाः जायन्ते। मम आशयः अस्ति यत् आधुनिककाले वैज्ञानिकप्राभल्यात् नूत्न नूतनानां-वस्तूनां पदानां च आविष्कारः जायते। अतः विज्ञानस्य विकासेन वैज्ञानिकशब्दावल्याः निर्माणं कृतं भारतीयभाषविद्भिः। भाषायाः विकासस्य अयं क्रमः सनातनः सततप्रवाहशीलश्च विद्यते। भाषासु यानि परिवर्तनानि समापतन्ति तेषु अन्यतमं कारणं वर्तते अन्याभिः भाषाभिः सह सम्पर्कः। भावाभिव्यक्तेः माध्यमभूता भाषा अन्य भाषभिर्जनैः सह परिवर्तनं भजते। पाणिनीये सूत्ररचनाकालेपि तत्कालावच्छेदेन प्रयुज्यमानानां शब्दानां शद्धत्वाशुद्धत्वप्रतिपादनपूर्वकं आचार्यः पाणिनिः व्याकृतिं चकार इति सर्वविदितमेव। पाणिनेरनन्तरं भाष्यं यत्परिवर्तनं परिलक्षितं तत् वार्तिककृता कात्यायनेन वार्तिकरचनया स्वयं निर्दिष्टम्। महाभाष्यकारेण पतञ्जलिना स्वव्याख्यानद्वारा तदेव विन्यस्तम्।अतः इदं सुस्पष्टं यत् पाणिनिकाले ये केचन प्रचलिताः शब्दाः अवर्तन्त ते सर्वे महर्षिणा पाणिनिना अन्वाख्याताः। ये च पश्चाद् प्रचलिताः ते पश्चाद्भावेन कात्यानेन उपसङ्ख्याताः। इदन्तु वार्तिकानां भाष्यस्य च पर्यालोचनाय प्रतिभाति। एवम् अन्येऽपि वैय्याकरणाः स्व स्व समायानुरूपं तादृश परिवर्तनं व्यदधुः। भाषायां या खलु शक्तिः सा तस्याः संयोचितेन परैवर्तनेनं, परिवर्धनेन च परिरक्षितुं शक्यते। यतः इयं भाषा जन साधारण बोधगम्या स्यात्। तादृश उपायेषु अग्रिमः कठिनसन्धीनां विरलः प्रयोगः।

सन्धिरहितानां शब्दसमूहानां सारल्येन अवगमनमिति प्रथमः कल्पः। उक्तमपि वाक्ये तु संधिः कर्तु विवक्षानाधीनः। तिङ्न्तानां क्रियापदानां स्थाने कृदन्तानां प्रयोगान् प्रयुन्जीरन् इत्यपि तेषामभिमतम्। भूतकाले अनद्यतन परोक्षादि भेदेन एवमनुभूयते परमस्य स्थाने गतवान् इत्यात्मकः प्रयोगः सौविध्यमावहति। एवं नाना जातीयाभिः भाषाभिः सह संपर्केन सहस्रशः शब्दाः व्यवहारे प्रचलितास्ते संस्कृत वयाकरणानुमोदिताः स्युः। अद्यत्वे यत् संस्कृतं सुतरां स्पष्टं दोषादिरहितश्च तस्य हेतुः केवलन्तस्यात्मनो मूलरूप परिरक्षणमेव। परम् संस्कृतभाषायाः मूलस्वरूपस्य संरक्षणेनैव भवेत्। संस्कृत भाषा भागीरथीप्रवाहः पुनरपि चरमोत्कर्षमनुवर्तेत तदैव संस्कृतं श्रेयसे प्रयासे च हिताय च वत्स्यीति।

References

1.Technical Terms - Technical words in the works on Ancient Indian polity and their significance – Prof P Shashirekha – 2010

2.New Sanskrit Grammar & Composition – Chaukhambha Sanskrit Bhawan, Varanasi-2005.

3.Vaiyakarana Siddhanta kaumudi - Chaukhambha Sanskrit Bhawan, Varanasi-1975.

4The Roots, Verb-forms and Primary Derivatives of the Sanskrit Language – D K Printworld (P) Ltd., New Delhi -2008.

....

In Public domain. Digitization Muthulakshmi Research Academy

प्राचीनस्वाध्यायप्रवचनप्रविधयः

Ancient Techniques for dessemination of Knowledge

Dr. S .L .Sitaramasharma

"भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा"। भारतीयसभ्यतायाः, संस्कृतेः, ज्ञानपरम्परायाश्च आधारः संस्कृतभाषा। अत एवोच्यते "संस्कृतिः संस्कृताश्रिता" इति। संस्कृतिः प्रतिबिम्बिता भवति समाजे। तत्समाजस्य निर्माणो भवति शिक्षया। संस्कृतिं समाजे सङ्क्रामयति शिक्षा। अतः भारतीयसंस्कृतिः, भारतीयशिक्षाप्रणाली, संस्कृतभाषा च अन्योन्याश्रिताः। परस्परपूरकाश्च। ग्रीक्–यवन–पोर्चुगीस्–अङ्ग्लेयादिभिः बहुदा, बहुधा च प्रतिहन्यमानमपि भारतं सम्प्रत्यपि विश्वगुरुस्थानमावहति, जगते ज्ञानं प्रददाति इत्युक्ते तत्र कारणम् एताः तिस्रः एव। यवनैः मठमन्दिरैः सह विश्वविद्यालयाः दग्धाः चेदपि, मेकालेयादिभिः शिक्षाव्यवस्था विनाशितापि संस्कृतभाषा, संस्कृतिश्च सजीवं तिष्ठतः इत्युक्ते तत्र कारणम् अस्मत्प्रचीनैः अनुसृता शिक्षणप्रणाली, तत्राश्रिताः विधयः (Methods) प्रविधयः (Techniques) एव।

प्रविधिशास्त्रम् (Technology)

स्यादिदं प्रविधिशास्त्रमत्याधुनिकं, प्राचीनकाले न तस्यास्तित्वम्। किञ्च प्रविधिशास्त्रं यन्त्राधारितं तर्हि प्राचीने काले यन्त्राणामभावे न प्रविधिशास्त्रस्यास्तिता, तर्हि कथं वा शिक्षाप्रणाल्यां तस्योपगः इति। तत्रोच्यते प्रविधिशास्त्रं न अर्वाचीनम्। प्रविधिशास्त्रस्य शाखासु तन्त्रांशप्रणालीविश्लेषणे, प्राचीनकाले एव प्रयुक्तत्वात्। वैदिककालादपि अस्योपयोगः प्रचलति।

सम्प्रति भारतीयशिक्षाप्रणाल्यां वेदशास्त्रादिशिक्षणे उपयुक्ताः प्रविधयः, विधयः परामृश्यन्ते। तेषां साम्प्रतं प्रयोजनमपिप्रस्तूयते शोधपत्रेऽस्मिन्। तैत्तरीयोपनिषदि शिक्षाप्रणाली सुष्ठु प्रतिपादिता शिक्षावल्ल्यां। यथा – **"आचार्यः पूर्वरूपम्, अन्तेवास्युत्तररूपम्, विद्या सन्धिः, प्रवचनं सन्धानम्"** इति। अत्र शिक्षा चतुस्तम्भाधारिता प्रदर्शिता। तत्र अध्यापकः, छात्रः, विषयः, विधयः चत्वारः स्तम्भाः। प्रवचनं न केवलं व्याख्यानमात्रम् अपि तु विधिरूपम्। यत्र नैके उपविधयः, प्रविधयः, कौशलानि च अन्तर्भवन्ति।

विधिप्रविध्योः सम्बन्धः (Relation between Method and Technique)

आदौ विर्धिनाम कः? प्रविधः नाम कः? कोऽयमनयोः सम्बन्धः इति विव्रियते।

विधिः (Method) तत्रादौ को नाम विधिः? इत्युक्ते – **"निर्दिष्टोद्देश्यसाधनानुकूलव्यापारवान् उपायः"** इति विधिलक्षणम्। छात्राधिगमसम्पादनाय अध्यापकेन आश्रितः मार्गः विधिरित्युच्यते।

"पाठस्य सामान्यविशिष्टोद्देश्यान्यधिगन्तुं निर्दिष्टनियमानुसारं छात्राध्यापकैः अनुष्ठेयानां परस्परसम्बद्धानां विकासात्मिकानां कियाणां श्रुङ्कलैव विधिः।" Thomas M. Risk - 1947

In Public domain. Digitization Muthulakshmi Research Academy

प्रविधिः (Technique) एकः विधिः नैकानां प्रविधीनां समूहो भवति। अभिलषितोद्देश्यसाधनार्थं स्वीकृतविधेः सुचारुतया प्रयोगः एव प्रविधिः। यथा व्याख्यानविधौ पदच्छेदादयः प्रविधयः भवन्ति। प्रश्नकरणादयोऽपि प्रविधयः एव। इदं वक्तुं शक्यते शिक्षकः नैकानां प्रविधीनां सहायेन स्वीकृतविधिना समर्थतया निश्चितोद्देश्यानि साधयति। नैकानां प्रविधीनां समूहाः विधयः। विधयः प्रविधयः च अन्योन्याश्रिताः अभेदाः च। प्राचीनकाले प्रविधयः विधि मुखेनैव उच्यन्ते।सम्प्रति शिक्षणविधीनां परामर्शो विधीयते। विधयः द्विधा विभज्यन्ते। 1. शिक्षणविधयः 2. अधिगमविधयः चेति। आदौ –

शिक्षणविधयः (Teaching Methods) अध्यापकेन शिक्षणार्थम् उपयुज्यमानाः विधयः शिक्षणविधयः। प्राचीने काले संस्कृत–साहित्य–शास्त्र–वेदानीनां शिक्षणार्थं नैकाः विधयः उपयुक्ताः। तत्रादौ वैदिकशिक्षणविधयः विवेच्यन्ते।

वेदशिक्षणविधयः.वेदाः अपौरुषेयाः। अस्माकं शिक्षणपरम्परा श्रुतिपरम्परा एव। तथापि अद्य यावत् सा च वेदपरम्परा प्रचलतीत्युक्ते तत्रोपयुक्ताः शिक्षणविधयः एव कारणम्। स्वरभेदेनैव अर्थभेदो, अनर्थकश्च भवति। तदुक्तम् महाभाष्ये यथा –

"मन्त्रहीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तः न तमर्थमाह।
स वाग्वज्रोयजमानं हिनस्ति यथेन्द्रशत्रुस्स्वरतोऽपराधात्।।" महाभाष्यम्, पश्पशाह्निकम्)

स्वरादिदोषेभ्यः श्रुतिपरम्परा रक्षिता इत्युक्ते तत्रोपयुक्ताः शिक्षणविधयः एव कारणम्। अस्मन्महर्षिभिः दृष्टाः मन्त्राः गुरुच्चारण–अनूच्चारणविधिना सस्वरपाठ– परम्परायाः संरक्षणार्थं, तत्र सम्भाव्यमानदोषान् निवारयितुं च विकृतपाठविधिः स्वीकृतः। तत्र पदद्वयमारभ्य आमन्त्रं विद्यमानानि पदानि क्रम–व्युत्क्रम–सङ्क्रम पाठविधयः अनुश्रुताः। ते च विधयः क्रमशः –



एतदुक्तं व्याडिना – जटा मला शिखा रेखा ध्वजो दण्डो रथो घनः।
अष्टौ विकृतयः प्रोक्ताः कमपूर्वाः महर्षिभिः।।

In Public domain. Digitization Muthulakshmi Research Academy

प्रसङ्गवशात् वेदशिक्षणविधयः परामृष्टाः। विस्तरात् तेषां प्रत्येकं लक्षणं न प्रतिपाद्यतेऽत्र।

शास्त्रशिक्षणविधयः सम्प्रति शास्त्रशिक्षणविधयः विमृश्यन्ते। तत्र संस्कृतशिक्षणे असकृत् श्रूयमाणः विधिः परम्परागतविधिः (Traditional Method)। नायम् एकः विधिः। नैकानां विधीनां समाहारः। अतस्तावत् तदन्तर्भूतानां विधीनां प्रत्येकशः विवेचनं क्रियते।

1. व्याख्यानविधिः **पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना।**

अक्षेपोऽध समाधानं व्याख्यानं षड्विधं मतम्।।

अस्य विधेरनुसारं श्लोकस्य पदच्छेदं विधाय, तदनुश्लोकस्यपदानामर्थं विवृत्य, समस्तपदानि विग्रहमाध्यमेन संकथ्य, एकवाक्यरूपेण विषयः प्रतिपाद्यते। ततश्च आक्षिप्तान् प्रश्नान् समादधति शिक्षकः। विधिरयं न केवलं साहित्यशिक्षणार्थं अपि तु व्याकरणादिशास्त्रशिक्षणेऽपि नितरां प्रयोजनकरो वर्तते। अपि च संस्कृतेतराणाम्, आधुनिकविषयाणामपि बोधनाय योग्यो विधिः। उच्चकक्ष्यासु अस्योपयोगः महान्। इदानीमपि अत्यधिकाः सैद्धान्तिकविषयाः अस्मिन्नेव विधौ पाठ्यन्ते।

2. टीकाविधिः "टीका गुरूणां गुरुः"। अयं समन्वयविधिः। अर्थात् प्रसङ्गवशादस्मिन् विधौ तुलना, प्रयोगः, व्युत्पत्तिः, प्रसङ्गादयः समायान्ति। विधिरयं उच्चकक्षासु प्रयोजनकरः भवति। अस्य विधेः उदाहरणं मल्लिनाथनय संजीवनी टीका। टीकाविषये मल्लिनाथेन एवमुक्तम्

इहान्वयमुखेनैव सर्वं व्याख्यायते मया। नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते।।

प्रसिद्धानां सर्वेषामपि काव्यानां टीका लभ्यते अधुना। तेनावगम्यते यत् प्राचीनकाले अस्य विधेः प्राचुर्येण प्रयोगो आसीत्। अत्र विषयस्य सर्वतो मुखतः अवलोकनेन छात्राणामपि तथैव विकासो भवति।

3. **दण्डान्वयविधि** विधिरयं पद्यान्वयबोधनार्थम् उपयुज्यते। अन्वयबोधनार्थं परम्परया द्वौ विधी अश्रीयेते। तयोः अन्यतमः दण्डान्वयविधिः। अस्य लक्षणं ओङ्कारदासेन अन्वयप्रबोधनामके ग्रन्थे इत्थमुक्तम् –

आद्ये विशेषणं योज्यं विशेष्यं तदनन्तरम्। क्त्वाणमुल्यप्प्रभृत्येवं पूर्वं दण्डान्वये भवेत्।।

श्लोके अव्यवस्थितपदानामन्वयबोधनार्थं विधिरयम् उपयुज्यते। तत्रादौ श्लोकस्य प्रधानकियापदम् अन्विष्यते। ततः कर्तृपदं, तद्विशेषणानि, ततः कर्मपदं तद्विशेषणानि च अन्विष्य वाक्यरूपेण विरच्यते। अन्वयं प्रकल्प्य सक्रमं दण्डवत् व्यवस्थाप्यते इति हेतोः दण्डान्वयविधिरिति अस्य नाम।

4.खण्डान्वयविधिः–कर्तृकर्मक्रियास्तावच्छ्लोके योज्यास्ततः परम्। किमो रूपं पुरस्कृत्य तृतीयादि नियोजयेत्।। ल्यबन्तं च तुमुन्तश्च क्त्वान्तं कर्मविभूषितम्। खण्डान्वये पुनः प्रश्नं पूर्वमन्ते नियोजयेत्।। पद्यशिक्षणविध्योः अन्यतरः खण्डान्वयः। अत्रापि दण्डान्वयवत्

In Public domain. Digitization Muthulakshmi Research Academy

प्रधानकर्तृपदमन्विष्य ततः परं समग्रार्थः यथा अवबुध्येत तथा प्रश्नकरणमाध्यमेन कर्तृ, कर्म, विशेषणशब्दानामन्वयरूपेण संरचना क्रियते। 5. **कथाकथनपद्धतिः** – कथा माध्यमेन शिक्षाप्रदानं विधेरस्य प्रयोजनम्। विधिरयमपि प्राचीन एव। अस्य उदाहरणानि पञ्चतन्त्रम्, हितोपदेशादयः। अस्य माध्यमेन, राजनीत्यादयः बालेभ्यः सुचारुरूपेण पाठयितुं शक्यन्ते। अस्य उपयोक्तृषु प्रमुखः वर्तते विष्णुशर्मा। 6. **प्रश्नोत्तरविधिः** – विधिरयमपि प्राचीन एव। अस्योपयोगः प्रश्नोपनिषदि, वेदे तत्र तत्र च असकृत् दृश्यते। गद्यशिक्षणे विधेरस्य महत्प्रयोजनं वर्तते। सम्पूर्णगद्ये अधिकारः प्राप्यते छात्रैः। खण्डान्वयविधेः रूपान्तरमयं विधिः। 7. **प्रतिपदपाठपद्धतिः** प्राचीनकाले शब्दानामुपदेशाय प्रतिपदपाठपद्धतिः आश्रिता। महाभाष्ये **"बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम"** इति विधेरस्य उल्लेखः कृतः। अस्य सहायकरूपेण सम्प्रति कोषाः, शब्दरूपाणि, धातुरूपाणि च उपलभ्यन्ते। 8. **सूत्रपद्धतिः** व्याकरणबोधने इतरशास्त्राणां बोधनेऽपि विधिरयं नितरां उपयोगी वर्तते। पाणिनीयव्याकरणं अनेन विधिना एव पाठ्यते। एव ब्रह्मसूत्राणि, दर्शनानि च अनेन माध्यमेनैव पाठ्यन्ते। 9. **निगमनविधि** अर्वाचीनमिति कथ्यमानोऽयं विधिः प्राचीन एव। अयं "लक्षणात् लक्ष्यं प्रति" इति नियममनुश्रुत्य भवति। अयं सूत्रपाठने प्राचीनकालादेव उपयुज्यते। कौमुद्यादयः अस्मिन्नेवविधौ पाठ्यन्ते। 10. **आगमनविधिः** "लक्ष्यात् लक्षणं प्रति" इति नियममनुश्रुत्य विधिरयं प्रचलति। आदौ लक्ष्यं चित्वा तस्य लक्षणमुच्यते। अयं क्रमः पाणिनीयसूत्ररचनायां सुष्ठु अभिज्ञातुं शक्यते। अतः विधिरयमपि प्राचीनः एव।

11. **वाकोवाक्यपद्धतिः** –**"उक्तिप्रत्युक्तिमद्वाक्यं वाकोवाक्यं विदुर्बुधाः। द्वयोर्वक्त्रोस्तदिच्छन्ति बहूनामपि सङ्गमे।।"** अस्यैव भाष्यपद्धतिरित्यपि नाम। उक्तिप्रत्युक्तिरूपोऽयं विधिः महाभाष्ये इतरभाष्येषु च उपलभ्यते। छात्राणां तार्किक–बौद्धिकविकासे विधिरयं महत्प्रयोजनकारि वर्तते। कठोपनिषदि वाकोवाक्यविधिना तत्वविचारः प्रस्तुतः। 12. **प्रत्यक्षपद्धतिः** –छात्रेभ्यः प्रत्यक्षरूपेण अनुभूतः विषयः चिरं तिष्ठति। अतः आधुनिककाले विधेरस्य महान् उपयोगः क्रियते। विधिरयं नार्वाचीनः, अपि तु अत्यन्तं प्राचीनः। सहस्रवर्षेभ्यः विधिरयमध्यापने पयुज्यत इत्यत्र उपलभ्यन्ते नैकानि प्रमाणानि। न्यग्रोधबीजप्रदर्शनेन अणोः महदारम्भकत्वनिरूपणमुखेन एतद्विधप्रयोगप्रामाण्यं दर्शयति छान्दोगयोपनिषद् – **"न्यग्रोध फलमद। इदं भागव इति।"** इत्यादिना। न केवलमेतावत् अपि तु नैके शिक्षणविधयः प्रयुक्ताः अस्मत्प्राचीनैः। यथा – व्युत्पत्तिविधिः, प्रसङ्गविधिः, व्याकरणशिक्षणाय पद्यविधिः, काव्यविधिः, नाटकविधिः इत्यादयः।

अधिगमविधयः (Learning Methods)

"स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्" इति विधिः। प्रवचनार्थं यथा शिक्षणविधयः प्रोक्ताः तथैव स्वाध्यायार्थमपि नैकेविध्रयः उक्ताः। ते अत्र विमृश्यन्ते। अर्थशास्त्रे कौटिल्येन विद्याप्राप्तये अष्टा उपाया :प्रोक्ताः ते यथा **शुश्रूषा–श्रवण – ग्रहण – धारण– विज्ञान– ऊह– अपोह –तत्वाभिनिविष्टबुद्धिं विद्या नियति नेतरम्** (अर्थशास्त्रम्, 2 .प्र.–वृद्धसंयोगः)।

तत्र	शुश्रूषा –	श्रवणार्हेषु श्रोतुमिच्छा,	श्रवणम्	–	आसेवा,
	ग्रहणम्–	श्रुतार्थज्ञानम्,	धारणम्	–	गृहीताविस्मरणम्

In Public domain. Digitization Muthulakshmi Research Academy

विज्ञानम्– धारितेष्वर्थेषु साध्यसाधनादि–स्वरूपविवेकज्ञानम्,

ऊहः– शब्दानुक्तस्य लिङ्गेनावगतिः,

अपोहः– युक्त्युपेतस्य हानम्,

तत्वाभिनिवेशः–वस्तुयाथात्म्यज्ञानम्।

गौतमीशिक्षायां, तथैव बृहदारण्यकोपनिषदि च ज्ञानप्राप्त्यै च त्रयः मार्गाः उपदिष्टाः। यथा बृहदारण्यकोपनिषदि मैत्रेयी–याज्ञवल्क्यसंवादे महर्षिः यथा –**"अत्मा वा रे द्रष्टव्यः, श्रोतव्यः, मन्तव्यः, निदिध्यासितव्यः"** (बृहदारण्यकोपनिषत् –2–4–5)। एवं ज्ञानसमुपार्जनार्थ श्रवण–मनन–निदिध्यासनानि प्रविधयः प्रोक्ताः।

भाषाकौशलशिक्षणविधयः – वेदरक्षणार्थम् आगतानि वेदाङ्गानि। तत्र भाषारक्षणार्थदृष्ट्या व्याकरणं शिक्षां च महदुपकुरुतः। तत्र भाषायाः उच्चारणं कथं कर्तव्यम्, दोषाः कुत्र भवन्ति? तत्परिहारोपायाश्च के? इति सम्यग्विवेच्य भाषाकौशलानां श्रवण–भाषण–पठन– लेखनानां नैके विधयः प्रविधयः प्रोक्ताः शिक्षाग्रन्थेषु। पाणिनीयशिक्षायां उच्चारणविधिः सदृष्टान्तं प्रत्यपादि। तद्यथा – **"व्याघ्री यथा हरेत् पुत्रान्, दंष्ट्राभ्यां न च पीडयेत्। भीतापतनभेदाभ्यां, तद्वद्वर्णान्प्रयोजयेत्।।"** (पाणिनीयशिक्षा – 25) एवमेव स्वरवर्णोच्चारणदोषाः प्रतिपादिताः महाभाष्ये यथा –

ग्रस्तं निरस्तमविलम्बितं निर्हतमम्बूकृतं ध्यातमथो विकम्पितम्।
सन्दष्टमेणीकृतमर्धकं द्रुतं विकर्णमेताः स्वरदोषभावनाः।। इति।

याज्ञवल्क्येन स्वशिक्षायां पठनदोषाः एवं प्रतिपादिताः –

शङ्कितं भीतमुद्धष्टमव्यक्तमनुनासिकम्। काकस्वरं मूर्ध्नि गतं तथा स्थानविवर्जितम्।।

विस्वरं विरसं चैव विश्लिष्टं विषमाहतम्। व्याकुलं तालुहीनं च पाठदोषाश्चतुर्दश।।

तेनैव अधमपाठकलक्षणानि इत्थं विशदीकृतानि –

गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः। अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः।।

पाठकगुणाः माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।

धैर्य लयसमर्थञ्च षडेते पाठकाः गुणाः।।

गम्भीरत्वमनैश्वर्यं निर्व्यूढिस्तारमन्द्रयोः।

संयुक्तवर्णलावण्यमिति पाठगुणाः स्मृताः।।

 Public domain. Digitization Muthulakshmi Research Academy

शिक्षणसूत्राणि

प्राचीनकालीनशिक्षाव्यवस्था गुरुकेन्द्रिता। आधुनिकशिक्षाव्यवस्था छात्रकेन्द्रिता। तादृशछात्रकेन्द्रितशिक्षाव्यवस्था शिक्षासिद्धान्तानां, शिक्षणसूत्राणां च आधारेण प्रचलति। यानि पाश्चत्यैः आविष्कृतानि इति तैः कथ्यते, अस्माभिः मन्यते च। किन्तु यानि शिक्षणसूत्राणि सम्प्रति सन्ति तानि सर्वाण्यपि अस्मत्प्राचीनैः अवलम्बितानि एव यथा –

तैत्तरीयोपनिषदि भृगवल्ल्यां भृगुः स्वपुत्राय ब्रह्मज्ञानमुपदिदेश। तत्र **"स्थूलात् सूक्ष्मं प्रति"**, **"ज्ञातात् अज्ञातं प्रति"**, इति शिक्षणसूत्रद्वयाधारेण भृगुणा उपदेशः व्यधायि। एवमेव वैयक्तिभेदानुगुणं बोधनं कथं कर्तव्यमित्यपि अनेन सम्यक् बोध्यते। एतादृशानि उदाहरणानि अस्माकं वेदेषु, उपनिषत्सु असकृत् दृश्यन्ते। एवमेव अस्माकं लौकिकन्यायाः ये वर्तन्ते तेषु बहवः आधुनिकशिक्षणसूत्राणां रूपान्तराणि एव। यथा स्थूलारुन्धतीन्यायः **"स्थूलात् सूक्ष्मं प्रति"** इत्यस्य रूपान्तरम्।

उपसंहारः

एवं शिक्षणविधयः, प्रविधयः, तदाधाराभुतानि शिक्षणसूत्राणि च अस्मत्संस्कृतवाङ्मये असकृत् लभ्यन्ते। वस्तुतः अस्माकं शिक्षाप्रणाली एव अत्यन्तं प्राविधिकं भवति। यथा शास्त्रपाठनार्थं सूत्राणि–वृत्तिः–वार्तिकान्नि–व्याख्यानं– उदाहरणम्–भाष्यम्–टीका एवं नैकविधं शिक्षणं, छात्रवैयक्तिकभिन्नताधारेण बोधन– प्रणाली अत्यन्त सम्माननार्हा वर्तते। न केवलम् एते प्रविधियः अपि तु, अत्याधुनिकं मन्यमानं अभिक्रमितानुदेशनम् (Programmed Learning) प्राचीनः एव। अस्मत्सूत्रप्रणाली अस्य आधारः। पाणिनीयाष्टाध्यायी अभिकमितानुदेशनस्य मूलरूपम्। भगवद्गीतायामपि विधिरयं दृश्यते। एवमेव लौकिकन्यायेषु नैके प्रविधयः, नैकानि शिक्षणसूत्राणि उपलभ्यन्ते। यद्यपि एते विधयः प्रविधयः, एतानि शिक्षणसूत्राणि संस्कृतविषयशिक्षणे उपयुक्तानि तथापि न केवलमेतानि संस्कृतभाषायाः, अथवा संस्कृतविषयाणां शिक्षणार्थं उपयोक्तुमर्हाणि अपि तु सर्वेषां विषयाणां शिक्षणाय उपयोक्तुमर्हाणि। न केवलमेतावन्मात्रं अपारे संस्कृतवाङ्मये इतोऽपि नैके प्रविधयः उपलभ्यन्ते। यैः नवीनशिक्षाप्रणाल्यां पुनर्नावीन्यमानेतुं शक्यते। ते च प्रविधयः ग्राह्याः। न केवलं ग्रहणमात्रमपि तु एते प्रविधयः शिक्षाक्षेत्रे अनुप्रयोक्तव्याः। न्यूनातिन्यूनं संस्कृतशिक्षाक्षेत्रे वा उपयोक्तव्याः इति शम्।

सन्दर्भग्रन्थसूची

1. शिक्षावासिष्ठम्, आचार्यश्रीधरवासिष्ठाभिनन्दनसमारोहसमितिः 2004।
2. कौटिल्यः, अर्थशास्त्रम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली – 2002।
3. पाणिनीयशिक्षा, राजस्थानीग्रन्थागार, जोधपुर, 2004।
4. तैत्तरीरोपनिषत्, गीताप्रेस् गोरखपुर, 2005।
5. बृहदारण्यकोपनिषत्, गीताप्रेस् गोरखपुर, 2004।
6. डॉ. च.ल.न. शर्मा, डॉ. फतेहसिंह – संस्कृतशिक्षणम् नवीनप्रविधश्च, जयपुरम्, 2007
7. डॉ.ए.सच्चिदानन्दमूर्तिः,वाकोवाक्यविधिः, सरयूप्रकाशनम्, 2010।
8. छान्दोग्योपनिषत्, गीताप्रेस् गोरखपुर, 2001।
9. डॉ. आर. गायत्री मुरलीकृष्णः, अध्यापनकौशलोद्दीपिका, गायत्रीप्रकाशनम्, 2008।

....

In Public domain. Digitization Muthulakshmi Research Academy

आस्तिकदर्शनानां समाजोपयोगिता

S.LSameraja

"भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा" इत्यार्योक्तिः। सत्स्वपि बह्वीसु भाषासु संस्कृतमेव भारतभूषात्वेन जेगीयतेत्यत्र तावन्निदानं तद्गतवाङ्मय– सम्पदेवेति निश्चप्रचम्। तत्र तावत् अकृतसुकृतानाम् असुलभं प्राणभृतामुत्कृष्टं दुर्लभं मानवं जन्म सदुपदेशेन सफलीकर्तुं श्रुतिस्मृतिदर्शनानि कृतककृतकेतरशास्त्राणि प्रवृत्तानि। तत्र च करुणावरुणालयैः मुनिभिः सर्वेषां जीवानां कल्याणमार्गदर्शनाय दर्शनानि प्रदत्तानि। प्रधानतया दर्शनानि षट् भवन्ति। तानि च – सांख्य–योग– वैशेषिक–न्याय–पूर्वोत्तरमीमांसाः। तथापि सत्यासत्य-विवेचनलक्षणं दर्शनत्वं व्याकरणस्यापि विद्यमानत्वात् **"समं सांख्यं च योगं च यः पश्यति स पश्यति"** इति सांख्य योगयोः समानतन्त्रत्वात् व्याकरणमपि षड्दर्शनेषु एव अन्तर्भवतीति केचन सूरयो मन्वते। तथा च –

कणादस्याक्षपादस्य व्यासस्य कपिलस्य च। पाणिनेर्जौमिनेश्चैव दर्शनानि षडेव हि।।

"शासनात्, शंसनात् शास्त्रं शास्त्रमित्यभिधीयते" इत्यनेन ज्ञायते शास्त्रं द्विविधं –शासकं, शंसकं चेति। तत्र शासकशास्त्रं क्रियापरकं, शंसक शास्त्रं ज्ञानपरकं च भवति। दर्शनानि सर्वाणि शंसकानि भवन्ति। दृश्यते ज्ञायते विचार्यते अनेन तत्त्वम् इति दर्शनम्। अर्थात् दर्शनानि ज्ञानदायकानि भवन्ति। ज्ञानस्य मूलस्रोतः वेदः। वेदेषु जीवोद्धरणाय आत्मज्ञान–ईश्वरज्ञान–तत्त्वज्ञान–अहिंसा–सत्य–तप–ब्रह्मचर्य–भक्ति–धर्म–योगादयः सम्यगुप–वर्णिताः। तत्र च सर्वोऽपि विषयः सर्वस्मै नाभिप्रेतम्। स्वश्रद्धानुगुणं एकैकः एकैकंमशं स्वीकृत्य मोक्षस्य पन्थानं दर्शयामासुः। अत एव दर्शनेषु परस्परं वैषम्यो दृश्यते। समाजे अस्ति प्रथा **"भिन्नरुचिर्हि लोकः"** इति, सामाजिकानां इच्छा यत्र भवति ते तं दर्शनं स्वीकर्तुमर्हन्ति। आस्तिकदर्शनानाम् इदं वैशिष्ट्यं यदमीषु धर्मबद्धता, प्रमाणबद्धता च भवति इति।

दर्शनानां प्रयोजनम् –प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते किमुत महामुनिप्रणीतानां दर्शनानां प्रवृत्तये। समाजसमुद्दिधीर्षयैव प्रवृत्तानि सर्वाण्यपि दर्शनानि। संसारबन्धेन संपीड्यमानान् मोचयितु "आत्मा वा अरे द्रष्टव्यः श्रोतव्यः मन्तव्यः निदिध्यासितव्यः", "तमेव विदित्वा अमृतत्त्वमेति नान्यः पन्था विद्यते अयनाय" इति आत्मयाथात्म्यज्ञानेन मोक्षमुपदिशति श्रुतिः। उक्तं च मनुना –**"सम्यक् दर्शनसम्पन्नः कर्मभिः न निबध्यते।**
दर्शनेन विहीनस्तु संसारं प्रतिपद्यते।।" इति।

स च मोक्षः "न स पुनरावर्तते" इति श्रुत्या नित्यः, निरतिशयश्च। अतः जनाः, सुखं मे भूयात् दुःखं माभूत् इति चिन्तयन्तः मुमुक्षुवो भवन्ति। यद्यपि दर्शनानां धर्मार्थकाममोक्षाख्य पुरुषार्थसाधनमेव परमं प्रयोजनं तथापि आनुषङ्गिकं भौतिकं प्रयोजनमप्यस्ति। संसारस्य वास्तविकं स्वरूपं दर्शनैः ज्ञायते। मानवस्य निष्कृष्टता दर्शनेन सिद्ध्यति। दर्शनेनः मानवः प्रमाणबद्धः, सात्त्विकः, धार्मिकः, शान्तिपूर्णश्च भवति। तेन समाजे मानवीयमौल्यानां रक्षणं भवति। दर्शनैः वेदप्रमाण्यरक्षणं भवति। न केवलं तावन्मात्रं प्रयोजनं–दर्शनेषु बहवः वैज्ञानिकाः अंशाः अपि प्रतिपादिताः ये च लोके पाश्चात्याविष्कारा इति मन्यन्ते। सम्प्रति प्रत्येकस्य

In Public domain. Digitization Muthulakshmi Research Academy

दर्शनस्य परिचयपुरस्सरं तदीयदर्शनस्य सामाजिक प्रयोजनान्यपि नातिन्यूनं प्रतिपाद्यन्ते। तत्र प्राचीनतमत्वात् प्रथमतया सांख्य दर्शनस्य परिचयो दीयते।

सांख्यदर्शनम्—अस्य दर्शनस्य प्रवर्तकः कपिलमुनिः। संख्यायाः प्राधान्यादिदं दर्शनं सांख्यमिति प्रख्यातम्। संख्या शब्दस्यास्ति अर्थद्वयम्, एकत्वादिव्यवहारहेतुः विवेकज्ञानं चेति। सांख्यदर्शने एव प्रप्रथमतया 25 तत्त्वानां परिगणना कृता। अतः संख्यायाः प्राधान्यम्। एवं प्रकृतिपुरुषयोः विवेकज्ञानेन मोक्षप्राप्तिरिति प्रतिपादयदिदं दर्शनम् अन्वर्थनाम भवति। आध्यात्मिक–आदिदैविक–आदिभौतिकदावाग्निदग्धानां दुर्दशादूरीकरणाय प्रवृत्तमिदं सांख्य शास्त्रम्। अत एव कारिकासु **"दुःखत्रयाभिघातात् जिज्ञासा तदभिघातके हेतौ"** इति।

आध्यात्मिकतापस्य आदिभौतिकतापस्य च दृष्टेनापि आयुर्वेदादिना उपशमो दृष्टः इति अस्य दर्शनस्य वैय्यर्थ्यता न भवति। यतोहि दर्शनेन या आत्यन्तिकी दुःखनिवृत्तिः सा आयुर्वेदादिभिर्न सिद्ध्यति। अतः दुःखनिवृत्तिरस्य प्रयोजनमिति शक्यं वक्तुम्।

अपि च सांख्ये मानवानां प्रीत्यप्रीतिविषयकाः सत्त्वरजस्तमोगुणाः प्रतिपादिताः। जगति सर्वेषु, पदार्थेषु (आत्मानं विना) गुणत्रयं भवति। लोके जना अपि सात्त्विकाः, राजसाः, तामसाः इति त्रिविधाः भवन्ति। तत्र सात्त्विकानां स्वभावः सर्वजनमोदकारी भवति। आहारोऽपि त्रिविधः, सात्त्विकाहार स्वीकारेण जनाः सात्त्विकाः भवन्ति। तथा यज्ञदानादिषु तत्फलेष्वपि त्रिविधता दर्शिता भगवता गीतायां श्रद्धात्रयविभागयोगे। सत्वगुणाविष्टः जनः क्रूरत्वादि राजस, तामसभावनाभ्यां दूरः सन् शान्तियुक्तो भवति। एवं सत्त्वगुणावलम्बनेन शान्तिः शक्या समाजे व्यवस्थापयितुम्। प्रकृतिपुरुषविवेकज्ञानात् मोक्षः इति सांख्यसिद्धान्तः। न केवलं तादृश विवेकज्ञानेन मोक्ष एव प्रयोजनं, अपितु अहंकारापगमोऽपि। येन च मनुष्यः कृतेषु कर्मसु स्वाभिमानं न प्रदर्शयति। तथा च गीतायां –

"प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः। अहंकार विमूढात्मा कर्ताहमिति मन्यते।।" इति।

तत्त्वाज्ञानात् निर्लिप्तः पुरुषः इति ज्ञाते सति स्वभिमानो नश्यति। अत एव **"नास्ति सांख्य समं तत्त्व"**मिति प्रख्यातिरस्य लब्धा।

योगदर्शनम् – यद्यपि **"सांख्ययोगौ पृथक् बालाः प्रवदन्ति न पण्डिताः"** इति द्वयोः समानतन्त्रत्वेऽपि साधनभेदात् क्वचिदंशे योगदर्शने विशेषता अनुभूयते। सांख्ये चेतनाचेतनविवेकज्ञानेन मोक्षः, योगे तु योगक्रियाजन्यज्ञानं मोक्षकारणम्। क्रियाप्राधान्यपूर्वकं ज्ञानम् इत्यस्य विशेषः। दर्शनस्यास्य कर्ता भगवान् पतञ्जलिः। सम्बन्धः, मार्गः इति योगशब्दस्य अर्थद्वयमस्ति। दार्शनिकाः जीवात्मपरमात्मनोः सम्बन्धः योग इति कथयन्ति। पतञ्जलिना तु भक्तियोगः, ज्ञानयोगः इत्यादीनां मार्ग इत्यर्थे प्रयोगदर्शनात् तस्य द्वितीयार्थमादाय लक्षणमित्थं सूत्रितं –

In Public domain. Digitization Muthulakshmi Research Academy

"योगः चित्तवृत्तिनिरोधः" इति।

इतस्ततः भ्रममाणाः चित्तवृत्तयः मनोरोगस्य कारणभूताः भवन्ति। यथा –

"ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते। सङ्गात्सञ्जायते कामः कामात्क्रोधोभिजायते।। क्रोधाद्भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः। स्मृतिभ्रंशात् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति।।"

ततः मनुष्याणां आयुःप्रमाणमपि न्यूनीभवति। योगेन चित्तस्य एकाग्रता सिद्ध्यति। यथा यमनियमाद्यष्टाङ्गयोगेन प्रयोजनबाहुल्यं सम्प्रति समाजे अनुभूयमानमेव। यमनियमप्राणायामादिभिः कष्टतमं मनोनियन्त्रणं साधयितुं शक्यम्। चित्तैकाग्रता सम्पादनेन लोकोत्तरशक्तीनां प्राप्तिः कर्तुं शक्या। यथा – जले प्लवनं स्वस्य शरीरबहुत्वम् इत्याद्यंशाः अपि योगिनामेव। योगासनादिकरणेन शरीरस्य स्वस्थता दाढर्यता च भवति। अत एव उच्यते महाजनैः **"नास्तियोगसमं बलम्"** इति। अष्टाङ्गयोगेन सकलविधसंकल्पशून्यत्वे सति समाधिस्थितिः भवति। तत्र अहंकारस्याभावेन मनो निर्मलत्वात् जीवात्मपरमात्मनोः ऐक्यं सिद्ध्यति। तदा च –

"भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्यकर्माणि तस्मिन् दृष्टे परावरे।।"

वैशेषिकदर्शनम् –दर्शनमिदं महामुनिकणादेन विनिर्मितम्। संसारपीडां परित्यक्तुम् इच्छन्तो जनाः परमेश्वरसाक्षात्काराय यतन्ते।

"यदा चर्मवदाकाशं वेष्टयन्तीह मानवाः। तदाशिवमविज्ञाय दुःखास्यन्तो भविष्यति।।" इति।

परमेश्वराज्ञानेन संसारः दर्शितः। परमेश्वरसाक्षात्काराय च श्रवणमननादि साधनानि कर्तव्यत्वेन उपदिष्टानि। तत्र मननमनुमानाधीनं, तस्य चानुमानस्य व्याप्तिज्ञानाधीनत्वात्, व्याप्तिज्ञानस्य पुनः पदार्थविवेकाधीनत्वात् दर्शनेऽस्मिन् पदार्थविचारः प्रतिपाद्यते। अत्र सप्तपदार्थाः अभ्युपगताः विशेषस्य पदार्थत्वेन स्वीकारादिदं वैशेषिकदर्शनमिति ख्यायते। **"अथातो धर्मं व्याख्यास्यामः"** इति आरब्धेऽस्मिन् दर्शने सन्ति बहवः ज्ञतव्याः अंशाः। विशिष्य परमाणुजगत्कारणवादिभिः एतैः अणूनां संयोगविभागौ सम्यक् प्रपञ्चितौ। अणूनां संयोगेन द्व्यणुक, त्र्यणुकादि क्रमेण सृष्टिः, तथा व्युत्क्रमेण त्रसरेणुपर्यन्तं विभागश्च सम्यक् न्यरुपि। आधुनिकैः यः एलक्ट्रान्, प्रोटान् इति विभागो क्रियते, तत्सर्व प्राचीनैः पूर्वमेव सूक्ष्मतया विचारितम्। सर्वस्मिन्नपि पदार्थे कश्चन विशेषो भवतीति कणादेन तस्मिन्नेव काले प्रतिपादितम्। तच्च आधुनिकैः अपि अङ्गीकियते यत् परमाणुषु काचित् अलौकिकी शक्तिरस्तीति। अतः इदं दर्शनं न केवलं पदार्थज्ञानेन निःश्रेयसाधिगमे, अपितु विज्ञानप्राप्तयेऽपि। एवं **"यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः"** इति अभ्युदयशब्देन समाजाभ्युदयः धर्माधीनः इत्यपि कथयति। सामाजिके शास्त्रेऽस्मिन् बहवः धर्माः अपि निरुपिताः।

न्यायदर्शनम् –न्यायदर्शनमस्य प्रवर्तकः महर्षिगौतमः। न्यायेऽपि पदार्थतत्त्वज्ञानेन निःश्रेयसमिति समानम्। तथापि **"मानाधीना मेयसिद्धिः"** इति उक्तत्वात् प्रमाणादिविचारः अत्र विस्तृतं प्रतिपाद्यते। तथा च – **"प्रमाणैः अर्थ परीक्षणं न्यायः"** इति।

 In Public domain. Digitization Muthulakshmi Research Academy

अत्र दर्शने प्रमाणादि निग्रहस्थानान्ताः षोडश पदार्थाः स्वीक्रियन्ते। पदार्थानां सम्यक् ज्ञानाभावेन मिथ्याज्ञानं, ततः दोषः, ततः प्रवृत्तिः, ततो जन्म, तस्मात् दुःखमिति, सर्वस्य अपगमे मोक्षः इति। अतः मिथ्याज्ञानापनयाय अर्थपरीक्षणं क्रियते। तत्र प्रमाणानि प्रत्यक्षानुमानोपमानशब्दाः इति। विशिष्य दर्शनेऽस्मिन् अनुमानस्योपयोगोऽधिकतया भवति। अनुमानप्रमाणगतानां छल, जाति, निग्रहस्थानानाम्, उपाधिप्रभृतिदोषाणां च ज्ञानेन विजयप्राप्तिपुरस्सरं वादिपराजयः कर्तुं शक्यः। दर्शनेनैतेन सर्वस्मिन्नपि विषये परिनिष्पन्नता सम्पादनाय प्रमाणैः परीक्षणमभ्यसितो भवति।

पूर्वमीमांसा – द्वादशलक्षण्याः मीमांसादर्शनस्य प्रणेता महर्षिजैमिनिः। **"अथातो धर्मजिज्ञासा"** इत्यारभ्यमाणेऽस्मिन् दर्शने कर्मकाण्डभागः विचार्यते। विशिष्य यागादिकर्मणाम्। अमीषां मते स्वर्गप्राप्तिरेव मोक्षः स च यागसाध्यः, यागादिरेव धर्मः। अतोऽत्र धर्मविचारः क्रियते। न केवलं मोक्षप्राप्तिः, अपितु धर्मार्थकामानामपि प्राप्तिः दर्शनेनानेन भवति। यथा समाजे जनाः विविधानां कामनानां पूरणाय यतन्ते। "पुत्रकामो यजेत" इत्यादि अनुशासनादिभिः वेदः तान् कर्मणि योजयति। "श्येनेन यजेत" इत्यादि वेदवाक्यानामवलोकनेन धर्माधर्मविषयक संदिग्धे सति मीमांसा विचारं कृत्वा जनान् धर्मे प्रवर्तयति अधर्मात् निवर्तयति च। यागादिषु प्रदीयमानेषु आहुतिषु ओषधीगुणाः पर्यावरणं स्वच्छयन्ति। तथा तत्कर्तुः अपि चित्तशुद्धिः भवति। कर्मकाण्डे मानवकल्याणदायकाः संस्काराः गर्भाधानात् श्मशानपर्यन्ताः प्रपञ्चिताः। तथा कृतानां दोषाणां पापापनयाय प्रायश्चित्तानि अपि अस्मिन् दरीदृश्यन्ते। एवं प्रकारेण मीमांसा समाजमुपकरोति।

व्याकरणदर्शनम् –**"मुखं व्याकरणं स्मृतम्"** इतिना वेदाङ्गभूतं व्याकरणं सुधीभिः दर्शनत्वेनापि अभ्युपगम्यते।

दृष्ट्वारूपे व्याकरोत् सत्यानृते प्रजापतिः। अश्रद्धामनृते दधाच्छ्रद्धां सत्ये प्रजापतिः।। इति।

एवं सत्यात्यत्यविवेचनं व्याकरणस्य सिद्धयति। दर्शनमिदं पाणिनिकृतं भवति। वैय्याकरणास्तावत् वचसां चातुर्विध्यं स्वीकुर्वन्ति – परा, पश्यन्ती, मध्यमा, वैश्वरी चेति। **"वाग्वै ब्रह्म"** इति श्रुतिः, ब्रह्म च नित्यम्, अत्र चतसृषु वाक्षु परा वाक् नित्येति अभ्युपगमः वैय्याकरणानाम्। पश्यन्त्यादिकं जगत् सर्व नामरूपैः व्याकृतमनृतं च यथा वेदान्ते। **"ते मृत्युमतिवर्तन्ते यो वै वाचमुपासते"** इति व्याकृतिरूपोपासनया अस्य दर्शनत्वं दृढं भवति। व्याकरणदर्शनात् कण्ठताल्वादिस्थानानां, ह्रस्वदीर्घादिमात्राणां मूलज्ञानं प्राप्तुं शक्नुमः। **"अथ शब्दानुशासनम्"** इत्यारब्धेऽस्मिन् शब्दानां उत्पत्तिः, उच्चारणं, वर्णनां लेखनक्रमः इत्यादयो विषयाः जनविज्ञानदायकाः। सम्प्रति काले **"फोनेटिक्स्"** इति यदुच्यते तत् प्रथमतया संस्कृतव्याकरणादेव निर्गतम्। निर्दुष्टोच्चारणाय व्याकरणमत्यन्तावश्यकम्। तथा च – "यद्यपि बहुनाधीषे तथापि पठ पुत्र व्याकरणं, स्वजनः श्वजनो माभूत्, सकलं शकलं सकृत् शकृत्" इति। शब्दानां साध्वसाधुज्ञानं व्याकरणाध्ययनाधीनम्। येन असाधुशब्दप्रयोगेन वयं समाजे अवमानिताः न भवेम। तथा साधुशब्दप्रयोगस्य प्रयोजनमपि पण्डितैरित्थं प्रोच्यते – **"एकः शब्दः सम्यक् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गेलोके कामधुक् भवतीति"**।

In Public domain. Digitization Muthulakshmi Research Academy

वेदान्तदर्शनम् –

चतुर्लक्षणी शारीकमीमांसा भगवता बादरायणेन प्रणीता। **"वेदान्तो नाम उपनिषत्प्रमाणम्"**। उपनिषदां तात्पर्यं ब्रह्मण्येव, तच्च ब्रह्म सत्यं, नित्यम्, एकमेवाद्वितीयम्, इतरत् सर्वं दृश्यमानं जगत् मिथ्याभूतम् अनात्मविषयकम्, अनित्यम्, वेदान्तमहावाक्यजन्यात्मयाथात्म्यज्ञानेन जीवब्रह्मैक्यानुभवः मोक्षः इति प्रतिपादयदिदं दर्शनं मानवस्य नित्यनिरतिशयपरमपुरुषार्थप्राप्तये ज्ञानमार्गं प्रदर्शयति। संसारबन्धात् लोकान् मोचयदिदं शास्त्रं शान्तिदायकं भवति। **"ब्रह्म सत्यं, जगन्मिथ्या"** इति प्रतिपादनेन मिथ्या वस्तुनि उपेक्षाबुद्धिः, सत्ये अपेक्षा बुद्धिश्च उद्भवति। वेदेऽपि **"सोऽन्वेष्टव्यः" "स विजिज्ञासितव्यः" "आत्मा वा अरे द्रष्टव्यः" "तरति शोकमात्मवित्"** इति बहुधा नित्यशुद्धबुद्धमुक्तस्वभावम् आत्मतत्त्वं ज्ञातव्यत्वेन उपदिशति। आत्मज्ञानी कर्मभिः तद्गतरागद्वेषादिभिश्च न लिप्यते तथा च गीतायां –

न मां कर्माणि लिप्यन्ति न मे कर्म फले स्पृहा। इति मां योऽभिजानाति कर्मभिर्न स बध्यते।।

"अथातो ब्रह्मजिज्ञासा" इत्यारब्धमिदं शास्त्रं नित्यमुक्तं जीवं तत्त्वमस्यादिना ज्ञापयति। अस्य दर्शनस्येदं वैशिष्ट्यं यत् तिरोहितस्य मोक्षस्य आवरणापगमः केवलं ब्रह्मज्ञापनेन क्रियते। न तु अनावश्यकानाम् अनात्मविषयाणां लौकिकपदार्थानां विचारणेन। अतः एव दर्शनेऽस्मिन् बोधनपद्धतयः सम्यक् ज्ञायन्ते। तथा जीवस्य अवस्थात्रयं संन्यासाश्रमः, सृष्टिप्रक्रिया, मरणानन्तरं जीवस्य जन्मपर्यन्तं का वा स्थितिः, कृतानां पापपुण्यानां का गतिः इत्यादिप्रश्नानां मानवबुद्धिं संपीड्यमानानां समाधानोऽत्र लभ्यते। वेदान्तपठनेन कश्चन अलौकिकः आनन्दो भवति। मानवश्च भावाविष्टो (Emotional) न भवति। निष्कामी च भवति। मुक्तिदायकं तु शास्त्रं वेदान्त एव भवतीत्यत एव सर्वेषां शास्त्राणां तात्पर्यम् वेदान्तेति कथ्यते।

उपसंहारः –दर्शनानि न केवलं वैदिकानि अपितु सामाजिकानीति तेषां आरम्भे एव जिज्ञासा, अनुशासनपदैः ज्ञाप्यते। उपक्रमश्च तात्पर्यलिङ्गं, लोककल्याणकारित्वं दर्शनत्वं तत्रैव तेषां तात्पर्यम् इति सूचयति। स्यादेतत्, ईदृशं महदुपकारकं दर्शनं किं भुक्तिं प्रयच्छति? इति। कुतो न, दार्शनिकं शास्त्रं पठित्वा नैके जनाः जीविकां लभन्ते। न केवलं अध्यापनेन, अपितु विज्ञानपरिशोधनेनापि। अतः विज्ञानभाण्डारभूतं संस्कृतवाङ्मयं रक्षामहे सेवामहे नन्दामहेति शम्।

सन्दर्भग्रन्थसूची : –

1. श्रीज्वालाप्रसादगौड, सांख्यकारिका, चौखम्बाविद्याभवनम्, वाराणसी, 2001।
2. डॉ. कपिलदेवद्विवेदी, संस्कृतनिबन्धशतकम्, विश्वविद्यालयप्रकाशनम्, वाराणसी,. 2005।
3. डॉ. शिशिरकुमारपाण्डेय, ज्ञानायनी, अखिलभारतीयभाषासङ्घम्, लखनऊ, 2008।
4. श्रीमद्भागवद्गीता, गीताप्रेस गोरखपुर, 2004। 5 सर्वदर्शनसङ्ग्रहः, भारतीयबुक्कार्पोरेशन्, देहली, 2008।
6. डॉ. श्यामवृक्षमौर्य, समाज दर्शन और राजनीति, सत्यं पब्लिशिङ्ग् हाउस, 2006।
7. तर्कसङ्ग्रहः, चौखम्भा संस्कृत संस्थाने, वाराणसी, 2003।
8. मनुस्मृतिः, चौखम्भा संस्कृत संस्थान, वाराणसी, 2001।
9. कठोपनिषत्, गीताप्रेस गोरखपुर, 2004।
10. संस्कृत में विज्ञान, संस्कृत भारती, नवदेहली 2004।
11. व्याकरणदर्शनभूमिका, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, 1992।
12. ब्रह्मसूत्रशाङ्करभाष्यम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली।

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृतभाषारक्षणे संस्कृतभारत्याः योगदानम्

(Contribution of Samskrita Bharati towards Samskrita Language)

Shivaramakrushana

'ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती ।व्याहार उक्तिर्लपितं भाषितं वचनं वचः' ।। इत्यमरः भाष् व्यक्तायां वाचि। भाष्यते इति भाषा । भाषायाः व्यवहारः भवति चेदेव सा व्यावहारिकी भाषा इति कथ्यते । तर्हि सा भाषा व्यावहारिकी भवितुं तस्याः रक्षणं कथं कर्तुं शक्यते इति पश्यामः । यस्याः कस्याः अपि भाषारक्षणं नाम चतुर्णां कौशालानां सम्यगाचरणमेव। 1.श्रवणम् .2.भाषणम् 3. पठनम् 4.लेखनम् कदाचित् भाषाधिगमे सोपनानां स्थानभ्रंशः भवति तर्हि तस्यां भाषायां अधिगमः कष्टतरः भवति। सम्पूर्णतया नाधिगता भवतीति अधो दत्तचित्रदर्शनेनापि ज्ञातुं शक्यते।



तर्हि तादृशसन्दर्भे संस्कृतभाषा विषये का स्थितिः इति पश्यामः। संस्कृतं नाम दैवी वाक् इति उक्तिः। संस्कृतमिति पदस्य अर्थ सम्यक् कृतं अथवा परिष्कृतं इति वा वक्तुं शक्यते।

'या सत्संस्कृतिसम्प्रदायजननी या सर्वविद्याः प्रसूः या वेदोपनिषद्सर्वोपचयसत्काव्यश्रिया राजते।
या देशस्य जनस्य सर्ववचसाञ्च ऐक्यप्रदानोद्यता सा भाषा द्युसदां सदा विजयताम् आचन्द्रतारारुणम्' ।।

या सर्वेषां उत्तमसंस्कृतीसाम्प्रदायानां जननी वर्तते, यस्यां सर्वोपनिषदः, वेदाः, इतिहासाः, काव्यानि च निहितानि वर्तन्ते, यैश्च विराजमाना वर्तते, या देशे विद्यमानां भिन्नभिन्नजनानां वा प्रान्तानां वा ऐक्यतायां मूलभूता वर्तेते सा भाषा आचन्द्रतारारूणं विराजताम् इति। तथा या प्रकाशमाना वर्तते सैव संस्कृतभाषा। तादृश्याः महत्वपूर्णायाः भाषायाः अपि कश्चन सन्धिकालः सन्देहकालश्च समागतः इव भाति। इदानीं सः कीदृशकालः इति, सः कथं दूरीक्रियते सर्वमपि परिशीलनरूपेण जानीमहे। सर्वासां भाषाणां जननी इव विराजमानायाः संस्कृतभाषायाः अवनतेः बहुकारणानि सन्ति। केवलं 1. देवभाषा 2. पण्डितभाषा 3. मतभाषा 4. निर्जीवभाषा(मृतभाषा) 5. शास्त्रभाषा 6. अवैज्ञानिकी भाषा 7. वेदभाषा 8. मेकालेविद्याविधानप्रभावः 9. संस्कृतसंस्थानां उपजनं गमनन्यूनता 10. मनसि – संस्कृतं बहु कठिनम्। 11. संस्कृतभाषा लुप्तप्राया; पुनः तस्याः उज्जीवनं न शक्यम्। संस्कृतं अनिवार्यम्, आवश्यकमेव इति वा नास्ति, यतः संस्कृतेन विना अपि जीवनं शक्यम् इति एते विचाराः दृढमूलाः सन्ति । अतः अस्माभिः जनमानसे संस्कृतविषये *सरलम्, साध्यम्, अनिवार्यम्'* इति भावत्रयं निर्मातव्यम् ।

संस्कृतस्य त्यागस्य कारणेन अद्यापि अनुभूयमानानि फलितानि –

- तत्तत् भाषाभाषिणां अनैक्यता । संस्कृतिविस्मरणम्।
- वैदिकविज्ञानं किमिति ज्ञानाभावः । सङ्घटनाभावः।
- संस्कृतसाहित्यज्ञानाभावः । लिपिज्ञानाभावः ।
- प्रान्तीयभाषाणां शब्दकोशनिर्माणे जायमानाः क्लेशाः। **क्रियासिद्धिः भवति महतां नोपकरणे**

In Public domain. Digitization Muthulakshmi Research Academy

एतादृशक्लिष्टस्थितौ निष्ठावतां त्रिचतुर्णां संस्कृतछात्राणां स्वयं सेवकानां मनस्सु सङ्घर्षणम् आरब्धम्। किमपि लोकहितकार्यकरणीयमिति बुद्ध्या ते देशहितं कार्यं, सर्वसमस्यानां परिष्कारसूत्रं संस्कृतमिति, संस्कृतशस्त्रेण भारतं पुनः जगद्गुरुं कर्तुं सङ्कल्पितवन्तः।

1981तमवर्षसमये बहवः संस्कृतसंस्थाः कार्यं कुर्वन्ति स्म । तथापि विशिष्टां पद्धतिमाश्रित्य अचिरादेव सर्वं भारतं संस्कृतमयं कर्तुं प्रणालिकाः रचितवन्तः। हिन्दुधर्मप्रतिष्ठानमिति नाम्ना शिबिरादिकं ज्येष्ठेभ्यः मार्गदर्शनं स्वीकुर्वन्तः स्वबुद्ध्या अपि विचिन्त्य कार्यं कुर्वन्ति स्म । तथा तेषां मनसि सन्धृतः सङ्कल्पः एव अद्य संस्कृतभारती नाम्ना संस्कृतगङ्गा सर्वान् मनांसि पुणीकरोति। तयैव अद्य विश्वे सर्वत्र संस्कृते तरङ्गाः उद्भूयन्ते। तेषां सङ्कल्पः एव बहूनां जन्मधन्यं करोति। 1995 आरभ्य संस्कृतभारती नाम्ना क्रियमाणस्य सङ्कल्पस्य नामानि यानि वा भवन्तु कार्यशीलाः क्रियाशीलाः लक्ष्यप्राप्तये कार्याणि कुर्वन्तः भवन्ति।

संस्कतभाषायाः रक्षणे संस्कृतभारत्याः योगदानम् – प्रथमं संस्कृतभारती नाम का इयं सर्वकार्यस्य संस्था उत केवलं विद्यासंस्था अथवा स्वच्छन्दसंस्था वा इति बहूनां मनस्सु प्रश्नः उदेत्येव। एतस्य प्रश्नस्य समाधानं अग्रे प्राप्नुमः। सङ्घे शक्तिः कलौ युगे कलियुगे सङ्घटनस्य महत्वं बहु वर्तते। यं कमपि विषयं साधयितुं आन्दोलनकर्तुश्च सङ्घटनमपेक्षितमेव यतः तेनैव सङ्घटेनेनैव वैदेशिकानामाक्रमणं अस्य देशस्योपरि सञ्जातम्। विघटनाभावेनैव वयं संस्कृतसंस्कृतिविषये सर्वं नष्टवन्तः। इदानीमपि वयं तस्य फलं अनुभवन्तः स्मः एव। अतः एतस्मिन् विषये संस्कृतभारत्याः स्पष्टकल्पनया इतरासां संस्थानां सहयोगेन कार्यं कुर्वती अस्ति। संस्कृतभारती भाषादृष्ट्या, भाषाद्वारा सङ्घटनदृष्ट्या कार्यं करोति। लक्ष्यमुन्नतं तथा प्राप्नुयाम जीवने सर्वसंस्कृतसंस्थानां सहयोगेन संस्कृतभारत्या क्रियमाणसंस्कृतान्दोलनस्य किं लक्ष्यम् -

संस्कृतभाषायाः उन्नतिः। संस्कृतभाषा राष्ट्रभाषा भवेत् (इदानीमपि राष्ट्रभाषात्वमस्ति एव)।

राष्ट्रस्य परमवैभवस्थितिः। कृण्वन्तो विश्वमार्यम्। संस्कृतं संस्कृतिस्तथा –संस्कृतं द्वारा संस्कृतिः।

तर्हि सङ्घटनं नाम किम् –सङ्घटनं नाम समवायः काकानां समवायः सङघटनं न।

विपण्यां दृश्यमानः जनसमूहः सङ्घटनं न । रथयात्रायां जनसमूहः भवति सोपि सङ्घटनं न।

चित्रमन्दिरेषु, उत्सवेषु जनसमूहः भवति तदपि सङ्घटनं इति वक्तुं न शक्यते।

संस्कृतभारत्याः सङ्घटनविषये कल्पना का इति वयं भाषाशिक्षणस्यानन्तरं वयं ज्ञास्यामः।

अत्र वयं भाषादृष्ट्या अस्याः संस्कृतभारत्याः योजनाः पश्यामः। यत्किमपि कार्यं करणीयमिति चेत् तत्र कानिचन प्राथमिकसूत्राणि पालनीयानि भवन्ति। विशिष्य शिक्षाविभागे तु प्रामाणिकानि भवन्ति चेदेव तानि आचरणयोग्यानि भवन्ति।

अतः शिक्षाविभागे सामान्यतया संस्कृतभारत्या आचर्यमाणशैक्षणिकसूत्राणि -

1.सरलात् कठिनं प्रति। ज्ञातात् अज्ञातं प्रति। संस्कृतभारती - भाषा द्वारा सङ्घटनम् संस्कृतभारती - कार्याणि – कार्यक्रमाः

शैक्षणिककार्याणि – 1. दशदिनसरलसंस्कृतसम्भाषणशिबिरम् 2.साप्ताहिकशिक्षणम्

3. बालकेन्द्रम् 4.पत्राचारसंस्कृतम्–प्रवेशः,परिचयः,शिक्षा, कोविदः

5. भाषाप्रवेशः 6.गीताशिक्षणकेन्द्रम् 7.शब्दशाला

8. भाषाव्युत्पत्तियोजना 9. विविधशास्त्रप्रशिक्षणम् 10. वेदसंरक्षणम्

11. संवादशाला 12. सम्भाषणसन्देशः इत्यादि

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृतभारत्याः सामाजिककार्यक्रमाः –

1. संस्कृतदिनोत्सवः – सप्ताहः 2. व्यासजयन्तिः 3. वाल्मीकिजयन्तिः
4. गीताजयन्तिः 5. वसन्तपञ्चमी 6. विवेकानन्दजयन्तिः
7. अम्बेड्करजयन्तिः इत्यादि

संस्कृतभारती कुत्र कुत्र कार्यं करोति – संस्कृतभारत्याः कार्यं विश्वव्याप्तकं कार्यम् भवति ।

विद्यासंस्थाः – 1. विद्यालयाः 2. कलाशालाः 3.विश्वविद्यालयाः

समाजः –

1. उपेक्षितस्थानानि विशिष्य एतान्येव अपेक्षितस्थानानि अपि
2. न्यायस्थानानि 3. वैद्यशालाः 4.देवालयाः 5. स्वच्छन्दसंस्थाः
6. प्रसिद्धस्थानानि इत्यादि स्थानेषु ।

संस्कृतभारती चिन्तयति यत् संस्कृतरक्षणं नाम संस्कृतसेवनमेव इति ।

संस्कृतभारत्याः सिद्धान्ताः – 1 स्वस्मै स्वल्पम् – समाजाय सर्वस्वम् ।
2. अर्पितमेतत् जीवनपुष्पम् मातस्तव शुभपादतले ।
3 नाहं कर्ता कारयसि त्वं।

रचयेम संस्कृतभवनम्

दशदिनसरलसंस्कृतसम्भाषणशिबिरम् –

इदमेव संस्कृतभारत्याः मूलं भूतं कार्यम् विद्यते। इदमेव संस्कृतभवनस्य मूलस्तम्भः। इदमेव सर्वेषामपि प्रेरणादायकं मन्त्रम्। इदमेव आदर्शदायकसूत्रम्। इदमेव Desert मध्ये oasis वत् आधुनिकजगति संस्कृतभाषा लुप्तप्राया इति काले सर्वेषामपि आशाज्योतिरभूत् । संस्कृतं सर्वेषां न कस्यापि एकस्य इति भावनया भिन्न, भिन्न प्रयोगान् कृत्वा बहूनि शिबिराणि कृत्वा पाठ्यप्रणालीं रचितवन्तः यथा वैज्ञानिकाः सर्वे शिक्षाशास्त्रविद्भश्च अङ्गीकुर्वन्ति।

शिक्षाशास्त्रे यथा प्रथमं भाषायाः अभ्यसने श्रवण–भाषणकौशलयोः प्राधान्यं देयमित्युच्यते तथैव शिबिरेऽपि श्रवणभाषणकौशलयोरेव प्राधान्यं भवति। अत्र पठनलेखनकौशलयोः गौणं भवति । तदनन्तरस्तरेषु प्राधान्यता दीयते न तु दशदिनशिबिरे।

अपेक्षिताः – सर्वेऽपि श्रद्धालवः, इच्छुकाः अर्हाः ।अत्र तर, तमभेदभावनाः न भवन्ति । अर्थात् भाषाभेदः , प्रान्तभेदाः, जातिभेदाः, कुलभेदाः, मतभेदाः, देशभेदाः इति न भवन्ति , इयमेव भावना सर्वेषां मनांसि जयति । इयमेव उपासना संस्कृतसेवकानां, संस्कृतकार्यकर्तृणां, संस्कृतभारत्याश्च ।

लक्ष्यम् – मुखे मुखे च संस्कृतम् – गृहे गृहे च संस्कृतम्

लक्ष्यम् द्विविधम् भवति। 1. सामान्यलक्ष्यम् 2. विशिष्टलक्ष्यम्

1. सामान्य लक्ष्यम् – यः कोऽपि सामान्यजनः , उपेक्षितबन्धुः यदि शिबिरार्थी भवति तर्हि समाजे याः अपप्रथाः वर्तन्ते ताः सर्वाः अपि असत्यपूर्वकाः, न तु सत्यपूर्वकाः इति विश्वासं कुर्यात्। सः संस्कृतेन संस्कृतः भवतु , संस्कृतानुरागी भवतु,। न तु केवलं तावदेव सः तृप्तः भवतु, इतरेषामपि प्रोत्साहं ददातु।

इतोऽपि अग्रे संस्कृतकक्ष्याणां प्रवेशने इच्छुकः भवतु । संस्कृताध्ययने तस्य रुचेः वर्धनं भवतु ।

In Public domain. Digitization Muthulakshmi Research Academy

2. विशिष्टलक्ष्यम् – सामान्यलक्ष्यप्राप्तिद्वारा सः शिबिरार्थी विशिष्टलक्ष्यप्राप्तये उपयोगाय भवति। यतः इदमेव सम्पूर्ण, समग्रलक्ष्यप्राप्तये – सः शिबिरार्थी अनुवर्तनद्वारा साप्ताहिकमेलनं प्रविशतु, एवमेव विविधकक्ष्यासु भागग्रहणं कुर्वन् स्वस्यविकासविषये, संस्कृताभिंवृद्धिविषये, संस्थाविकासविषये च चिन्तयतु ।

1. सः प्रथमं नित्यसम्पर्कितः भवतु, प्रशिक्षितः भवतु, शिबिरचालकः भवतु, बालकेन्द्रचालकः भवतु, क्रियाशीलकार्यकर्ता भवतु, पूर्णकालिकः भवतु इति।
2. प्रथमं सः प्रेरितः भवतु, इतरान् अपि प्रेरयतु।
3. सोऽपि बहून् वर्गान् चालयतु ।

शिबिरसमयः – प्रतिदिनं घण्टाद्वयं, दशदिनानि भवति कदाचित् शिबिरार्थीनां सौकर्यानुगुणं प्रतिदिनं सार्धैकघण्टा, पञ्चदशदिनान्यपि भवितुमर्हति।

शिबिरस्थलम् – यत्र 30 अधिकाः जनाः उपलभ्यन्ते तत्रैव शिबिरमायोज्यते। शिबिरचालकः शिबिरार्थीनां समीपं स्वयं गत्वा शिबिरं चालयति।

अपेक्षितस्थानानि – निर्दिष्टकेन्द्रं प्रत्येव आगन्तव्यम् इति नियमः नास्ति। यत्र सर्वेषामपि सौकर्यं भवति तदेव शिबिरस्थानं भवितुमर्हति ।

माध्यमम् – सरलसंस्कृतमाध्यमम् आश्रयति। पिपासानिवारणाय यत् पातव्यम् आरोग्यदायकं तदेव पातव्यम्। रोगनिवारणाय यदौषधं स्वीकर्तव्यं तदेव स्वीकरणीयम्। संस्कृतभारती एतस्मिन् विषये दृढतया नियमं पालयति। पूर्णतया संस्कृतमाध्यमेनैव बोधनं करोति न तु अनुवादपद्धत्या।

शिक्षाशास्त्रविदः वदन्ति यत् या काऽपि भाषा वा भवतु अध्येतव्या चेत् तया भाषया अभ्यस्तव्या न तु अनुवादमाश्रित्येति।

यथा आन्ध्रीया एका माता बाल्यदशायां स्वशिशुं पदानि बोधयितुमिच्छति चेत् सा पितरं सन्दर्श्य नान्न इत्येव वदति न तु नान्न = Daddy इति अन्यभाषासु न अनुवदति। तथैव यः कोऽपि वा भवतु भाषां अध्येतुमिच्छति चेत् तस्यां भाषायमेव तया भाषयैव अभ्यस्तव्यः।

1 . अत्र शिबिरचालकः शिबिरारम्भात् आशिबिरमपि संस्कृतमाध्यमेनैव बोधयति न तु अनुवादपद्धत्या इतरभाषासु ।

पाठ्योपकरणानि – 1.समुचिताभिनयः 2.नित्योपयोगीगृहवस्तूनि (लघुसमाजदर्शनाय)
3. स्फोरकपत्राणि 4.करपत्राणि 5. श्रव्योपकरणानि

पाठ्यप्रणाली –

सरलसंस्कृतविषयः न तु सरलीकृतविषयः। सप्तविभक्तीनां एकवचनम्, बहुवचनम् एवमेव अव्ययानि, धातवः व्यवहारज्ञानाय यदपेक्षितं तदत्र पाठ्यते। अत्र द्विवचनपाठनसन्दर्भे द्वयमिति प्रयोगः क्रियते यतः आरम्भस्तरेति कारणेन। द्विवचनपाठः अग्रिमपाठ्यांशेषु पाठिष्यते।

पद्धतिः – अत्र उपस्थापनं, अभ्यासः, प्रयोगः इति त्रीणि सोपानानि आचर्यन्ते शिबिरे शिबिरचालकेन बिन्दुबोधनाय। तानि सोपानानि पाठयितुमपि काश्चन पद्धतयः अत्र दत्ताः वर्तन्ते –

1.प्रत्यक्षपद्धतिः 2.मातृभाषाधिगमनपद्धतिः 3.प्रश्नोत्तरपद्धतिः 4.कथाकथनपद्धतिः 5.अभिनयपद्धति
6. सन्दर्भाधारितपद्धतिः 7.रचनाधारितपद्धतिः 8.मौखिकाभ्यासप्रधानपद्धतिः इत्यादिपद्धतयः।

फलम् – सहस्रशः शिबिरचालकाः शिक्षकाः, स्थानीयकार्यकर्तारः, पूर्णकालीकाः,

In Public domain. Digitization Muthulakshmi Research Academy

एतादृशानां समयदानेन संस्कृतं समाजं प्रति अतिसमीपं नयति संस्कृतभारती ।

साप्ताहिकमेलनम् – शिबिरे यद्यपि श्रवण, भाषणकौशलयोः प्राधान्यता दत्ता चेदपि पठनलेखनकौशलयोः प्राधान्यता बहु विद्यते।

सप्ताहे एकस्मिन् दिने एकघण्टा वा सार्धैकघण्टा वा शिबिरार्थीनाम् अनुकूलसमये साप्ताहिकमेलनं चालयामः।

पाठ्यप्रणाली – अत्रापि काचित् निर्दिष्टप्रणाली विद्यते। अभ्यासपुस्तकद्वारा लेखनकौशलं, सम्भाषणसन्देशमासपत्रिका वा, अन्यसंस्कृतपुस्तकाधारेण वा सः छात्रः दृष्ट्वा पठति सर्वेऽपि श्रृण्वन्ति ।

एवमेव अनन्तरं तस्मिन् सप्ताहे प्रवृत्तविषयान् अधिकृत्य वा, कञ्चित् उत्सवमधिकृत्य वा छात्रः स्वकीयवाक्येषु वदेत्। एवं सर्वेऽपि स्वाभिप्रायान्, मनोगतविषयान् सर्वान् अपि संस्कृतभाषायां वदन्ति। न तावदेव सुभाषितं वा कथां वा छात्राः स्वयं वक्तुं प्रयत्नं कुर्वन्ति।

एवं संस्कृतभारती संस्कृतभाषाधिगमे यानि सोपानानि आचरणीयानि तेषां विषये शिक्षयन्ती, सङ्घटनाविषयेऽपि शिक्षणं ददाति।

एवं भाषाप्रवेशः, गीताशिक्षणकेन्द्रद्वारा जनः संस्कृतजनः भूत्वा संस्कृतभाषायां वयोभेदं विना पटुः भविष्यति।

बालकेन्द्रम् –

संस्कृतभारत्याः कार्येषु इदमेकं महत्तरकार्यम्। अद्यतन बालाः श्वस्तन नागरिकाः इति कथनानुसारं यदि बालाः संस्कृताः भवन्ति तर्हि समाजोऽपि संस्कृतः भविष्यति। बालकेन्द्रमिति शिक्षणं विशिष्य बालान् आधृत्य संरचितम्। संस्कृतसम्भाषणपरिचयः, सुभाषितानि, लघु लघु श्लोकाः, क्रीडाः, योगासनानि च यथा बालानां मनोरञ्जनं भवति. तथा इदं बालकेन्द्रं चालयामः।

उद्देश्याः – 1. बाल्यदशायामेव सः बालः संस्कृतः, संस्कृतानुरागी च भवतु।

2.संस्कतस्य अभ्यसने तस्य रुचेः वर्धनं भवतु ।

3.संस्कृतिप्रियः भवतु ।

4. गृहे संस्कृतवातावरणं निर्मातु ।

5.सहजतया संस्कृतसम्भाषणशीलः भवतु ।

6.स्वमित्रैस्सह सोल्लासं सः संस्कृतसम्भाषणं कुर्यात् ।

7.*भविष्ये संस्कृतग्रन्थशोधकः भवतु ।*

8.भावि कार्यकर्ता – पूर्णकालिकः भवतु ।

संस्कृतभारत्याः प्रकाशनानि –

संस्कृताभ्यासाय साहित्यस्य अपेक्षा बहु वरीवर्ति । अतः तस्य निर्माणविषये संस्कृतभारती प्रत्येकदृष्टिं सारयति। अक्षराभ्यासादारभ्य शास्त्रपर्यन्तम् संस्कृतभाषायां ज्ञान, विज्ञान, उपन्यास(Novel) शास्त्रसम्बन्धपुस्तकानि शताधिकानि प्रकाशितानि वर्तन्ते । संस्कृतभारत्याः प्रकाशनेषु विशिष्टः सम्भाषणसन्देशः।

सम्भाषणसन्देशमासपत्रिका–

संस्कृतक्षेत्रे अयं एक द्रुमः। विश्वे या का अपि भाषापत्रिका वा भवतु अधिकपाठकसम्पादने प्रथमा इयं सम्भाषणसन्देशमासपत्रिका। लक्षाधिकाः संस्कृतपिपासवः विश्वे जायमानं संस्कृतकार्यं सर्वं अत्र ज्ञातुं शक्नुवन्ति । अत्र

In Public domain. Digitization Muthulakshmi Research Academy

सर्वेभ्योपि उपयोगाय कथाः, व्याकरणविषयाः, संस्कृतभारत्या क्रियमाणानि कार्याणि, विविधसंस्थाभिः क्रियमाणकार्याणि, उद्योगावकाशाः सर्वविधविषयाः अत्र मुद्राप्यन्ते।

दृश्यश्रव्योपकरणानि –

कालानुगुणं परिवर्तनशीलोऽयं समाजः। विशिष्य अद्यतनकाले प्रत्येकः बहु व्यस्तः जायमानः भूयते तेन कारणेन ये कक्ष्यां प्रति आगन्तुम् अशक्ताः तेभ्योपि संस्कृतभारती दृश्यश्रव्योपकरणानि – भाषिका, संस्कृतशिक्षणं, बालकेन्द्रम्, इत्याद्यः सान्द्रमुद्रिकाः, श्रवणकौशलाय गीतध्वनिमुद्रिकाः, सान्द्रमुद्रिकाः च प्रकाशिताः वर्तन्ते।

पत्राचारद्वारा संस्कृतशिक्षणम् – दूरे विद्यमानेभ्यः इयं व्यवस्था बहु उपयोगाय भवति। संस्कृतभारती 10भाषासु पत्राचारमाध्यमेन बहून् शिक्षयति।

संस्कृतभारत्याः प्रदर्शिन्यः –

1. वस्तु प्रदर्शिनी 2. वैज्ञानिकप्रदर्शिनी 3. शोभायात्रा 4. पुस्तकप्रदर्शिनी

संस्कृतभारत्यां विद्यमानानां शैक्षणिकप्रकल्पानां आन्तरङ्गिकम्, आत्मभूतं च भवति सङ्घटनम्।

संस्कृतभारत्याः सङ्घटनात्मकधारणाः –

संस्कृतभारत्याः कार्यं आन्दोलनात्मकं न तु संस्थागतम् ।

- प्रवेशाय प्रत्येकपञ्जीकरणमित्यादि न भवति । श्रद्धालवः सर्वेऽपि कार्यकर्तारः एव ।
- अत्र सर्वेऽपि स्वतन्त्राः । अत्र स्वामित्वकशायाः विजृम्भणं न भवति ।
- अत्र प्रत्यकोऽपि एका समिध् इव कार्यं करोति । अर्थात् सर्वेऽपि सर्वशक्तीः उपयुज्य कार्यं कुर्वन्ति ।
- सर्वैः व्यवस्थितं योजनाबद्धं, लक्ष्यसाधकं च कार्यं चिन्त्यते ।

संवादशाला –

संस्कृतभारत्याः नैरन्तर्यशैक्षणिकप्रक्रिया भवति इयं संवादशाला। अयमेकः महदवकाशः विश्वे यः कोऽपि संस्कृतजिज्ञासुः वर्तते तस्य पिपासायाः पूरणं भवति। यतः अत्र आवर्षं भाषाबोधनवर्गाः, भाषाविकासवर्गाः, शिक्षकप्रशिक्षणवर्गा, काव्य, शास्त्रवर्गाश्च अत्र सञ्चाल्यन्ते।

सङ्घटनात्मककार्यविषये संस्कृतभारत्याः धारणाः –

1. एकाकिना न क्रियते, गणभावेन क्रियते।
2. अहमिति भावना न कदापि, सर्वदा वयमित्येव भावना ।
3. व्यक्तिकेन्द्रितं कार्यं न – लक्ष्यकेन्द्रितं कार्यम् ।
4. करोमीति न, कुर्मः – कारयामश्च ।
5. सम्भाषणे, कार्यविषयेपि दोषदर्शनम् नैव, गुणदर्शनमेव सर्वदा ।
6. प्रेरणादायकवचनानि, न तु निराशाजनकानि ।
7. भावात्मकचिन्तनम् (Possitive thinking)
8. दोषस्य उत्तरदायी अहं – यशसः कारकाः, सहभागिनः अन्ये ।
9. क्रियैव केवलम् उत्तरम्।
10. संस्कृतभारत्याः कार्यं आन्दोलनात्मकं न तु संस्थागतम् ।
11. प्रवेशाय प्रत्येकपञ्जीकरणमित्यादि न भवति । श्रद्धालवः सर्वेऽपि कार्यकर्तारः एव।

In Public domain. Digitization Muthulakshmi Research Academy

12. अत्र सर्वेऽपि स्वतन्त्राः । अत्र स्वामित्वकशायाः विजृम्भणं न भवति। अत्र प्रत्यकोऽपि एका समिध् इव कार्यं करोति। अर्थात् सर्वेऽपि सर्वशक्तीः उपयुज्य कार्यं कुर्वन्ति।

13. सर्वैः व्यवस्थितं योजनाबद्धं, लक्ष्यसाधकं च कार्यं चिन्त्यते

इत्यादिभिः धारणाभिः शिबिरप्रविष्टेषु जनेषु कार्यकर्तृगुणवर्धनं क्रियते संस्कृतभारत्याम्। इमाः धारणाः एव सर्वेषामपि प्रेरणादायकसूत्राणीति वक्तुं शक्यन्ते।

सङ्घटनासूत्रम् – सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्। देवा भागं यथा पूर्वं सञ्जनाना उपासते ।।

उत्तमकार्याय सङ्घटनस्य अतीव महत्त्वं वर्तते ।

सम्भाषणतः शास्त्रपर्यन्तम्



सङ्घटनात्मककार्यदृष्ट्या कार्यकर्तृनिर्माणप्रक्रिया



राष्ट्रपुनर्वैभवप्राप्तये, संस्कृतं राष्ट्रभाषां कर्तुं, सम्भाषणतः शास्त्रपर्यन्तं समानेतुं त्रिचतुर्भिः आरब्धः एषः भगीरथप्रयत्नः त्रिंशद्वर्षेभ्यः (30) विविधयोजनाभिः दिनदिनदृढत्वम् आप्नुवन् कल्पतरुः इव विराजते ।

<u>संस्कृतरक्षणे संलग्नया संस्कृतभारत्या किं साधितम् –</u>

1. प्रायशः एतावता लक्षशिबिराणि चालितानि ।
2. एतावत्पर्यन्तं पर्यन्तम् उपकोटिजनाः दशदिनशिबिराणां द्वारैव संस्कृतसम्भाषणशीलाः जाताः।
3. 30,000 उपर्येव दशदिनशिबिरचालकाः निर्मिताः ।
4. 5संस्कृतग्रामाः निर्मिताः ।
5. 5000 संस्कृतगृहाणि निर्मितानि ।
6. 2000 तमं वर्षं संस्कृतवर्षत्वेन यावत् भारतदेशे, विश्वे आचरितम् ।
7. प्रायशःशताधिकपुस्तकानां साहित्यनिर्माणं जातम्। संस्कृतसम्भाषणाय विभिन्नदृश्यश्रवणोपकरणानां निर्माणं जातम्।
8. प्रतिराज्ये बहुत्र संस्कृतभारत्याः सम्पर्ककेन्द्राणि आरब्धाणि।
9. भाषासु पत्राचारव्यवस्था आरब्धा ।
10. भाषाबोधनवर्गः, भाषाविकासवर्गाः. शिक्षकप्रशिक्षकणवर्गाः सर्वत्र सञ्चाल्यन्ते ।
11. व्याकरण, साहित्य, न्याय इत्यादीनां शास्त्राणां शिक्षणाय बहु वर्गाः चालिताः ।

In Public domain. Digitization Muthulakshmi Research Academy

12. शास्त्रपरीक्षायै शलाकापरीक्षा इति प्रतिवर्षे निरुह्यते ।
13. प्रतिराज्येपि कार्यदृष्ट्या समितयः, कार्यगणाः रचिताः ।
14. नियमितरुपेण कार्यं कुर्वतां स्थानीयकार्यकर्तृणां निर्माणं जातम् ।
15. न केवलं भारते अपि तु 19विदेशेषु कार्यं वर्धमानम् अस्ति ।
16. प्रायः इदानीं 300 समर्पितचित्ताः पूर्णकालिकाः नित्यं विश्वे कार्यं कुर्वाणाः वर्तन्ते ।
17. विविधसंस्थानां सहयोगेन उत्तराखण्डे द्वितीयभाषात्वेन साधितम् ।
18. संस्कृतमातृभाषिपरम्परायाः उज्जीवनाय संस्कृतपरिवारसम्मलेनानि सञ्चालितानि ।

किं न साधितं संस्कृतभारत्या ? किं न साध्यते संस्कृतभारत्या ?

संस्कृतभारत्याः भावियोजनाः –

- भाषाव्युत्पत्तियोजना, युवविद्वद्योजना, उद्ग्रन्थाध्ययनयोजना इत्यादीनां आयोजनानां द्वारा
- शास्त्ररक्षणं, युवपण्डितानां निर्माणं करिष्यते ।
- संस्कृतकार्यं अचिरादेव प्रतिग्रामं, प्रतिगृहं नेतव्यम् ।
- सरस्वतीसेवा इति नाम्ना 1000 पुस्तकानां आधुनिकसाहित्यनिर्माणम् करिष्यते ।
- अर्थात्.बहुभ्यः वर्षेभ्यः अपि स्थगितस्य आधुनिकसंस्कृतसाहित्यनिर्माणस्य प्रकियायाः पुनः उज्जीवनम् ।
- बहूनां संस्कृतग्रामाणां निर्माणम् ।
- संस्कृतसागरतरङ्गः विश्वसंस्कृतपुस्तकमेला –
- विविधविश्वविद्यालयानां, संस्कृतपरिषद् सदृशानाम् आदर्शपरिशोधनसंस्थानां सहयोगेन विविधसंस्कृतसंस्थानां सङ्गमेन च *विश्वसंस्कृतपुस्तकमेला* इति भव्यदिव्ययोजना 2011, जनवरिमासे 7तः 10 पर्यन्तं बेङ्गुलूरुनगरे सुसम्पन्ना । तत्र लक्षाधिकाः सन्दर्शकाः समागताः । नूतनपुस्तकानां आविष्करणादिकं वैभवेन समभवत् ।
- संस्कृतं मातृभाषात्वेन अथवा ज्ञातभाषात्वेन वा जनगणनायां सर्वैरपि लेखनीयम्

विज्ञापनम् – संस्कृतभारत्याः विषये कार्यकरणद्वारैव ज्ञातुं शक्नुमः। इतरसंस्थानामिव न भवति। इदमेकं सङ्घटनात्मककेन्द्रम्। अतः इच्छुकाः सर्वेऽपि अधो दत्तस्य सङ्केतस्याधारेण कार्यकर्तृणां सम्पर्केण च इतोऽपि किञ्चित् ज्ञातुं प्रभवेयुः।

WWW.SAMSKRITABHARATI.ORG

वदतु संस्कृतम् – जयतु भारतम्

 Public domain. Digitization Muthulakshmi Research Academy

पञ्च-लकाराणां प्रयोगः उचितः वा न ?

मल्लारेड्डिः

सुविशालेऽस्मिन्ननन्त सृष्टिक्रमे प्राणिकोटिषु अभिन्नोऽपि ''मानवः'' तेभ्यः प्राणिभ्यः - भिन्नः, विशिष्टः, ज्ञानी, सदसद्विवेकी भवितुं, कृतपरिश्रमः स्वीय परिवर्तनानन्तरं अन्यपरिवर्तनाय अत्युन्नत साधनत्वेन भूत्वा, वेद पुराणेतिहासकाव्यनाटकशास्त्रसाङ्केतिकभौतिकसामाजिकाद्यनेकांशेषु विकसित वैज्ञानिकपरिणामानां आधारभूततया अतिमुख्यतमं साधनं भाषां स्वीचकार।

इयं च भाषा ''भावप्रकटनोपयोगी'' इति सर्वैरङ्गीकृतमेव। भाषणात् हि भाषा भवति, भाष्यते भाषादि व्यवहारोऽनुष्ठीयते यथा सा भाषा इति व्युत्पत्तेः। इयं च भावप्रकटना पाक्षिकतया मानवेतरेषु जन्तुषु,समग्रतया मानवेषु च व्यवहारे दृश्यते। एतादृश्याः उपर्युक्तव्यवस्थायाः कारणं तु मानव शरीरान्तर्गत ''स्वरपेटिकायाः'' निर्माणवैशिष्ट्यं नैव सिध्यतीति च शास्त्रसम्मत विषय एव।मानवस्तु सङ्घजीवी ।सङ्घस्तु परस्परभावविनिमयात्मकः तस्मात् परस्परभावविनिमयरहितः मानवः ज्ञानार्जने असमर्थो भूत्वा, जीवनसाफल्यं, उन्नतिं च न साधयति, सङ्घे तस्य जीवनमपि निरर्थकं, कष्टतरं च भवेत्। अतः ये ये विकासाः सुख-सन्तोषादिकाः अस्मिन्नाधुनिके मानवे दृश्यन्ते ते सर्वेऽपि आबाल्यात् भावविनिमयमाध्यमेनैव सम्प्राप्ताः इति सुनिश्चयोऽयं विषयः।तस्मात् भाव-विनिमयाधारभूता भाषा मानवं सर्वसाधनाय अवसरः, अवकाशः कल्पयति । अतः यत्र यत्र ज्ञानादि सद्विषयलब्धिः तत्र तत्र भाषास्थितिः, प्राबल्यं वर्तते एव । तस्मादेव भाषाप्राशस्त्यं दण्डिनामक लक्षणकारःस्वीय काव्यादर्शे एवं प्रस्तौतिस्म ।

''इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम् । यदि शब्दाह्वयं ज्योतिः आसंसारं न दीप्यते ।। इति

इयं च भाषा शब्दाधीना । श्ब्दाः श्रवणेनैव अर्थस्फुरणं भवति । तादृश शब्द एव भाषापरपर्यायी । नत्वन्याः शब्दाः। तस्मादेव ''वाचमर्थोऽनुधावति'' इति शास्त्रवाक्यम्। प्रतिष्ठितेऽस्मिन्विश्वे स्थितेषुभाषाकुटुम्बेषु दैवप्रोक्ता, सकलभुवनललामभूता, समस्तज्ञानराशीनां सम्राज्ञी, मुक्तिप्रदायिनी, अतिप्राचीना, सुलक्षणलक्षिता, सर्वभाषोपकारका च इयं संस्कृतभाषा सर्वोत्कृष्टा दृश्यते । अस्याः भाषायाः नामस्वन्यतमं इदं ''संस्कृतम्'' इति नामैव संस्कृतभाषायाः औन्नत्य प्रकटयति । इयं च अमरभाषा - यथा भावप्रकटनाय अनुकूला न तथान्याभाषा । अर्थग्रहणाय, अर्थबोधाय च समग्रव्यवस्थात्मिका समग्रस्वरूपा च भाषा इयमेव । अन्यासु भाषासु संस्कृतपदसारूप्यं दृश्यते परं तु अस्यां संस्कृतभाषायां नत्वन्यभाषा पदसारूप्यं कुत्रापि । अतः इयं परिपूर्णाभाषा अपि चप्रपञ्चे प्रथमव्याकरणशुद्धा भाषा च । भाषा दृष्ट्या एषा संस्कृतभाषा अन्वर्ततां प्रकटयति सर्वशः। यतोऽहि एषा भाषा व्याकरणदोषादि रहिता ।

यथा नित्यव्यवहारकार्यसिध्यै तत्कार्यसम्बन्धि सामाग्र्याःआवश्यकता तथैव अस्याःभाषायाःअपि तत्कार्य-निर्वहणाय सामाग्री वर्तते एव - तत् परिशीलयामः

संस्कृतभाषा सामाग्र्यां

अन्त - लिङ्ग - विभक्ति - वचन - नामवाचक - विशेषण - क्रिया - क्रियाविशेषण - सर्वनाम - अव्यय - प्रत्यय, समापकपद - असमापकपदकारक - उपसर्गादि अनेके अंशाः भाषाव्यवहारसिद्धिं जनयन्ति ।

In Public domain. Digitization Muthulakshmi Research Academy

उपर्युक्तविविध भाषासामाग्र्यात्मकपदेषु अति प्रधानतमा महत्वरूपा भाषाधाररूपा सामग्री - 'क्रिया' एव ।यतो हि -व्यवहारसम्बन्ध विषयाः ये ये वर्तन्ते ते सर्वेऽपि कालाधीना एव यथा - अधुना किं भवति, ह्यः किमभवत्, श्वः किं भविष्यति - इति त्रिकालपरिमित्यात्मकः व्यवहारः। तत्कालवाचिका भाषा सामग्री 'क्रिया'एव ।तस्मात् यस्मिन्वाक्ये 'क्रिया' तस्यैव वाक्यसंज्ञा । वाक्यं तु अभिप्रायबोधकम्। क्रियासत्वे अन्यसामग्री अभावेऽपि अर्थावगमो भवति । क्रिया अभावे बहूनि पदानि सन्त्यपि अर्थावगमो न भवति। अतः क्रियायामेव सर्वे भावाः, व्यवहाराः, अन्तर्भवन्ति । अतः भाषायाः प्राणं, मुख्याधारं च क्रिया एव भवति।

लोके नागरिकैः आमोदिताः भावाः पञ्चसहस्रोत्तर पञ्चशत (५,५००) सङ्ख्याकाः वर्तन्ते इति लोकप्रसिद्धविषयः। नत्वेता एव, अन्ये प्रान्तीयभाषा अपि बहवः वर्तन्ते। आमोदित भाषा समुदाये आङ्ग्ल, हिन्दी इत्याद्यनेके राजभाषाः (तत्तद्देशभाषाः) बहु जनव्यवहारे वर्तन्ते।

एतादृश भाषान्तर्गत पदोत्पत्ति, विकासव्यवहार परिशीलनानन्तरं एवं वक्तुं शक्यते यत् संस्कृतभाषेतरभाषाःप्रायशः साङ्केतिकभाषाः। यतो हि एकस्य पदस्य अयं अर्थः कथं सम्पादितः इति तत्र आधारो न लभ्यते , कुत इतिचेत् (Water,House,Lotus,Earth) इत्यादि पदानां अर्थाः निर्धारिताः परन्तु कथं किमर्थं अयमेवार्थो वक्तव्यः इति सन्देहे न समाधानम्। परं तु संस्कृतभाषा व्युत्पत्यधीना भाषा - प्रत्येकस्य पदस्य अयमेवार्थः वक्तव्यः इति व्युत्पत्तिं प्रदर्शयितुं अवकाशो विद्यते - प्रपञ्चे ईदृशी भाषा एका संस्कृतभाषा एव इति ममाभिप्रायः। न केवलं एक एवार्थ व्युत्पत्याधारित धातोः ये ये अर्थाः ते सर्वेऽपि तस्य पदस्य अर्थाः भूत्वा नानार्थवाचकंअपि भवति तत्पदम्।तस्मात् व्युत्पत्याधीना संस्कृतभाषा सर्वविशिष्ठा एव। एतादृशं व्युत्पत्याधारभूतं पदमपि क्रिपयापदजन्यमेव। क्रियापदस्यैव नामान्तरं 'धातुः'इति।धातु ज्ञानेन विना संस्कृतभाषाव्यवहारो न लभ्यते। संस्कृतेतरभाषासु क्रिया केवलं क्रियार्थ बोधनोपयोगी एव भवति। परं तु अस्यां संस्कृतभाषायां (क्रिया) धातुः क्रियार्थं बोधयन् अपि व्युत्पत्याधारको भूत्वा अनेक पदनिर्माण कार्यमपि निर्वहति। यथा - रामः कृष्णः-एवमेव रमयतीति रामः - इतिव्युत्पत्तौ 'रम्' क्रीडायां इति धात्वर्थाधारेण न केवलं अस्मद्रामायण नायको राम एव राम शब्दस्य अर्थः। अपि तु अयं रामः, वृक्षः इति धात्वर्थाधारेण वर्णितुं शक्यते - अयं वृक्षः आनन्ददायक इत्यर्थः। एवमेव संस्कृतशब्दानां एकस्य शब्दस्य अनेकार्थाः सम्भवन्ति। एतादृशी व्यवस्था न संस्कृतेतरभाषासु दृष्यते।एतादृश्र विशिष्टलक्षणानि संस्कृतभाषायां सहस्रशःलभ्यन्ते।अत एव प्रपञ्चभाषासु अस्याःभाषाया : स्थितिः सर्वोत्कृष्टा, सर्वविलक्षणा, सर्वाधारभूता च दृश्यते।

व्युत्पत्तिरपि क्रियापदेनैव सिध्यति। अतः भषासामग्री रूप शरीरस्य इदं 'क्रियापदं' हृदयस्थानमलंकृत्य समस्तभाषां सप्राणीं, व्यवहारयोग्यां च करोति।

तस्मात् क्रियापदं स्वमहिम्ना ''समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना'' इतिवत् समस्तभाषाव्यवहारं आवृणेतिस्म। कालवाचक प्राधान्येन क्रियापदस्य त्रयोकालाः प्रधानतया वक्तुं शक्यते -भूतकालः -वर्तमानकालः - भविष्यत्कालः इति। किन्तु संस्कृतभाषायां कालाः - दशधा विभज्य प्रोक्ताः -

 In Public Domain. Digitization Muthulakshmi Research Academy

अथ यथाक्रमं परिशीलयामः -

संस्कृतभाषायां प्रायेण २२०० (द्विसहस्रोत्तर द्विशतम्) धातवः वर्तन्ते । तेषां एकैकस्यापि धातोः दशलकाराः सम्भवन्ति। तेषु षट् लकाराः कालवाचकाः, चत्वाराः प्रकारबोधकाः।

षट् कालवाचक लकाराः - यथा -१. लट्, २. अनध्यतनभूतः - लङ्, ३. लुङ् - भूतः, ४. लिट् - परोक्षभूतः, ५. लुट् - अनद्यतनभविष्यत्, ६. लृट् - भविष्यत्कालः

चत्वारः प्रकारबोधकाः -

यथा -१. लोट् - आज्ञा, २. विधिलिङ् - विधिः, ३.आशीर्लिङ् - आशीः,४. लृट् - क्रियातिपत्तिः (सङ्केतः)

एतेषां एकैकस्यापि लकारस्य स्थाने **पुरुषाः त्रयः** सन्ति।

यथा - १. प्रथमपुरुषः, २. मध्यमपुरुषः, ३. उत्तमपुरुषः पुरुषाणां प्रत्येकं **त्रीणि वचनानि** च भवन्ति।

यथा - १. एकवचनम्, २. द्विवचनम्, ३. बहुवचनम्

पुरुषप्रत्ययाः एव तिङः इत्युच्यन्ते। तिङां 'परस्मैपदम्''आत्मनेपदम्' इति द्वे पदे स्थः। केभ्यश्चन धातुभ्यः परस्मैपदमेव भवति, ते धातवः ''परस्मैपदिनः'' इत्युच्यन्ते। केभ्यश्चन आत्मनेपदमेव, ते 'आत्मनेपदिन :' इत्युच्यन्ते । केभ्यश्चन उभयमपि पदं सम्भवति, ते 'उभयपदिनः' इत्युच्यन्ते।

परस्मैपदम्, आत्मनेपदम्, इत्यन्वर्थे संज्ञे । तथाहि पचनादिका क्रिया लोके परार्था, आत्मर्था च भवति। यत्र परस्य उपयोगाय क्रिया प्रवर्तते तत्र 'परस्मैपदम्', यत्र तु आत्मनः उपयोगाय तत्र 'आत्मनेपदम्' प्रोक्तव्यम् इति व्यवस्था ।परं तु इयं व्यवस्था अधुनातने काले नाद्रियते ।परस्मैपदम् आत्मानेपदम् च निर्विशेषं प्रयुंजते कवयः।

''पञ्चलकाराणां प्रयोगः उचितः वा न ?''

इतीदानीन्तन संस्कृत पण्डितैः या चर्चा लोकस्तरे प्रारब्धा तस्याः सम्बन्धि विचारस्य पर्यालोचनात्पूर्वं एक -वारमत्र अस्माभिः पूर्वोक्तलकाराणां विषये किञ्चिदिव स्मरणमावश्यकमेव भवति।

प्रधानतया कालः भूतवर्तमानभविष्यद्रूपेण त्रिविधोऽपि लेकव्यवहारमनुसृत्य, जीवन सरळिमनुसृत्य, कालान्तर विभागमनुसृत्य, भावावगमन सौकर्यार्थं अस्मत्पूर्वैः लोकव्यवहारविद्भिः समस्तं कालं 'दशधा' विभज्य बहूपयोगं कृतवन्तः। तद्विभागस्तु बहुप्रयोजनसाधकः।

एते दश कालविभागाः - लट्, लेट्, लङ्, लुङ्, लिट्, लिङ्, लोट्, लृङ्, लृट्, लुट् इति । इमं विषयमेव प्रदर्शिता एषा कारिका सुप्रसिद्धा, सर्वसम्मता विराजते ।

लड्वर्तमाने लेड्वेदे भूतेलङ् लुङ्लिटस्तथा । विध्याशिशोस्तु लिङ् लोटौ लृङ् लृट् लुट् च भविष्यति ।।

एते दश लकाराः - विभिन्न कालवावाचकाः अपि च आज्ञार्थे, विध्यर्थे, आशीर्वादर्थे च उपयुज्यन्ते स्म इति स्पष्टं भवति।

उपर्युक्त दशलकाराणां प्रत्येकस्य लकारस्य प्रत्येक - प्रत्यय विभागः वर्तते। तत्प्रत्यय ज्ञानेनैव लकाराणां प्रयोगः साध्यः।

परस्मैपदिसम्बन्धि प्रत्ययाः - नवतिः

आत्मनेपदिसम्बन्धि प्रत्ययाः - नवतिः - आहत्य अशीत्तरशतम् (१८०) प्रत्ययाः -

In Public domain. Digitization Muthulakshmi Research Academy

एते सर्वे अपि अशीत्युत्तरशतप्रत्ययाः उभयपदि च प्रयुज्यन्ते स्म ।

एते दशलकाराः एवं विभक्ताः -

१. वर्तमानसम्बन्धि - लट् २. वेदकाल सम्बन्धि - लेट्

३. भूतकालसम्बन्धीनि - लङ्, लुङ्, लिट् ४. विधि एवं आशीस्सम्बन्धि - लिङ्

५. विधिसम्बन्धि - लोट्

६. भविष्यत्सम्बन्धीनि - लृङ्, लृट्, लुट्, लिट् इति ।।

एतेषां दशांशानां परिशीलयामस्तावत् -

१. 'लट्' - ''वर्तमाने लट्'' इत्युक्तत्वात्-वर्तमान कालिके अर्थे लट् प्रयुज्यते इति अवगतं भवति। वर्तमानो नाम 'तू अधुना तत्'' यथा - ''रामः सीतां पश्यति'' ''अहं सभायां अस्मि''।

२. 'लेट्'- अस्य लकारस्य प्रयोगः वैदिकसंस्कृते एव न तु लौकिके इत्युक्तं 'लेड्वेदे' इति दलप्रयोगेनं।

३. 'लङ्'-'अनद्यतन भूते लङ्' इत्ययं भूतकालसम्बन्धि। 'भूते' नाम ''यत् अभवत् तत्''।अयं 'लङ्' यत् अद्य न अभवत् तत्कालं सूचयति । 'अनद्यतनभूते लङ् इत्युक्तात्। यत् अद्यतनो न भवति तत् अनद्यतनम्। अर्थात् किञ्चित्समयपूर्वं वा ह्यैव वा - प्रह्यो वा यत् अभवत् तत् विषयकथनसन्दर्भे लङ् प्रयोक्तव्यः इतिअस्य लकारस्य अभिप्रायः इति भावितुं शक्यते । यतो हि ''भूते लुङ्'' इति सुदीर्घकालात्पूर्वं यत् अभवत् तद्विषये 'लुङ्' इति सूचितत्वात् ''अनद्यतनो'' नाम ''न सुदीर्घकालात्पूर्वं'' इत्यर्थोऽवगन्तुं शक्यते । अतः भूतकाल प्रकटनाय अयमेव लङ् लकारः आधुनिकैः प्रयुज्यते । न त्वन्यौ ।

४. 'लुङ्''भूते लुङ्' भूतो नाम ''यत् अभवत्र् तत्'' 'भूते' इति पदप्रयोगेन न कालसमयो निर्दिष्टः। तथापि अनद्यतनभूताय लङ् उक्तत्वात् अस्य लकारस्य कालः अतिप्राचीनः इत्यवगन्तुं शक्यते।

यथा - ''पुरा हरिश्चन्द्रः सत्यव्रतः अभूत्''

५.'लिट्'-भूतकालवाचक लकारः। अयमपि यत् अभवत् तमुद्दिश्यैव कथयति -''भूत अनद्यतनपरोक्षे लिट्'' इत्यस्य लक्षणम्।अनद्यतने भूतकाले अप्रत्यक्षे यदाचरितं तं विवृणोति ।अक्ष्णोः परं परोक्षम्।अयं प्रत्येक सन्दर्भेष्वेव प्रयुज्यते न तु सर्वत्र। प्रत्यक्षाप्रत्यक्षादिविषय सत्वात्।

एवं भूतकालसम्बन्धिनी त्रयः लकाराः। तेषु लङ् लकार एव भूतकाल विषये प्रयोजनोपयोगी इति मम अभिप्रायः।

६. 'लिङ्' - विद्यादिषु लिङ्''आशिषि लिङ्' इति अयं लिङ् लकारः द्वौ कार्ये निर्वर्त्यते । अवश्यमाचरणीयं यत् तत् 'विधिः।ईद्दशवाक्यानि प्रायशः आज्ञा पूर्वकानि भवन्ति। लोके आज्ञा सत्यसाधनाय अत्यावश्यकी एव।

एवमेव यथा ''विधिः'' तथैव आशीर्वादोऽपि अत्यावश्यक एव अतः ''आशीर्लिङ्'' ।पूर्वेषां पितृणां, गुरूणां, ज्ञानिनां सत्सङ्कल्पपूर्वकाशीर्वादाः एव सत्कार्यकारणे मानवाय प्रेरणं कार्यदक्षतां च कर्तुं प्रभवन्ति ।अतः यथा ''रुग्णस्य औषधं'' तथा सत्प्राप्तेः विद्याशिषः प्रभावः अनिवार्यः। अतः अस्य उपयोगोऽपि आवश्यक एव ।

In Public domain. Digitization Muthulakshmi Research Academy

७.'लोट्'-''विध्याद्याशीष्षु लोट्''इत्यस्य लक्षणं प्रायशः 'लोट्' लकारेऽपि उपर्युक्त विषयमुद्दिश्यैव प्रवर्त्यते ।

एकस्य विषयस्य द्विलकार प्रयोगः यथावसरं विध्याशीर्वाद कथनावसरे भवति स्म। अतः अधुनातनकाले आशीर्वादार्थे लोट् - विध्यार्थे लिङ् इति अर्थवैविध्यपूर्वकं द्वयोः अवसरः निर्णयः कृतः। अतः लोट् लकारस्यापि आवश्यकः वर्तते।

यथा भूतकाले त्रिलकाराः, तथैव भविष्यत्कालसूचकाः लकाराः अपि त्रिप्रकाराः। तत्र को वा विषयः इति च परिशीलयामः।

८. 'लृङ्' - ''भविष्यति लृङ्''अस्य लक्षणं -''लिङ् निमित्ते क्रियातिपत्तौ लृङ्'' इति,यथा - अनिवार्यतया विधिवत् एका क्रिया, पूर्वं भवेत् चेत् तथा 'लृङ्' लकारोद्धेश्यपूर्वक आगामि भविष्यत् सूचकक्रिया सिध्यति।

अयं च भविष्यत्काले यत् अवश्यं भावि तत् सूचयति - तस्मादेव -अस्य प्रत्ययाः अपि भविष्यत् भूत-कालिकप्रत्ययैः मिलित्वा वर्तन्ते। इष्यति - इष्यतः - इष्यन्ति इति भविष्यत्कालप्रत्ययाः।

त् - ताम् - अन् इति भूतकालप्रत्ययाः। द्वौ मिलित्वा इष्यत् - इष्यताम् - इष्यन् इति प्रत्ययनिर्णयं कृतः। अनेन भविष्यतिभूतकालिकार्थं सूचयितुमेव। यथा ''एवं भवेत् चेत् एवं अभविष्यत्'' यथा ''विद्यार्थी पठेत् चेत् ज्ञानी अभविष्यत्'' अत्र ज्ञानप्राप्त्यै पठनकार्यं विधिः । तन्निमित्तेन एव ज्ञानी अभविष्यत् । इति लक्ष्ये लक्षण समन्वयः।

अस्य लकारस्य प्रयोगे द्वयोः क्रियापदयोः आवश्यकता प्रथमं क्रियापदं 'लिङ्' सम्बन्धि - द्वितीयं तु भाविसम्बन्धि। केवलं भविष्यत्कालसूचनाय अस्य अनवसरं जानन्तः अस्य प्रयोगमपि न कुर्वन्ति। प्रत्येकावसरे एव अस्य प्रयोगः भवेत् । न तु केवल भविष्यत्कालविषये ।

९. 'लृट्' - ''भविष्यति लृट्''केवल भविष्यत्कालसूचकः लकारः 'लृट्' तस्मादेव भविष्यत्सूचकविषये अस्यो -पयोगः। अतः अयमेव उपयुज्यन्ते आधुनिकाः। एषः न तथा यथा - लृङ् एवं लुट् ।

१०. 'लुट्' - भविष्यति 'लुट्' ''अनद्यतनभविष्यति लुट्'' न अद्यतनं अनद्यतनं - ''अनद्यतनभविष्यत्सूचक :'' अर्थात् अस्य कृते न कालनिर्णयः । तस्मात् किञ्चिदस्पष्टः उपयोगे एवमस्यापि उपयोगः न क्रियते अधुनातनेकाले।

संस्कृतभाषा व्यवहारसुखाय सम्प्रति परस्मैपदि आत्मनेपदि उभयपदि इति त्रिष्वपि भेदेषु एक एव प्रयुज्यन्ते। यथा अधुनातने काले संस्कृतभाषा काठिन्यादि विषये, लिङ्ग-विभक्त्यादि अनेकांशेषु परिवर्तनादयःक्रियते तथा 'धातु' विषयेऽपि सम्यगालोच्य कालान्तरेभ्यः सङ्क्रमित काठिन्यादयः दूरीकृत्वा मया उपरि प्रतिपादित विषयैवा भवतु उत अन्योपायैर्वा भवतु, सर्वेषां संस्कृतभाषा सम्भाषणे - प्रयोगे - पठने - पाठने च सारल्यं, आसक्तिं च उत्पादयितुं दशसु स्थाने पञ्चैव लकाराः उपयोक्तव्याः इति या आलोचना सा समर्थनीया एव।।

In Public domain. Digitization Muthulakshmi Research Academy

अलङ्कारशास्त्रसंरक्षणे औचित्यसिद्धान्तस्योपायभूतत्वम्

डा. नागराजु चन्दनाल

भूमिका -

अखिलब्रह्माण्डेऽस्मिन् सुविदितमेव तत्रभवतां सदसद्वस्तुविवेकिनां विपश्चितामिदं शास्त्रं साहित्याख्यं सरस्वतीस्तननिःसृतामृतपयःसन्निभमिति। तत्र सर्ववाङ्मयोत्पत्तिभूमेः शृतेः षडङ्गानि विशृतानि सन्ति। तत्रापि सप्तमाङ्गत्वेन साहित्यशास्त्रस्योपादाने प्राचां मतिरविरुद्धेति पुरुषार्थ-चतुष्टयसाधनत्वलक्षणफलसिद्धिरपि तदधिगमेऽध्येतुः सुखावाप्येति निरूपणात्। शास्त्रेऽस्मिन् ये च सम्प्रदाया रसादयो भरतादिभिः प्रवर्तितास्तेषां बीजानि शृतावेव समुपलभ्यन्ते। तन्मन्त्रोऽयमालोक्यताम्।

यस्ते स्तनः शशयो मयोभूर्येन विश्वा पुष्यसि वार्याणि।
यो रत्नधा वसुविद्यः सुदत्रस्तमिह धातवे कः ।। (ऋग्वेदेप्रथममण्डले तृतीयाध्याये 164सूक्ते, 49 मन्त्रः)

अत्र भारतीस्तनस्य षड्विशेषणाणि प्रदत्तानि। एकैकस्माद्विशेषाणादेकैकस्य सम्प्रदायस्य सङ्केतो गृह्यते। यथा 'शशय' इत्यतो रससम्प्रदायः, 'मयोभू'रित्यतो ध्वनिः, 'विश्वा पुष्यासि वार्याणी'त्यतोऽलङ्कारः, 'रत्नधा'इत्यतो वक्रोक्तिः, 'वसुविद्य' इत्यतो गुणरीती, 'सुदत्र' इत्यत्र औचित्यञ्च।

अधुनास्माभिरुपात्तविषयोऽयं 'अलङ्कारशास्त्रसंरक्षणे औचित्यसिद्धान्तस्योपायभूमिका' कापि वर्तते न वेति विचार्यमस्ति। तद्वयं प्रसङ्गेऽस्मिन् परं समीक्षामहे। ततोऽप्यादौ विचारणीयमिदं यदौचित्यं पृथक् सिद्धान्ततयोपादेयं वा? काव्यस्यात्मस्थायिकं भवितुमिदं युक्तं वेति?

आदौ विचारोऽयमस्माकं आर्यमतानुयायी यः औचित्यं पृथक् सिद्धान्तत्वेन नाभ्युपेयमिति। यतो हि रसालङ्कारगुणरीत्यादि काव्याङ्गानां प्रयोगे औचित्यं साधकत्वेन व्यवहरति। काव्येऽमीषामौचित्यमूलकत्वेन प्रयोगस्तन्निरतिशयशोभामादधातीति निरूपणादिदं पृथक् सिद्धान्तत्वेनापरिगण्य सर्वेषामपि काव्याङ्गानामुपादाने कारणमिति ग्राह्यम्। सिद्धान्तो निश्चयोऽस्मिन्निति व्युत्पत्या काव्ये सर्वात्मना गुणालङ्काराद्यङ्गानामुपादाने कीलकमौचित्यमेवेति निश्चित्या क्षेमेन्द्रमते सिद्धान्तस्थायिकं स्यादिति केचित्।

पुनर्जीवितं काव्यस्येदमिति विचारे तर्कस्तावदयं यत् काव्ये रसवदौचित्यं सिद्धं न भवति। यदीदं सिद्धं चेत् काव्यात्मकतयाभ्युपगमे निर्विरोधमेव स्यात्। परन्तु शतैरप्युपायानामनुशीलने सिद्धत्वमौचित्यस्य काव्यपरतया न शक्यम्। यतो हि कविः काव्ये रसतत्परमतिरेव सन् तत्र गुणादीन् प्रयुनक्ति। परन्तु गुणालङ्काराणामुत्कर्षो तत्प्रतीतौ चाचौत्यं साधनत्वेन व्यवसीयते। अतः साधनत्वेन औचित्यस्य काव्यात्मत्वमिति नाभ्युपगम्यम्।

अत्रेदमवधार्यमस्मदाचार्यवचनं यत् पञ्चभूतात्मकशरीरस्य यथान्नमयप्राणमयमनोमयविज्ञानमयानन्दमयनाम्ना पञ्चकोशव्यवस्थाऽस्ति, तथैव लोकोत्तरानन्दनिधानभूतस्य काव्यस्यापीयमेव निर्दिश्यते यथा काव्यशरीरं शब्दः, तदात्मा अर्थः, तज्जीवितं प्रतीयमानं, तदात्मा रसः, तन्मूलमौचित्यं, तज्जन्यश्चमत्कार इतीयमेव काव्यकोशव्यवस्था। अस्मादियमेव सारसम्पत्तिर्या गुणादिकाव्याङ्गानामौचित्यमूलतया निधानादेव तच्चमत्कृतिः सहृदयामोदिनी स्यात्। विपरीते तु वैमुख्यमेव तत्र फलम्।

विषयोपक्रमः - प्राग्भूमिमितिवृत्य साम्प्रतमस्मद्विषयभूमिमवतरामः। शास्त्रस्यास्य परिरक्षणे कथमौचित्यमुपाय - भूतमिति? किं तत्र काव्यं निरौचित्यं चेन्न जीवति? इत्यनुयोगे नैवेति निश्चितिः। सर्वकाव्याङ्गानां लोक-शास्त्र-कला-काल-देश-वेष-वयो-वृत्ति-गुणावस्थादिमुखेनौचित्यपूर्वकत्वे प्रयोगादेव सहृदयप्रपञ्चे तज्जीवितमिति न चेन्मृतमेवेति मन्तव्यम्।

भरतमुनेरारभ्याधुनिककाव्यलक्षणकाराणां पर्यन्तमपि प्रत्यक्षमप्रत्यक्षं वा काव्ये सर्वव्यापिजीवितमौचित्य - मेवेति सूपपादितम्। तत्र केषाञ्चिदाचार्याणां मते किं वा तस्य तत्त्वमिति मनागालोचयामः।

In Public domain. Digitization Muthulakshmi Research Academy

1) अलङ्कारशास्त्रोत्पत्तिकोशवन्नाट्यशास्त्रमिदं भरतमुनिप्रणीतं क्षेमेन्द्रस्य औचित्यसिद्धान्तभूमिकात्वेन परिणतम्। तदुक्तं- यादृशी यस्य कर्तव्या विन्यासे भूमिकान्ततः।

या यस्य सदृशी चेष्टा ह्युत्तमाधममध्यमा ।। (35-1)

यस्य सदृशी भूमिका चेष्टानिजकर्मविन्यासे स्यात् तस्य तादृशी उत्तममध्यमाधमभेदात् स्यादिति भावः। इदमेवानुकुर्वाणः क्षेमेन्द्रः- "उचितं प्राहुराचार्याः सदृशं किल यस्य तत्।'

इति जगाद। वयोनुरूपवेषो, वेषोनुरूपगतिप्रचारः, तदनुगतपाठ्यम्, तदनुरूपाभिनयो नाट्ये विधेय इति। पुनर्देशानुरूपवेषोविरहं नाट्यं न शोभत इति नाट्याङ्गानां सर्वेषामपि विधाने लोक एव परमप्रमाणमिति। तदुक्तम्-

लोकसिद्धं भवेत्सिद्धं नाट्यं लोकस्वभावतः। तस्मान्नाट्यप्रयोगेषु प्रमाणं लोक इष्यते।।

अनेन लोकशास्त्रप्रसिद्धमौचित्यमेव नाट्योपकारकमिति प्रमाणितम्।

2) काव्ये नाट्ये च रससन्निवेशे लोकप्रसिद्धंव्यवहार एव प्रमाणमिति भामहमतं। तदुक्तम्-

युक्तं लोकस्वभावेन रसैश्च सकलैः पृथक्। (1-21)

क्वचिद्दोषानामपि सन्निवेशविशेषाद्गुणत्वमापद्यत इति, क्वचिदाश्रय सौन्दर्यादसद्वस्त्वपि नितरां शोभत इति। तदुक्तम्-

किञ्चिदाश्रयसौन्दर्याद्धत्ते शोभामसाध्वपि। कान्ताविलोचनन्यस्तं मलीमसमिवाञ्जनम्।। (1-55)

3) दोषस्य गुणत्वसम्पत्तये तन्निवारणे च विस्तृतचर्चामादधानो दण्डी निजकाव्यादर्शनाम्नि ग्रन्थे कवि धिषणाबलात् क्वचित् देशकालगतविरोधोऽपि गुणायत इति। तदुक्तम्-

विरोधः सकलोऽप्येषः कदाचित् कविकौशलात्। उत्क्रम्य दोषगणनां गुणवीथीं विगाहते। (3-179)

पुनः प्राक्प्रस्तुतविधिनिर्दिष्टमार्गेण विवेकी कविः क्वचिद्गुणदोषवशवर्तिभिर्वचोभिरभिसरन् क्रीडति कीर्तिमपि च विन्दतीति तन्मतम्। अनेन दोषस्यापि गुणत्वस्थायिप्रापणे कविमनीषैव निपुणेति ज्ञेया।

4)अग्निपुराणे रीतिवृत्तिरसानां विषयानुकूलसन्निवेशे औचित्यनामाऽलङ्कारः प्रस्तुतः।

5)निजकाव्यालङ्कारसारसङ्ग्रहे उद्भटः औचित्य शब्दस्यानुल्लेखेऽप्यूर्जस्व्यलङ्कार प्रस्ङ्गेऽनौचित्य शब्दं प्रायुङ्क्त। तस्मादिदमभिज्ञेयं यत्तस्य युगे केनापि प्रकारेणौचित्यतत्त्वोन्मेषस्स्यादिति।

6)रुद्रटकाव्यालङ्कारे प्रथममौचित्यानौचित्यशब्दद्वितयप्रयोगेण तयोरुपादानपरिग्रहोपाया अपि सम्यगनुशीलिता दृश्यन्ते। तन्मते वैदर्भीपाञ्चालीवृत्तिसन्निवेशः प्रेयःकरुणभयानकाद्भुतेषु, लाटीयगौडीय-वृत्तिसन्निवेशो, रौद्रे, यथौचित्यं विदध्यादिति। पुनरनुप्रासगतपञ्चजातीनामपि ग्रहणपरित्यागविधावौचित्यविषये सम्पूर्णश्रद्धधानस्सन्नेव प्रवर्ततेति। अनौचित्यविषयेप्यस्य विचारो ज्ञेयः।

ग्राम्यत्वमनौचित्यं व्यवहाराकारवेषवचनानां। देशकालकुलजातिविद्यावित्तवयः स्थानपात्रेषु।। (11-9)

अस्य मतानुसारं ग्राम्यत्वमेवनौचित्यं। तदिदं देशाद्यष्टविषयेषु व्यवहारादि चतष्टयस्य स्याच्चेत् परित्याज्यमिति।

7) कविशिक्षायां जयमङ्गलाचार्याणामुपदेशः कविभ्यो यः तदुक्तं-

औचित्यं श्लाघ्यते तत्र कविताजीवितोपमम्। कवयस्तदजानन्तः कथं स्युः कीर्तिभाजनम्।।

काव्यजीवितस्यौचित्यस्य सम्यक्प्रयोगो विधेयः पुनः सः परिरक्षणीयोऽपीति।

8) राजशेखरेण काव्यमीमांसायां स्फुटं प्रतिपादितं यदनुसन्धानशून्यस्य कवेर्भूषणमपि दूषणायते। औचित्यं प्रति सावधानस्य दूषणमपि भूषणायत इति।

In Public domain. Digitization Muthulakshmi Research Academy

9) क्षेमेन्द्रस्यौचित्यसिद्धान्तप्रतिष्ठापनार्थमानन्दवर्धनाचार्यैर्ध्वन्यालोके प्रायः सर्वेषामपि काव्याङ्गानां विषये पर्याप्तविचारः कृतः। येन काव्ये तदङ्गानामौचित्यपूर्वकसन्निधानेन तदात्मनो रसस्यास्वादे विधातापनोदः स्यादिति। अत एवोक्तं-

अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम्। प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा।।

तत्र गुणालङ्कारसङ्घटनाप्रबन्धवृत्तिसन्निवेशे समग्रमौचित्यसाम्राज्यमुन्मीलितम्। पुनस्ततोऽपि भाषावयवभूतानां सुप्तिङ्वचनसम्बन्धकारककृत्तद्धितसमासनिपातोपसर्गकालादीनामपि रसाभिव्यक्तावौचित्येन सन्निवेशेऽगाधविचारो विहितो वर्तते। तत्तद्विशेषो अग्रे अवलोक्यन्ते।

10) वक्रोक्तिजीवितकारेण कुन्तकेन वर्णवक्रतायां रीतिवृत्त्यलङ्काराणामौचित्यपूर्वकसन्निवेशे विचारः कृतः।

11) ततो व्यक्तिविवेककारो महिमभट्टः काव्यगतदोषमनौचित्यनाम्ना व्याजहार। तल्लक्षणमपि सामान्येन प्रतिपादितं यत्- 'अस्यानौचित्यस्यविवक्षितरसादिप्रतीतिविघ्नविधायित्वं नाम सामान्यलक्षणम्।' (2 विमर्शः) तदिदं द्विप्रकारकमन्तरङ्गबहिरङ्गभेदात्। रसविषयकं प्रधानमाद्यं। शब्दविषयकं गौणमुत्तरम्। तत्र शब्दगतदोषाः पञ्चप्रकारकोऽस्ति विधेयाविमर्श-प्रक्रमंभेदक्रमभेदपुनरुक्तत्वावाच्यवचनभेदात्।

12) अमीषां मतप्रसङ्गोत्तरं तत्र रामचन्द्रगुणचन्द्राचार्याणामपि मतमत्र , समुल्लेख्यमस्ति। तद्विरचितनाट्यदर्शने पञ्चविधरसदोषेष्वनौचित्यमपि कश्चित्। तल्लक्षणं यत्- 'सहृदयानां विचिकित्साहेतुकर्मानौचित्यमि'ति। (3-125) इतोऽपीमेनौचित्यस्य रसदोषत्वेन पृथङ्निरूपयामासुः- तदिदमुक्तं यत्-'अङ्गौग्र्यादयश्च दोषाः परमार्थतोऽनौचित्यान्तःपातिनोऽपि सहृदयानामनौचित्यव्युत्पादनार्थमुदाहरण त्वेनोपात्ताः। (3-125) पूर्वाचार्याणाम्मते स्फुटास्फुटमिदमौचित्याख्यं काव्यतत्त्वमुपस्कृत्य निजौचित्य-विचारचर्चानाम्नि ग्रन्थे क्षेमेन्द्राचार्यैः सप्रपञ्चो विचारः कृतो वर्तते।

"उचितस्य भावः कर्म वा औचित्यमिति निर्णयः।' तदुक्तम्-

काव्यस्यालमलङ्कारैः किन्मिथ्यागणितैर्गुणैः। यस्यजीवितमौचित्यं विचिन्त्यापि न दृश्यते।। (4)

मृतकलेबरस्य भूषणादिविन्यासो गुणवैभववर्णनं यथा निरर्थकी स्यात् तथैव काव्यजीवितभूतस्यौचित्यस्य सर्वाङ्गव्याप्यत्वविरहे किं तत्र गुणालङ्कारादिसन्निवेशफलम्? औचित्यसंसर्गादेव गुणे गुणत्व – मलङ्कारेऽलङ्कार त्वं किं बहुना रसेऽप्याऽऽस्वाद्यत्वं तन्महिम्नैव शश्वत्प्रैतष्ठीयते। अत एवाचार्यपादैः षड्विंशति काव्याङ्गेषु सर्वव्यापकतयौचित्यप्रपञ्चः सदसन्मुखेन सुनिश्चितो वर्तते। तदुक्तम्-

पदे वाक्ये प्रबन्धार्थे गुणेऽलङ्करणे रसे। क्रियायां कारके लिङ्गे वचने च विशेषणे।।

उपसर्गे निपाते च काले देशे कुले व्रते । तत्त्वे सत्त्वेऽप्यभिप्राये स्वभावे सारसङ्ग्रहे।।

प्रतिभायामवस्थायां विचारे नाम्न्यथाशिषि । काव्यस्यान्येषु च प्राहुरौचित्यं व्यापिजीवितम्।।

अमूनि षड्विंशत्यङ्गानि विषयस्पष्टतायै त्रिषु वर्गेषु विभज्यन्ते। यथा-

1.भाषाविषयकवर्गः पदवाक्यक्रियाकारकलिङ्गवचनविशेषणोपसर्गनिपातकालाश्च

2.काव्यशास्त्रीयवर्गःप्रबन्धगुणालङ्काररसाः।परिकरपर्यायान्नाम व्यङ्ग्यपर्यायादभिप्रायोप्यत्रान्तर्धीयते।

3.वर्ण्यविषयकवर्गः देशकुलव्रततत्त्वसत्त्वस्वभावसारसङ्ग्रहप्रतिभा वस्थाविचाराशिषः।

नेयन्त्येव काव्याङ्गान्यौचित्यसमञ्चितानि। तत्र लोकशास्त्रकालानुसारेण सर्वत्रौचित्यमुन्नेय -मिति तदुक्तम्- 'अन्येषु काव्याङ्गेष्वनयैवदिशा स्वयमौचित्यमुत्प्रेक्षणीयम्।। (40)

प्रबन्धविस्तरभियादत्र कानिचिदेव विशिष्टकाव्याङ्गाण्यनुशील्यन्ते।

In Public domain. Digitization Muthulakshmi Research Academy

तत्र 'सुप्तिङन्तं पदमिति' सूत्रकारप्रमाणात् काव्ये पदसन्निवेशौचित्यमित्थं ध्वन्यालोक- तृतीयोद्योते विचारितमस्ति। तालैः शिञ्जद्वलयसुभगैः कान्तया नर्तितो मे या मध्यास्ते दिवसविगमे नीलकण्ठस्सुहृद्वः । अत्र तालैरिति बहुवचनमनेकविधं वैविध्यं ध्वनद्विप्रलम्भोद्दीपकतामेति। सुबन्तपदव्यञ्जकतां निरूप्य तिङन्तस्यापि निरूपयति-

अपसर रोदितुमेव निर्मिते मापुंसय हते अक्षिणी मे।
दर्शनमात्रोन्मत्ताभ्यां याभ्यां तव हृदयमेवं रूपं न ज्ञातं ।।

अत्रापसर मा वृथा प्रयासं कार्षीर्दैवस्य विपरिवर्तयितुमशक्यत्वादिति तिङन्तो व्यञ्जकः। कान्ताननाम्बुजन्यस्तं तिलकं यथा शोभते तथैव समुचितस्थानसन्निवेशात् पदमप्युत्कर्षाकारकं स्यात्। एवं वाक्यमपि सन्निवेशमहिम्ना सुतरामुत्कृष्याति। ततः प्रबन्धस्य रसव्यञ्जकत्वप्रतिपादनावसरे ध्वनिकारेण रामायण-महाभारतादौ सुप्रसिद्धतया प्रतीयमानस्यालक्ष्यक्रमव्यङ्ग्यात्मनो ध्वनेर्नियमनोपाया उपदिष्टा। यथा-

विभावभावानुभावसञ्चार्यौचित्यचारुणः। विधिः कथाशरीरस्य वृत्तस्योत्प्रेक्षितस्य वा।।
इतिवृत्तकथायातां त्यक्त्वाननुगुणां स्थितिं । उत्प्रेक्ष्याप्यन्तराभीरसोचितकथोन्नयः।।
सन्धिसन्ध्यङ्गघटनं रसाभिव्यक्त्यपेक्षया। न तु केवलया शास्त्रस्थितिसम्पादनेच्छया।।

उद्दीपनप्रशमने यथावसरमन्तरा।

रसस्यारब्धविश्रान्तेरनुसन्धानमङ्गिनः ।। अलङ्कृतीनां शक्तावप्यानुरूप्येण योजनं
प्रबन्धस्य रसादीनां व्यञ्जकत्वे निबन्धनम्।। (3/10-14)

एवमत्रोदाहरणप्रत्युदाहरणपुरस्सरं प्रबन्धसन्निवेशसमग्रौचित्यसाम्राज्यमाततान ध्वनिकारः।

गुणविषये प्रामाणिकानां मतमिदं यत् प्रागुक्तदशशब्दार्थगुणा नाभ्युपेयाः। वस्तुतो गुणत्रयस्यैव सद्भावादितरेषां तदन्तःपातित्वादिति। ध्वनिकारेण गुणा रसाश्रया इति प्रत्यपादि।

"तमर्थमवलम्बन्ते येङ्गिनं ते गुणा स्मृताः ।' (2-6)

गुणाश्रया च रचना। माधुर्यगुणोचितवर्णमाला, रचना च तद्व्यञ्जिका। काव्यप्रकाशे मम्मटाचार्यैर्निरूपितैवं यथा- णयुतस्पर्शाः, ह्रस्वान्तरितरणौ, असमासा, मध्यमसमासा च रचना, सुकुमारवर्णसन्निवेशादुपनागरिकावृत्तिरुचिता। ओजसोऽपि निरूपणे यथा-

योग आद्यस्तृतीयाभ्यामन्त्ययोरेणतुल्ययोः ।
आदिश्शशौ वृत्तिदैर्घ्यं गुम्भ उद्धत ओजसि।। (8-75)

दीर्घसमासारचना, परुषवर्णसन्निवेशात् परुष च वृत्तिरुचिता। श्रुतिमात्रेण यत्रार्थप्रतीतिर्झटिति जागर्ति गुणस्सोयं प्रसादः। सर्वरसरचनासाधारणः। कोमला वृत्तिरत्र प्रशस्यते। प्रागुक्तप्रकारेण गुणरचनावृत्तिसन्निवेशे औचित्यमतितमां विराजते काव्यजगति।

अलङ्काराणमपि सन्निवेशे ध्वनिकारेण नाना नियमाः प्रतिपादिताः। सर्वेष्वपि शृङ्गाररसभेदेष्वनुप्रास-यमकाद्यलङ्कारा नानुमताः। पृथग्यत्नताटस्थ्ये सत्येवालङ्कारसन्निवेशो रसादि ध्वानावुचित इति तत्समीक्षाप्रकारा अपि प्रोक्ताः।

विवक्षातत्परत्वेन नाङ्गित्वेन कदाचन। काले च ग्रहणत्यागो नातिनिर्वहणैषिता।।
निर्व्यूढावपि चाङ्गत्वे यत्नेन प्रत्यवेक्षणं। रूपकादेरलङ्कारवर्गस्याङ्गत्वसाधनम्।। (2-18,19)
एवमलङ्काराणामीदृशसन्निवेश एव शोभातिशयिता काव्यस्य। अत एवायं सङ्ग्रहश्लोकः।

रसभावादितात्पर्यमाश्रित्य विनिवेशणं। अलङ्कृतीनां सर्वासामलङ्कारत्वसाधनम्।।

साक्षात् काव्यात्मभूतस्य रसस्य परिपोषणावसरे कविरत्यन्तमवधानवान् स्यादिति सूचयन्नाचार्यानन्दवर्धनो रसविरोधान् तन्निवारणोपायानपि समग्रमनुशीलयामास। तत्र जगन्नाथपण्डितेनापि रसगङ्गाधरे रसविरोधविषये सूक्ष्मं विचारितम्। यथा-

In Public domain. Digitization Muthulakshmi Research Academy

"एतेषां परस्परं कैरपि सहाविरोधः कैरपि विरोधः। तत्र वीरशृङ्गारयोः, शृङ्गारहास्ययोः, वीराद्भुतयोः, वीररौद्रयोः, शृङ्गाराद्भुतयोश्चाविरोधः। शृङ्गारबीभत्सयोः, शृङ्गारकरुणयोः, वीरभयानकयोः, शान्तरौद्रयोः, शान्तशृङ्गारयोश्च विरोधः।'

एवं मिथो रसविरोधं निरूप्य तद्भेदं तन्निवारणोपायमपि प्रसज्जति। "विरोधस्तावत् द्विविधः। स्थितिविरोधो, ज्ञानविरोधश्च। आद्यस्तदधिकरणावृत्तितारूपः। द्वितीयस्तज्ज्ञानप्रतिबध्यज्ञानकत्त्वलक्षणः। तत्राधिकरणान्तरे विरोधिनः स्थापने प्रथमो निवर्तते। यथा- नायकगतत्वेन वीररसे वर्णनीये प्रतिनायके भयानकस्य रसान्तरस्याविरोधिनः सन्धिकर्तुरिवान्तरालेऽवस्थापने द्वितीयोऽपि निवर्तते। यथा- मन्निर्मितायामाख्यायिकायां कण्वाश्रमगतस्य श्वेतकेतोर्महर्षेः शान्तरसप्रधाने वर्णने प्रस्तुते- किमिदमनाकलितपूर्वं रूपम्! कोऽयमनिर्वचनीयो वचनरचनाया मधुरिमा! इत्यद्भुतस्यान्तरवस्थापनेन वरवर्णिनीं प्रत्यनुरागवर्णनम्।'

एवं प्रकारेण रसविरोधपरिहारपद्धतिमुपन्यस्य तत्त्वं तदीयं समन्तादुन्मीलयामास पण्डितराजः। अनौचित्यमन्तरौं रसास्वादे विघ्नकारणं नान्यदित्यार्यवचनमत्र स्मरणीयमेव। रसोचित- वर्णपदगुणालङ्कार – रचनावृत्तिविनिवेश एव काव्ये ज्यायान् पन्थाः। तदन्तरा सर्वं नश्वरमेव स्यात्।

एवं क्रमात् क्रियाकारकादि[1]वप्यौचित्यपूर्वकसन्निवेशित्वमवश्यमुपादेयम्। तेनैव रसानुभूति- स्सचेतसामिति ध्वनिकारमतम्।

सुप्तिङ्वचनसम्बन्धैस्तथा कारकशक्तिभिः। कृत्तद्धितसमासैश्च द्योत्योऽलक्ष्यक्रमः क्वचित्।। (3-16)

'च' शब्दान्निपातोपसर्गकालादीनामपि ग्रहणम्।

इत्थं विशेषणादीनामितरेषामपि लोकशास्त्रप्रसिद्धौचित्यमुखेन सन्निवेशादेव काव्यस्य सर्वाङ्गीणशोभा सहृदयहृदयान्तरालब्रह्मानन्दसमुद्बोधिनी स्यादिति परम्परागतसिद्धान्तसारसङ्ग्रहादाचार्योपदेश बलादस्मदीयात्म–सम्मतिः।

उपसंहृतिः -आधुनिकसमाजे सर्वत्रापि पाश्चात्यदेशीयसंस्कृतिमनुकुर्वाणाः कपिशब्दवाच्याः कवयो भारतीयसंस्कृतौ सनातनवाङ्मये माननीयपूर्वाचार्याणामुपदेशेष्वाविश्वस्ताः विशृङ्खलतया समाजक्षतिकारककुकाव्यपरम्परां परिवाहयन्तस्तत्पठितृणां चेतसि मातृसंस्कृतिं प्रति दुर्भावनामुत्पादयन्ति। तादृशमातृघातकानां तत्कृतीनामपि नामोल्लेखो मनसापि न कार्य इत्यार्यवचनानुरोधात्तत्रास्मदात्मनिवृत्तिरेव पारमार्थिकीगतिः। सर्वस्याप्यस्य कारणमौचित्यविलोप एवेति समाजहितैषिणामभिमतिः। औचित्यं न केवलमत्र काव्योज्जीवकतत्त्वमिति मन्तव्यम्। तदिदं सर्वस्यापि समाजस्य संस्कृतेश्चाधारभूतं सर्वव्यवहारक्रियाकलापपरिव्याप्तं सर्वाचारसम्प्रदायोपनिषद्भूतं परमरहस्यं महाजनहृदयैकवेद्यं सत्यं च त्रैकालिकं तत्त्वान्तरमिदं सर्वजनपरमाचार्यं मन्त्रभूतं पवित्रात्मकम् ।तदन्तरा यावती यशस्वीसंस्कृतिर्वा तथैव समाजो जनो वा समूलं विनश्यति । भारतीयसनातनवाङ्मये नैकानि प्रमाणानि विषयेऽस्य स्वयमभिज्ञेयानि भवन्ति । तेषां परिज्ञानादौचित्यस्य सर्वव्यापकत्वं तत्प्राधान्यञ्च संस्कृतौ समाजे व्यक्तौ कीदृशमित्यात्मानुसन्धेयं स्यादिति शम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृतम् - संस्कृतिः - ओगेटि पण्डितः

डा.के.गीता

लेखनं संस्कृते भव्यं संस्कृते भणनं प्रियम्।
श्रवणं कीर्तनं चैव कवनं मधुरं सदा ।। श्री प्र रा 1-1-5-2

कविर्नाम कश्चन लोकस्य सर्वस्य मार्गदर्शकः, आचार्यः, शिक्षकः, नीतितत्त्वोपदेष्टा, धर्मप्रवर्तकः, लोकव्यवहार कुशलः, विविधशास्त्रनिष्णातः, सहृदयः, मनोवैज्ञानिकः...इत्यादि बहूच्यते पण्डितैः। प्राचीनकालादारभ्य संस्कृतसाहित्येनै के कविपण्डिताः व्यास-वाल्मीकि-कालिदासादयः नैकान् ग्रन्थान् विरच्य लोकाय महान्तं ज्ञाननिधिं समार्पयन्। पुनः आधुनि के अस्मिन्नपि युगे बहवः विद्वत्कविवरेण्याः बहूनि दृश्यकाव्यानि श्रव्यकाव्यानि च विरच्य साहित्यसृष्टिक्रमं प्रचालयन्तःसन्ति इत्यत्र न सन्देहः। एतेषु कवितल्लजेषु ओगेटि परीक्षित् शर्मा अन्यतमः।

ओगेटि परीक्षित् शर्ममहोदयः संस्कृत-मराठी-आंग्लाद्यनेकभाषासु न केवलं कृतभूरिपरिश्रमः किन्तु एतासु काव्यनिर्माणं कृत्वा कवितासरस्वतीं समाराधयत्।तत्राऽपि विशेषेण संस्कृतभाषाया स्वानुरक्तिं प्रादर्शयितुं प्रायः नैकानि काव्यानिअरचयत्। सः आपादमस्तकं राष्ट्रभक्तिपूर्णविग्रहवान्।

पूर्वजन्मकृतं पुण्यं सत्यमस्मिन् युगे मम।
संस्कृतज्ञानरूपेण फलितं काव्यभूमिजे।। श्री प्र रा 1-1-4-1

गीर्वाणवाण्याः अध्ययनस्य अवकाशः केवलं पूर्वस्मिन् जन्मनि कृतेन सुकृतेन एव लभ्यते इति सः चिन्तयति। संस्कृतकवयः सर्वेऽपि अवश्यम् अपवर्गम् अधिगच्छन्तीति तस्य विश्वासः।

संस्कृते कवयः सर्वे मोक्षं प्रापुर्न संशयः।
लिलेखिष्यामि सर्वं हि संस्कृते मोक्षकाङ्क्षया।।श्री प्र रा 1-1-4-13

संस्कृतभाषा देवभाषा। तथापि इमां भाषां सामान्याः जनाः अपि अवगन्तुं शक्नुवन्ति। न केवलं भारतीयेषु किन्तु प्रपञ्चे सर्वत्र सर्वेषां जनानां मध्ये समैक्यताम् आनेतुं संस्कृतभाषा एव प्रभवतीति सः विश्वसिति। संस्कृतवाणी दिव्या, वेद वेदांगादि नैकैश्शास्त्रैः पुनीता। भारतीयानां भाषानां नैकासाम् इयं मूलाधारा। मधुरैः शब्दैः, भावयुक्तैः अर्थैः, अलङ्कारैः, छन्दोभिः युक्ता इयं भाषा समस्तं विश्वं आनन्दयति। देशीयाः भाषाः संस्कृतभाषासंबन्धेन एव माधुर्यम् अध्यगच्छन् इति विद्वज्जनाः अङ्गीकुर्वन्ति। साक्षात् भगवत्याः भारत्याः अन्यं रूपम् एव संस्कृतम्। ये संस्कृतं रक्षन्ति तान् इयं रक्षति। ये संस्कृतभाषां सेवन्ते तेभ्यः सर्वविधान् सौख्यान् इयं वाणी प्रापयति।

नमस्तस्यै सरस्वत्यै या प्रजाः संपुनाति च।
लोके परे सौख्यदा या वाङ्मये सुप्रतिष्ठिता।। श्री प्र रा 1-1-4-11

इति परीक्षित् शर्मा तां वन्दते कुत्रचित्। ''गीर्वाणरसार्णवेन एव मुक्तिं लभे। तया एव भाषिष्ये। राष्ट्रहिताय तस्याम् एव काव्यानि सर्वाणि ग्रथ्नामि'' इति कविः प्रतिज्ञां करोति। भारतीयान् पौरान् भाषायां संस्कारवतः कर्तुम् इयम् एव भाषा शक्नोति। अस्यां यत् माधुर्यं वर्तते तत् गृह्णन्तु।

कुर्वन्तु भाषां जनचित्तगम्याम् भणन्तु शश्वत् सुलभं सुरम्याम्।
लिखन्तु सम्यक् व्यवहारयोग्यां गीर्वाणवाणीपदपद्मसक्ताः।। का.त.न कविकथनम्

गीर्वाणवाणी निरन्तरम् अविच्छिन्नं प्रवहति। आचन्द्रतारार्कं तिष्ठति।

संस्कृतभाषाया प्राचारः अपि अस्य कवेः अन्यः उद्देश्यः। सर्वस्यापि देशस्य संस्कृतिः तस्य भाषास्वेव विराजते। अस्याः गीर्वाणभाषायाः अध्ययनेन, संभाषणेन, लेखनेन, अभ्यासेन जनाः अमरत्वम् अधिगच्छन्ति। संस्कृतभाषा एव जनान् सुशिक्षितान् करोति। संस्कृतज्ञानेन अन्याः सर्वाः भाषाः सुलभावगताः भवन्ति। संस्कृतभाषापठनेन वाचि संस्कारः भवति। अन्यभाषासु उच्चारणा यथाकथं वा भवतु भाषाव्यवहारः चलिष्यति। संस्कृते तथा न चलति। अस्पष्टोच्चारणा वर्णव्यत्ययोच्चारणा अनिष्टं जनयति। तस्मात् एव वैयाकरणाः वदन्ति यत् 'पठ पुत्र व्याकरणं स्वजनः श्वजनो माभूत्।' साधुशब्दप्रयोगेन सर्वं शुभम् एव भवति। अत एव उच्यते 'एकः शब्दः सम्यक् ज्ञातः सुष्ठुप्रयुक्तः स्वर्गे लोके कामधुक् भवति' इति।

In Public domain. Digitization Muthulakshmi Research Academy.

संस्कृतभाषा सर्वेषां भारतीयानां जन्मसिध्दा, जन्मसंक्रामिता च। जनाः संस्कृतं द्विषन्ति। किन्तु जातकर्म- नामक रणान्नप्राशन-चौलोपनयन-विवाह-सीमन्त-उन्नयनादि-पूर्वकर्मसु, अपि च अपरकर्मणि अर्थात् मरणोत्तरान्त्य-संस्कारे च संस्कृत मेवोपयुज्यन्ते। संस्कृतभाषा भारतीयानां जीवनाद्विभिन्ना न भवति। इयं जनन-जीवन-मरणानि पावयिता, अपि च मुक्ति प्रदायिनी भाषा। संस्कृतं जीवनमूलाधारं भवति भारतीयानाम्।

जननी सर्वभाषाणां न च वृध्दा पुरातनी।
नित्ययौवनलास्यन्ती त्रिदशा विश्वमोहिनी।।
मूढा भणन्ति वृध्देति किन्तु सा दिव्यभारती।
प्रोत्फुल्लपदसंभारा रसभावा फलान्विता।। श्री प.रा.1-1-5-8-9

यः कोऽपि संस्कृतं निन्दति, अपि च मृतभाषा इति च कथयति स एव निन्दास्पदो भवति, मृतप्रायो भवति इति परीक्षित् शर्मा 'कालाय तस्मै नमः' इति ग्रन्थे निगदति।सर्वभारतीयानां शान्तिः संस्कृतभाषया भवति। एतादृशभाषाऽभ्यासेन, पठनेन, जल्पनेन, जपेन, मननेन, नित्यं भाषासौन्दर्यपानेन,दिव्यभावरसास्वादनेन मानवः अमरत्वं भजते। संस्कृतभाषाऽ-भ्यासेन एका विशिष्टा क्रमशिक्षणा भवति मानवस्य जीवने। संस्कृतभाषाऽभ्यासेन रसना सुशिक्षिता संस्कारवती भाति। रसवती संस्कारवती रसना नर्तकीव सुलभतया स्वेच्छया सर्व भाषारङ्गेषु नर्तिष्यति। लोकान् भगवतः सान्निध्यम् अधिग -मयितुं यदावश्यकं ज्ञानं सर्वम् अस्याम् एव वर्तते।

संस्कृतभाषा प्राजानां सर्वासां भाषा। तां व्यावहारिकभाषारूपेण द्रष्टुमिच्छामि इति कविः जानपदनृत्यगीतमञ्जर्या वदति।तदर्थमेवसंस्कृतभाषाप्रचाराय स्वग्रन्थान् तया एव भाषया लिखामि इत्यपि च ललितगीतालहरी,जानपदनृत्यगीतमञ्जरी इत्यादि ग्रन्थेषु सरलसंस्कृतभाषया ग्रामीणान् अपि आनन्दयितुं जानपदगीतान् रचयामीति सः वदति। ''अहमस्मि व्यवहार भाषा स्वाप्निकः। मदीय स्वप्नान् साकारान् कर्तुं व्यावहारिकसंस्कृतपदजालसंबध्देन कवित्वेन संस्कृतभाषायाम् अनूह्यनवतां सृजामि। राष्ट्रैक्यता साधनाय संस्कृतभाषैव परमं साधनं भवतीति साहित्यप्रपञ्चे शाश्वतं स्थानं लब्धुम् इमाम् अहं रचितवान्।'(जान पु।) इति सः अवोचत्।अक्षयगीतरामायणम्, अक्षयगीतमुकुन्दम् इत्यादयः अष्टोत्तरशतगीतैः सुलभग्राह्याः

भवन्तितथा अलिखम् इत्यपि वदति। ''यथा शुकमहर्षिः परीक्षित् राजानं प्रति भागवततत्वम् उपादिशत् तथा इदा -नीमहमपि विशे-
षतः आधुनिकविद्यार्थिनां भक्तिश्रध्दयुतानाम् अत्यन्तोपकारकम् इदं भविष्यतीति, संक्षेपेण भागवतकथा एते ज्ञातुं शक्नुवन्ति इति संभाव्य अरचयम्। अपि च येन केनापि मार्गेण यदा कदांचित् भाषा व्यवहारयोग्या चकास्तु'',(अ.गी.मु.ह्रैवचने) इति प्रस्तावना -यां प्राकटयत्।

व्यावहारिकसंस्कृतभाषाप्रचारोद्यमे परीक्षित् शर्मा सर्वत्रापि स्वपरिचयं संस्कृतनैव अकरोत्। संस्कृतज्ञैः संस्कृतेनैव संभाषते स्म। संस्कृतज्ञाः सर्वेपि तया एव भाषया एव व्यवहारं कुर्युःइति सः इच्छति स्म। संस्कृतभाषायाःप्रचाराय

कदाचित् प्रान्तीयभाषागतपदानां केषांचन संस्कृतीकरणं आवश्यकम् इति तस्य अभिप्रायः। तस्मात् एव तादृशाना पदानां संस्कृतीकरणं कदाचित् उपयुनक्ति स्वकाव्येषु। एतादृशं प्रयोगं पण्डिताः अभिनन्दन्ति वा इति प्रश्ने -

निन्दन्तु केचिन्ममनव्यमार्गं निरन्तरं शाब्दिकतत्त्वमग्राः।
रसाद्रचित्ताः प्रचुरं स्तुवन्तु वैविध्यपूर्णं विशदं प्रमोदम्।। का.त.न कविकथनम्

इति स्वाभिप्रायं प्राकटयत् कविः। सर्वे जनाः सर्वान् ग्रन्थान् कवींश्च नादरन्ति। इदं तु लोके सर्वत्र वर्तते एव। तथापि भगवतः सूर्यस्य प्रकाशेन जगत्सर्व यथा प्रकाशते तथा संस्कृतप्रभावेण सर्व काव्यजगत् चकासते। महासागरसदृशे संस्कृते मम काव्यानि बिन्दुसदृशानि। तेन अमितं संतृप्तिम् अहम् अध्यगच्छम् इति वदति परीक्षित् शर्मा।

आपादमस्तकं भारतस्वातन्त्र्यमूर्तिः सर्वभारतीयैः संस्कृतभाषामृतप्रवाहेन अभिषेक्तव्यः आराधनीयः। यदि स्वराष्ट्रं तथा करिष्यति चेत् सत्यार्थेन भारतस्वातन्त्र्यप्राप्तिः इति तस्य मनीषा। वन्देमातरमिति संस्कृतगीतेन भारतस्वातन्त्र्यसमरं प्रारभत।यत् सत्यं तत् नित्यं भवति।इतिहासे संस्कृतस्य प्रगतिं बह्व्यः शक्तयः अरुन्धन्। तत् तात्कालिकमेवाभूत्।अद्यतावत् सा भाषा शरन्नदी गङ्गेव प्रवहति। भारतीयसंस्कृतिः, सर्वाः भारतीयभाषाः संस्कृत- भाषायाः समुत्पन्नाः।यदिसर्वभाषाभ्यः संस्कृतपदजालं निरस्यते उद्धृत्य गृह्यते, प्रादेशिकभाषाः मृताः भविष्यन्ति। संस्कृतमेव एतावत्पर्यन्तं भारतं नैकावरोधेभ्यः ररक्ष। का.त.न 249

संस्कृतभाषायाः प्राशस्त्यं लोकाय अवगमयितुं ओगेटि परीक्षित् शर्मा 'पानशाला' इति रूपकम् अरचयत्। अत्र वेदी काचन पानशाला। पानशाला इत्युक्ते फलानां रसं विक्रिष्यमाणाम् आपणमिति विचिन्त्य तस्यां पानशालां गच्छति

In Public domain. Digitization Muthulakshmi Research Academy

हरिहरशर्मा। तत्र स्मित् इत्याख्यस्य कश्चन आंग्लेयस्य समीपं गत्वा उपविशति। अयं शर्मा संस्कृतभाषाप्रचारकः। स्मित् इत्याख्यस्तु आंग्लपण्डितः। तेन सह संभाषणं कुर्वन् शर्मा संस्कृतभाषायाः औन्नत्यं, तस्याः भाषायाः अध्ययनस्य प्रयोजनं च तम् उक्त्वा इयं शास्त्रीया भाषा इति निरूपयितुं प्रयतते। ततश्च भारतीयसंस्कृतिः सर्वमपि संस्कृते एव उपनिबध्दा इति तं वदति। लोके नैकविधाभिः संस्थाभिः 'अक्षय्यं ते भविष्यति', 'योगक्षेमं वहाम्यहम्' इत्यादि संस्कृत आभाणकानि स्ववाणिज्य अभिवृध्यै उपयुज्यन्ते इत्यपि निरूपयति। भारते सर्वासु भाषासुसंस्कृतं वर्तते। लोके कलाः चतुष्षष्टिसंख्याकाः वर्तन्ते। तासां सर्वासां प्रयोजनं तु एकः एव भवति, आंनन्दावाप्तिः।एतासां सर्वासां मूलं संस्कृते विद्यते।तथैव आंग्लभाषा-पि प्रपञ्चे अन्येषां देशानां परिचयाय उपयुक्ता भवति। तस्मात् एते द्वे भाषे दृगिन्द्रियसमाने इति वदन्,या. विद्या देश-संस्कृतिं न कथयति सा विद्या निरर्थका इति अपि वदति। ततश्च देशीयाः जनाः हिन्द्या एव भाषन्ते, किन्तु भारतीयानां सांस्कृतिकी भाषा संस्कृतभाषैव। प्राथमिकविद्याभ्यासः मातृभाषया, ततश्चमाध्यमिकविद्याभ्यासः संस्कृतांग्लादि भाषासु प्रच लति चेत् सम्यक् भवति इति निगदति। यदि भाषा जननीमुखारविन्दात् निस्सरति बालाः शैशवे एव संस्कृतव्यवहारं करिष्यन्ति इति, ततः स्त्रीणां पुरुषाणामपेक्ष्या संस्कृतभाषाध्ययनमत्यन्तावश्यकमिति तस्य विश्वासः। पाठशालासु विद्या-लयेषु, विश्वविद्यालयेषु च संस्कृतभाषायाः शिक्षणम् भवति चेत् युवानः सर्वे अस्याः उपयोगं ज्ञातुं प्रभवन्तीति 'कालायतस्मै नमः' इति ग्रन्थे वदति परीक्षित् शर्मा। सौन्दर्यमीमांसा तु परीक्षित् शर्मणः अन्यतमः ग्रन्थः। स्वयं वर्णनानिपुणः अयं कविः सर्वत्र प्रथमं सुलभसंस्कृतभाषायां गद्येनैव वक्ष्यमाणविषयस्य प्रस्तावः प्रस्तुत्याकरोत्। ततश्चोदाहरणं प्रादर्शयत्।

''दिव्यत्वसंभूताः भाषन्ते संस्कृतं सदा'' इति संस्कृतज्ञान् सर्वान् परीक्षित् शर्मा प्रशंसति स्म। लोके साधारणतया जनास्स्र्वे पितृपितामहेभ्यः यत् गृहादिकं लभ्यते चेत् उत्साहं प्रदर्शयन्ति। किन्तु तेभ्यः आगतां संस्कृतिं तु अभिवर्धयितुं नैव प्रयत्नं कुर्वन्ति इति अयं चिन्तयति स्म।

तिन्रार्जितं च प्राचीनं भूखण्डं वस्तुसंचयम्। सर्वोऽपि काङ्क्ते लोके न तु प्राचीनभारतीम्।। श्री.प्र.रा 1.1.4.15

कीर्तिकामुकाः केचन संस्कृतभाषायाः सर्वत्र प्रचारं कृत्वा, गृहे तु आंग्लादिभाषाभिः संभाषणं कुर्वन्ति। एतन्नसमीचीनम् इति सः सविमर्शमवोचत्। ''संस्कृतं विनालोके संस्कृतिः नास्ति। तस्मात् लोके सर्वैः संस्कृतम् अध्येतव्यम्'' इति अयं कांक्षते स्म। एतदर्थमेव भारतदेशे सर्वत्र, कदाचित् विदेशेषु च संस्कृतभाषाप्रचाराय पर्यव्रजत्। विश्वसंस्कृतसम्मेलनेष्वपि नैकानि गीतानि विरच्य गायत। वैदिकसाहित्यम् आरभ्य प्राचीनानां कवीनाम् अभिप्रायान् स्वग्रन्थेषु यथावसरं गृह्णन् जनान् जागरूकान् कर्तुम् अयं बहुधा प्रायतत। एवं प्रकारेण आलोच्यते चेत् अनेन महाकविना निर्मित ग्रन्थास्सर्वे लोकस्य कृते उपदेशात्मकाः एव भवन्ति इत्यत्र न सन्देहः।

जयन्ति ते सुकृतिनः रससिध्दाः कवीश्वराः।
नास्ति तेषां यशःकाये जरामरणजं भयम्।।

उपयुक्तग्रन्थसूची

१.अक्षयगीतगीतरामायणम्

२.अक्षयगीतगीतमुकुन्दम्

३.कालाय तस्मै नमः

४.परीक्षिन्नाटकचक्रम्

५.जानपदनृत्यगीतमञ्जरी

६.यशोधरामहाकाव्यम्

७.सौन्दर्य मीमांसा

८.श्रीमत् प्रतापराणायणम्

In Public domain. Digitization Muthulakshmi Research Academy

LACE OF YOGA IN ŚAIVA RITUAL SYSTEM

Dr. T. GANESAN

The Śaiva religion consists of rites, philosophical doctrines and yoga practices. Nothing short of ultimate realisation of one's essential śivahood is the supreme goal propounded in all the fundamental scriptures (called Āgama) of this system.

Ideally these Āgamās are held to teach the rites such as the initiation (dīkṣā) and worship of Śiva (kriyā), prānaāyāma, meditation and other yoga practices (yoga), philosophical doctrines such as the different categories (padārtha), evolution of the world and the tattva-s, the state of bondage and mukti (vidyā or jñāna) and the religious and social duties of the initiated śaiva-s (caryā). This broad division of subject is called pāda (quarter).

In my present brief paper I will highlight how yoga plays a very fundamental rôle in many basic rituals such as the initiation (dīkṣā), the daily worship of Śiva and in the installation of Śivaliṅga in the temple.

- **Special features of the āgamic religion**

While the Veda and following them the smrti texts mostly prescribe sacrifice (yāga) in fire and the worship of images is not very prominent in them, the āgama-s as a class have a different type of worship. Even here, the basic conception of worship and its attendant rites have a different purpose and connotation from those prescribed in the smrti texts and the purāṇa-s. In the āgama-s more than anything else visualisation and intense devotion are the foundations on which the entire ritual scheme is developed. Every rite has three components: the physical act (karma), the mantra uttered (vācika) and the corresponding mental visualisation (mānasa). Such a wonderful synthesis of all these three is unique to the śaivāgama-s and one can definitely feel the clear difference between the āgamic mode and the smrti-purāṇic one. The basic reason behind such a difference is that yoga plays a very prominent rôle in the rites prescribed in the śaivāgama-s.

- **A brief outline of Yogapāda**

I feel it would be of some interest to scholars to have a bird's eye view of subjects treated in the yogapāda of various Śaivāgama-s of which some are yet unpublished. By this brief outline it would be clear that the śaivayoga is multi-faceted and so variegated in its theme and outlook.

